978

1 + 105 = 106 rect

consfolili

पंचदशाध्यायः

शांकरभाष्य

आनंदगिरिकृतटी॰

श्रीधरी स्वामिकृत

पिशाचभाष्य

रामानुजभाष्य

अभिनवगुप्ती

परमार्थप्रपा

वनमाली

ब्रह्मवैजयन्ती

मधुसूदनी

सदानंदी

नीलकंठी

आनंदी

रामकंठी

तासिकी

पंचौली ॥

भाषाअनुवाद ॥

श्रीभगवानुवाच ऊर्ध्वमूलमधःशाखमश्वत्थं
प्राहुरव्ययं । छंदांसि यस्य पर्णानि यस्तं वेद स
वेदवित् १

शांकरभाष्यं टीका १

यस्मान्मदधीनं कर्म्मिणां कर्म्मफलं ज्ञानिनाञ्च ज्ञानयोगधर्म्म
प्राप्यं भवेच्च ज्ञानफलमतो भक्तियोगेन मां ये सेवन्ते मत्प्रसा
दात् ज्ञानप्राप्तिक्रमेण गुणातीता मोक्षं गच्छन्ति किमु वक्तव्यमा
त्मनस्तत्त्वं सम्यक् विजानन्त इत्यतो भगवानर्जुनेनापृष्टमप्यात्म
नस्तत्त्वं विवक्षुरुवाच ऊर्द्धमूलमित्यादि तत्र तावद्वृक्षरूपकक
ल्पनया वैराग्यहेतोः संसारस्वरूपं वर्णयति विरक्तस्य हि संसारा
त् भगवत्तत्त्वज्ञानेधिकारो नान्यस्येति ऊर्द्धमूलमिति ऊर्द्धमूलं
कालतः सूक्ष्मत्वात् कारणत्वात् नित्यत्वान्महत्त्वाच्चोर्द्धमुच्यते
ब्रह्माव्यक्तमायाशक्तिमत्तन्मूलमस्येति सोयं संसारवृक्ष ऊर्द्धमू
लः श्रुतेश्च ऊर्द्धमूलोऽवाक्शाख इति पुराणेचाव्यक्तमूलप्रभव
स्तस्यैवानुग्रहोत्थितः बुद्धिस्कन्धमयश्चैव इन्द्रियान्तरकोटरः म
हाभूतप्रशाखश्च विषयैः पत्रवांस्तथा धर्म्माधर्म्मसुपुष्पश्च
सुखदुःखफलोदयः आजीव्यः सर्व्वभूतानां ब्रह्मवृक्षः सनातनः
एतद्ब्रह्मवनञ्चैव ब्रह्मा चरति नित्यशः एतच्छित्त्वा च भित्त्वा
च ज्ञानेन परमासिना ततश्चात्मरतिं प्राप्य यस्मान्नावर्त्तते पुनः
इत्यादि तमूर्द्धमूलं संसारं मायामयं वृक्षमधःशाखं महदहङ्का
रतन्मात्रादयः शाखा इवास्याधो भवन्तीति सोयमधःशाख
स्तमधःशाखं न श्वोपि स्थास्यतीत्यश्वत्थस्तं क्षणप्रध्वंसिन
मश्वत्थं प्राहुः कथयन्ति श्रुतिवादा इत्यव्ययं संसारं मायामयं
मनादिकालप्रवृत्तत्वात् सोयं संसारवृक्षोव्ययः अनाद्यनन्तदेहा
दिसन्तानाश्रयो हि सुप्रसिद्धस्तमव्ययं तस्यैव संसारवृक्षस्य इ
दमन्यद्विशेषणान्तरं छन्दांसि यस्य पर्णानि छन्दांसि छादना

छंदांस्यृग्यजुःसामलक्षणानि यस्य संसारवृक्षस्य पर्णानीव पर्णा
नि यथा वृक्षस्य रक्षणार्थानि पर्णानि तथा वेदाः संसारवृक्षपरि
रक्षणार्था धर्मतद्धेतुफलप्रकाशनार्थत्वात् यथा व्याख्याते सं
सारवृक्षे समूले यस्तं वेद स वेदविद्वेदार्थविदित्यर्थः १

आनंदगिरिकृत टीका २

ज्ञानेन गुणात्यये दर्शिते नाशित्वे तेषां विज्ञानेनात्ययादनाशि
त्वे तेनापि तद्योग्यत्वात्र ज्ञाने गुणात्ययहेतुरित्याशङ्क्य निरस्य
साक्षादेव श्रवणादिहेतुं सन्न्यासं विधित्सुः ब्रह्मतत्त्वस्य परमपु
रुषार्थत्वाच्च विवक्षुरध्यायान्तरमारभते यस्मादिति कर्म्मिणो
ज्ञानिनश्च शास्त्रेऽधिकृताः तत्र कर्म्मिणां कर्म्मानुकूलं फलमी
श्वरायत्तं फलमत उपपत्तेरिति न्यायात् ज्ञानिनामपि तत्फ
लमीश्वरायत्तमेव ततोऽस्य बन्धविपर्यया विमुक्तत्वात् यस्मादेवं
तस्माद्ये भक्त्याख्येन योगेन मामेव सेवन्ते ते मत्प्रसादद्वारा ज्ञानं प्रा
प्य तेन गुणातीता मुक्ता भवन्तीति स्थितमित्यर्थः येनात्मतत्त्व
मेव सन्देहाद्यपोहेन जानाति तेन ज्ञानेन गुणातीताः सन्तो मुक्तिं
गच्छन्तीति किमु वक्तव्यमित्यर्थः सिद्धमर्थमाह किमवक्तव्यमि
ति आत्मतत्त्वज्ञाने यतः संसारहेतुः ज्ञानं मोक्षात् फलमतोऽन्येने
न किञ्चिदित्यष्टमपि तत्त्वं भगवान्वक्तवान् प्रश्नाभावेऽपि तस्य त
द्व्युत्पादनाभिमानादित्याह अनन्तरमिति तत्त्वेनिवदते किमिति सं
सारो वर्ण्यते तत्राह तत्त्वेति अध्यायादिः सम्बन्धार्थः वैराग्यमपि
किमिति रूप्यते तत्राह विरक्तस्येति इति वैराग्याय संसारवर्ण
नमिति शेषः नाशसम्भावनार्थैः वृक्षरूपकं बन्धहेतोर्दर्शयति
ऊर्ध्वमूलमिति कथं कालतः सूक्ष्मत्वं तदाह कारणत्वादिति तदे
व कथं कार्यापेक्षया नियतपूर्वभावित्वादनादित्वादित्याह नित्य
त्वादिति सर्वव्यापित्वाच्चोत्कर्षं सम्भावयति महत्त्वाच्चेति ऊर्ध्वमु
क्तिमुत्कृष्टमिति यावत् तस्य कूटस्थस्य कथं मूलत्वमित्या शं

क्याह अव्यक्तेति स्मृतिमूलत्वेन श्रुतिमुदाहरति श्रुतेश्चेति अवाञ्चो
निकृष्टाः शाखा इव महदादयो यस्य स तथा प्रकृते संसारवृक्षे पुरा
णस्मृतिमाह पुराणे चेति अव्यक्तमव्याकृतं तदेव मूलं तस्मा
त्प्रभवतेति प्रभवो यस्य स तथा तस्यैव मूलस्याव्यक्तस्यानुग्रहादति
दृढत्वादुत्थितः संवर्द्धितः तस्य लौकिकवृक्षसाधर्म्यमाह बुद्धी
त्यादिना वृक्षस्य हि शाखाः स्कन्धादुद्भवन्ति संसारस्य च बुद्धेः सका
शान्नानापरिणामा जायन्ते तेन बुद्धिरेव स्कन्धस्तन्मयस्तत्प्रचुरो
यं संसारतरुः इन्द्रियाणामन्तराणि छिद्राणि कोटराणि यस्य स त
था महान्ति भूतानि पृथिव्यादीन्याकाशान्तानि विशाखस्तम्बा यस्य
तथा आजीव्यत्वमुपजीव्यत्वे ब्रह्मणाधिष्ठितो वृक्षो ब्रह्मवृक्षस्त
थापि ज्ञानं विना छेत्तुमशक्यतया सनातनः चिरन्तनः एतच्च ब्र
ह्मणः परस्यात्मनो वनं वननीयं सम्भजनीयमत्र हि ब्रह्म प्रतिष्ठि
तं तस्य वृक्षस्य संसाराख्यस्य तदेव ब्रह्म सारभूतं अथवास्य ब्रह्म
वृक्षस्यानवच्छिन्नस्य संसारमण्डलस्य तदेतद्ब्रह्म वनमिव वनं व
ननीयं सम्भजनीयं न हि ब्रह्मातिरिक्तं संसारस्यास्पदमस्ति ब्र
ह्मैवाविद्यया संसारतामभ्युपगमादित्यर्थः अहं ब्रह्मेति दृढज्ञा
नेनोक्तं संसारवृक्षं छित्त्वा प्रतिबन्धकाभावादात्मनिष्ठो भूत्वा पु
नरावृत्तिरहितं कैवल्यं प्राप्नोतीत्याह एतदिति अधःशाखमित्यत्र
ह्यावक्षे महदिति आदिशब्देनेन्द्रियादिसंग्रहः संसारवृक्षस्यातिव
चलत्वं प्रमाणमाह प्राहुरिति श्वःस्थितेरव्ययत्वं विरुद्धमित्या
शंक्याह संसारेति तदेवोपपादयति अनादीति छादनं रक्षण
मावरणं वा कर्मकाण्डानि स्वर्गारोहावरोहफलानि नानावि
धार्थवादयुक्तानि संसारवृक्षं रक्षन्ति तच्छिद्रं दोषत्वाद्वारयन्ति तेन
तानि छन्दांसि पर्णानीव भवन्तीत्यर्थः तदेव प्रपञ्चयति यथेति
ऽनेर्थे हेतुमाह धर्मेति कर्मकाण्डानां वेदानामिति शेषः क
र्मब्रह्माख्यसर्ववेदार्थस्य तत्त्वान्तर्भावमुपेत्य व्याचष्टे वेदार्थेति

काह अव्यक्तेति स्मृतिमूलत्वेन श्रुतिमुदाहरति श्रुतेश्चेति ऊर्ध्वं श्रो
नि कृष्णः शाखा इव महदाद्या यस्य सतथा प्रकृते संसारवृक्षे पुरा
णस्यसम्मतिमाह पुराणेति अव्यक्तमव्याकृतं तदेव मूलं तस्मा
त् प्रभवति प्रभवो यस्य सतथा तस्यैव मूलस्याव्यक्तस्यानुग्रहादिति
दृढत्वात्स्थितः समृद्धितः तस्य लौकिकवृक्षसाधर्म्यमाह बुद्धी
त्यादिना वृक्षस्य हि शाखाः स्कन्धादुद्भवन्ति संसारस्यैव बुद्धेः सका
शान्नानापरिणामा जायन्ते तेन बुद्धिरेव स्कन्धस्तन्मयस्तत्प्रचुरो
यं संसारतरुः इन्द्रियाण्यन्तराणि छिद्राणि कोटराणि यस्य सत
था महान्ति भूतानि पृथिव्यादीन्याकाशान्तानि विशाखस्तम्बा यस्य
तथा आजीव्यत्वमुपजीव्यत्वं ब्रह्मणाधिष्ठितो वृक्षो ब्रह्मवृक्षस्त
स्यापि ज्ञानं विना छेत्तुमशक्यतया सनातनः चिरन्तनः एतच्च ब
ह्मणः परस्यात्मनो वनं वननीयं सम्भजनीयमत्र हि ब्रह्म प्रतिष्ठि
तं तस्य वृक्षस्य संसाराख्यस्य तदेव ब्रह्म सारभूतं अथवास्य ब्रह्म
वृक्षस्यानवच्छिन्नस्य संसारमण्डलस्य तदेतद्ब्रह्म वनमिव वनं व
ननीयं सम्भजनीयं नहि ब्रह्मातिरिक्तं संसारस्यास्पदमस्ति ब्र
ह्मैवाविद्यया संसारतामभ्युपगमादित्यर्थः अहं ब्रह्मेति दृढज्ञा
नेनोक्तं संसारवृक्षं छित्त्वा प्रतिबन्धकाभावादात्मनिष्ठो भूत्वा पु
नरावृत्तिरहितं कैवल्यं प्राप्नोतीत्याह एतदिति अथः शास्त्रमित्येत
च्चावशिष्टे महदिति आदिशब्देनेन्द्रियादिसंग्रहः संसारवृक्षस्यातिव
ञ्चलत्वं प्रमाणमाह प्राहुरिति क्षणध्वंसितेनाव्ययत्वं विरुद्धमित्या
शंक्याह संसारेति तदेवोपपादयति अनादीति छादने रक्षणे
प्रावरणे वा कर्मकाण्डानि स्वर्गारोहावरोहफलानि नानावि
धार्थवादयुक्तानि संसारवृक्षं रक्षन्ति तन्निष्ठं दोषमावृण्वन्ति तेन
तानि छन्दांसि पर्णानीव भवन्तीत्यर्थः तदेव प्रपञ्चयति यथेति
उक्तेऽर्थे हेतुमाह धर्मेति कर्मकाण्डानां वेदानामिति शेषः क
र्मब्रह्माख्यसर्ववेदार्थस्य तत्रान्तर्भावमुपेत्यावशिष्टे वेदार्थेति

श्री·
गी·टी·
प·

वैराग्येनविनाज्ञानेनचभक्तिरतःस्फुटं वैराग्योपस्कृतंज्ञानमीशःपंच
दशेदिशत पूर्वाध्यायांतेमांचयोऽव्यभिचारेणभक्तियोगेनसेवतइ
त्यादिनापरमेश्वरमेकांतभक्त्याभजतःतत्प्रसादलब्धज्ञानेनब्रह्म
भावोभवतीत्युक्तं नचैकांतभक्तिर्ज्ञानंचाविरक्तस्यसंभवतीतिश्र
द्धमनेनेनवैराग्यपूर्वकंज्ञानमुपदेष्टुकामःप्रथमंतावत्सार्धे
श्लोकाभ्यांसंसारस्वरूपंवृक्षरूपकालंकारेणवर्णयन्नाह श्रीभग
वानुवाच ऊर्ध्वमूलमिति ऊर्ध्वमुत्तमःक्षराक्षराभ्यामुत्कृष्टःपुरुषो
त्तमोमूलंयस्यतं अधइत्यर्वाचीनाःकार्योपाधयोहिरण्यगर्भा
दयोगृह्यंतेतेनशाखाइवशाखायस्यतं विनश्वरत्वेनश्वःप्रभातप
र्यंतमपिनस्थास्यतीति विश्वासानर्हत्वात् अश्वत्थंप्राहुःप्रवाहरू
पेणाविच्छेदादव्ययंप्राहुःऊर्ध्वमूलोऽवाक्शाखएषोऽश्वत्थःसना
तनइत्याद्याःश्रुतयःछंदांसिवेदायस्यपर्णानिधर्माधर्मप्रतिपा
दनद्वारेणच्छायास्थानीयैःकर्मफलैःसंसारवृक्षस्यसर्वजीवाश्रय
णीयत्वापादनात्पर्णस्थानीयावेदायस्तमेवंभूतमश्वत्थंवेदसएव
वेदार्थवित् संसारवृक्षस्यमूलमीश्वरःश्रीनारायणःब्रह्मादयःत
दंशाःशाखास्थानीयाःसचसंसारवृक्षोविनश्वरःप्रवाहरूपेणनि
त्यश्च वेदोक्तैःकर्मभिःसेव्यतामापादितश्च इत्येतावानेवहिवेदार्थः
अतएवंविद्वान्वेदविदित्युच्यते १

मिशावभाष्य टीका २

तत्सर्वेषांलोकानामुपरिष्टाद्वर्तमानंसत्यलोकेनिवासाहिरण्यग
र्भांतःकरणाभिव्यक्तंसर्वस्यजगतःसृष्टिस्थितिसंहारहेतुभूत
मव्यक्तात्मकंब्रह्म ऊर्ध्वंकारणंयस्यसःऊर्ध्वमूलःसंसारवृक्षो
ऽयमश्वत्थःश्वोननिष्ठतीति अधःशाखंततस्सत्यलोकादन्यो
ऽधोभूतलोकांतर्वासीशाखंतमश्वत्थंप्राहुःपंडिताअव्ययमनादिना
शिनंछंदांसिवेदाःपर्णानिआवरणरूपत्वात्तेसमस्तस्यतस्यत्राणार्थं
सिनमश्वत्थंयस्तंवेदविहितार्थविदित्यर्थः १ सवेद

रामानुजभाष्य टीका ४

त॰ १

देवाद्यायेदेवदेव[illegible]योः प्रकृतिपुरुषयोः स्वरूपं विशोध्य विशुद्ध
स्यापरिच्छिन्नज्ञानैकाकारस्य पुरुषस्यैव प्राकृतगुणसंगप्रवाह
निमित्तो देवाद्याकारपरिणामः प्रकृतिसंबंधोनादिरित्युक्तं अनं
तरिवाद्याये पुरुषस्य कार्यकारणोभयावस्थप्रकृतिसंगमूलो
भगवतैव कृत इत्युक्त्वा गुणसंगप्रकारं सविस्तरं प्रतिपाद्य गुण
संगनिवृत्तिपूर्वकात्मयाथात्म्यावाप्तिश्च भगवद्भक्तिमूलेत्युक्तं
इदानीं भजनीयस्य भगवतः क्षराक्षरात्मकबद्धमुक्तविभूतिम
त्ताद्विभूतिभूतात्क्षराक्षरपुरुषद्वयात् निखिलहेयप्रत्यनीक
कल्याणैकतानतयात्यन्तोत्कर्षरूपेण विसजातीयस्य पुरुषोत्त
मत्वं च वक्तुमारभते तत्र तावदसंगशस्त्रच्छिन्नबंधात्क्षरा
ख्यविभूतिं वक्तुं छेद्यरूपं बंधाकारेणावितनमविस्तरेण म
विशेषमश्वत्थवृक्षताकारं कल्पयन् श्रीभगवानुवाच ऊर्द्धमूल
मितिपं संसाराख्यमश्वत्थमूर्द्धमूलमधःशाखमव्ययं वाहुःश्रु
तयः ऊर्द्धमूलोवाक्शाखः सोश्वत्थः सनातनः ऊर्द्धमूलमवा
क्शाखं वृक्षं यो वेद संप्रतीत्याद्याः सर्वलोकोपरिनिविष्टं चतुर्मु
खादित्वेन तस्योर्द्धमूलत्वं पृथिवीनिवासिसकलनरपश्वादी
पादिकृमिकीटपतंगस्थावरांततयाधःशाखत्वं सम्यक्त्तानो
दयात् प्राकृतप्रवाहरूपेणाच्छेद्यत्वेनाव्ययत्वं यस्य चाश्वत्थस्य छंदां
सिपर्णान्याहुः छंदांसि श्रुतयः वायव्यं श्वेतमालभेत भूतिका
मः ऐंद्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम इत्यादिश्रुतिप्र
तिपादितैः काम्यकर्मभिर्वर्द्धते यः संसारवृक्षः इति छंदांस्येव प
र्णानि पत्त्रैर्हि वृक्षो वर्द्धते यस्तमेवंभूतमश्वत्थं वेद स वेदवित् वे
दो हि संसारवृक्षस्य छेदोपायं वदति छेद्यस्य स्वरूपज्ञानं छेदनो
पायत्तानोपयोगी वेदविदित्युच्यते १

अभिनवगमकृत टीका ९

स्वहार्थे १ ॥

परमार्थप्रपा टीका २

पूर्वाध्यायांते मां च योव्यभिचारेत्यादिना मामीश्वरमेकांतभक्त्याभजत
स्तदनुग्रहलब्धज्ञानेन गुणत्रयविस्तारोपरमद्वारा ब्रह्मीभावो भव
तीत्युक्तं तत्र न हि विषयिणां वैराग्यमंतरेणैकांतभक्तिरुदेत्यतो
गुणत्रयविविचित्रसंसारात्मकस्थूलप्रपंचस्य दृढदृष्टांतेन कुठारवै
राग्यनाश्यत्वं दर्शयन् अश्वत्थोपनिषदुक्तं संसारवृक्षं सार्धश्लोकद्व
येन रूपकालंकारेण वर्णयन् भगवानाह ऊर्ध्वमूलमिति ऊर्ध्वः
अत्युत्कृष्टः क्षराक्षरातीतः पुरुषो मूलकारणं यस्य अर्वाची
नाः कार्योपाधयो हिरण्यगर्भप्रमुखास्तपः शाखा यस्य तं श्वः प्रबोधो
त्तरकालेन तिष्ठतीत्यश्वत्थमाहुः प्रबोधे स्थितः साध्यत्वात् अव्ययं प्र
वाहरूपेण चिरकालावस्थायि अश्वत्थमव्ययं प्राहुः छंदांसीति
यस्य प्रपंचवृक्षस्य छंदांसि वेदाः पर्णानि महांति मार्गेण धर्माधर्म
प्रतिपादकानि छायास्थानीयानि भवंति तद्वद्वर्तिनामापात
रमणीयत्वेन विश्रामजनकत्वात् एवं यः पुरुषस्तमश्वत्थं वेद
स एव वेदवित् अयमर्थः वेदेनावडुपक्रमे मंत्रात्मकविभागेन
विषयेषिणां फलप्रलोभनेन प्रपंचवृक्षस्य प्रशंसने कृते उपसं
हारे तूपनिषद्विभागेन मुमुक्षूणां वैराग्योपदेशस्तस्य स्वरूप
त्वेनोपरमः प्रशंसितोस्तीति वेदविदित्यनेन वेदनास्य पंचरात्रिसं
वित्तं एवा अनेन श्लोकेन स्थूलप्रपंचरूपः शिरः पाण्यादिलक्ष
णः पुरुषविध स्थूलशरीररूपो विराट्वृक्षत्वेन वर्ण्यते सच लो
किकवृक्षवदधोमूलो ऊर्ध्वशाखो नास्ति किंतूर्ध्वमूलमधः शाखं
प्राहुः ऊर्ध्वमुमादिकारणं सूक्ष्मदेहरूपो हिरण्यगर्भोस्य यस्य अ
धोरुंद्रादिदेवास्तनिस्तेनवो हस्तपादादिरूपाः शाखायस्य पर्णेष
णाप्रहतांडाविषयप्रवालाइत्यग्रेप्रोक्तं अतः छंदांसि वासनापव
वे संसारतरोः पर्णानि आच्छादनस्थानीयानि तुः स्वरूपोपि सं
सारतरुः फलवासनाभिः स्वविस्तारभावभासन रम्यर्थः श्रुति
रपि अर्वाक्शाखो विलस्यमसजर्ध्वमूल पुलस्त्यशोनिविहितो विश्वरूप
तंस्थासनऋषयः सप्तनीरेवगार्हमीवस्त्वणासंविदानेति भावः

तस्याविराजस्सममस्तः शिरोदेशः ऊर्ध्वबुध्नः उर्ध्वबुध्नः वर्तुलः अर्वाग
योविलेकचरेश्वंयस्मिन्नस्मिन्शिरोदेशेविश्वरूपंहिरण्यगर्भाख्या
नेतस्यप्रतिमास्तितस्यनाममहद्यशइतिश्रुतेः यशःपरमात्मस्व
निहितं१ रूपंनिगूढंतेपास्थापितमस्तीमध्वप्रमाणमाह तस्येति तस्यती
रेसमीपेसमर्षयः आसतेसिद्धंतिगच्छंतिव्यापारेकुर्वंतितेसमर्ष
यः त्वानेंद्रियाणिहेनेत्रेद्वौश्रुतीद्वेनासेसमनमीरसनेतितत्रवाग
ष्टमीकर्मेंद्रियंपञ्चप्रवर्तकः सूत्रात्मानत्समीपेतत्प्रकाशनप
वर्तनर[illegible]त्यर्थः तदेवाह ब्रह्मणेतिकिंभूतावाकब्रह्मणाहृत्स
घ१ त्वोसविदानासंवदंती तथावैवल्लीषुऊर्ध्वमूलमर्वाक्शाखएषको
श्वत्थः सनातनः तदेवशुक्रंतद्ब्रह्मतदेवामृतमुच्यते तस्मिन्लो
काः श्रिताः सर्वेतदुनात्येतिकश्चनेति श्रुत्यशंकेशावलंबलतदुन
तकश्चनअत्येतिअतिलंघ्यनगच्छतितदेनतएवविशेषतिशेषंप्राग्
व्याख्यातं १

वनमाली टीका ८

संसारपादपोनादिरुच्छेद्युग्रामकृतात्मना तच्छेदनेस्वमाहात्म्यंवप
वदशाउच्यते पूर्वाध्यायेसंसारबीजरूपंगुणत्रयमुक्तमत्रसम
ग्रंसारमुक्त्वानदस्ययेसंप्रतिष्ठावर्ततेतदस्यप्रसाधनेसद्भावोध्याय
प्रपंचयतिपंचदशेमांचयोव्यभिचारेणान्येननस्वभजनेस्वगुणा
तिक्रमहेतुनोक्तातत्कथंमनुष्यसाम्यतयाहश्यमानस्येनाहशमा
हात्म्यमितिमत्वाशंकानिराकरणायानन्यसाधारणंस्वमाहात्म्यंव
वदति तत्रादौजगतोवृक्षसाम्यमाहऊर्ध्वमितिऊर्ध्वनिखिलचिदचि
त्प्रकृतित्रिगुणमूलानियस्यतमूर्ध्वमूलं अधःशाखं विस्तार
पेत्यायोनिकृष्टब्रह्मादिवेनतेमहदाधुवेनतेवशाखायस्यतं
श्वोप्येकप्रकारेणनस्थास्यतीतिश्वत्थं [illegible]स्यवतावलपनक्षियते २म
वाच्यत्वसदाजन्मादिविकारेणानित्यत्वः तथापिप्रवाहरूपे
णानंतकालानुसारेणकालत्रयेपत्सीत्याह अव्ययमितिऊर्ध्वमू
लोर्वाक्शाखएषोश्वत्थः सनातनइत्याद्याः श्रुतयःप्राहुःअव्य

श्री·
गी·टी·
प·
५

क्तमूलप्रभवस्तस्यैवानुग्रहोदितः बुद्धिस्कंधमयश्चैव इंद्रियांतरकोट
रः महाभूतविशाखश्च विषयैः पत्रवांस्तथा धर्मसुपुष्पश्च सुखदुः
खफलोदयः आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः एतद्ब्रह्म
वनं चैव ब्रह्माचरति साक्षिवत् एतच्छित्वा च भित्वा च ज्ञानेन परमा
सिना ततश्चात्मगतिं प्राप्य तस्मान्नावर्त्तते पुनरित्यादयः स्मृतयश्च
अव्यक्तो हरिर्मूलं यस्य स तस्यैवाव्यक्तस्यानुग्रहादतिदृढत्वादुत्थितः
संवर्द्धितः वृक्षस्य हि शाखाः स्कंधादुद्भवंति संसारस्य च बुद्धेः सका
शान्नानाविधाः परिणामा विभवंति तेन सा यथास्यां बुद्धिरेव स्कंधः य
स्तस्य वरोयं बुद्धिरत्र महत्तत्त्वम् इंद्रियाणामंतराणि छिद्राण्येव को
टराणि यस्य स महांति भूतान्याकाशादीनि विविधाः शाखा यस्य वि
शाखस्तभोयस्यतिवा आजीव्य उपजीव्यः परं ब्रह्मणाधिष्ठितो ब्रह्म
वृक्षो हतः भगवज्ज्ञानं विना छेत्तुमशक्यत्वात् सनातनः एतद्ब्रह्म
वनं जीवरूपब्रह्मणो भोग्यं ब्रह्मणो पीनं च परं ब्रह्म साक्षिवदाच र
ति न त्वेतत्कृतेन लिप्यते एतद्ब्रह्मवनं छित्वा भित्वा वैराग्यखड्गेन
च्छेदनतिः शेषं छित्वेत्यर्थः ब्रह्मगतिं ब्रह्मज्ञानेन प्राप्य पुनर्नावर्त्त
त इत्यर्थः अत्र च शाखानां रागनुष्यमानोऽनुगत नीरतिर्यथ्यि पतितन
महोत्तमूलितमात्तेनं भस्मनायुपमानीकृत्य जीवं न मिथ्यारूप
कल्पनेति दृष्टव्यं तेन नोर्ध्वमूलाधःशाखत्वान्नयपपत्तिः यस्य
वृक्षस्य छंदांसि छादनात्त्वचस्तुशावरणात् संसारवृक्षस्तरणे
हाकर्मकांडानि ऋग्यजुःसामानि धर्माधर्मनद्वेनफलप्रकाश
नार्थत्वात् तेषां यस्तं यथाख्यातं वेद स वेदवित् संसारवृक्षं ज्ञात्वा
वैराग्यपूर्वकं भगवदाराधनेनोत्पन्न[illegible]तं भ
गवदपरोक्षेण वृक्षं छित्वा मुक्तिं प्राप्स्यतीति हि सर्ववेदार्थस्तं
यो वेद स एव सर्ववेदार्थविदिति भावः १

ज्ञानवैजयन्ती टीका १

संसारच्छेदे वैराग्यं जीवोऽशो ममसायतः ह्यवातरोत्तमश्चाहमि

धर्मा

महान

क

त्तिपंचदशोस्मत्तम त्रयोदशे प्रतिपुरुषयोरीश्वरस्य च स्वरूपया
थात्म्यं तयोस्तेन चाभिन्नाभिन्नसंबंधरूपं यथार्थकं ज्ञानेन प्रतिपा
गुविशुद्धानवच्छिन्नज्ञानैकाकारस्येश्वरांशभूतस्य पुरुषस्याना
दिप्रकृतिसंबंधकृतसंसारबंधश्च तस्य तद्धेशे पुरुषस्यानादि
कर्मवासनानुगुणेन भगवत्संकल्पेन प्राकृतगुणसंगाद्बंधः पुन
श्च तस्य गुणस्वरूपयथार्थ्यज्ञानेन भगवद्भक्तिशिरस्केन स्वस्व
रूपप्राप्तौ सत्यां भगवत्स्वरूपमाश्रित्य तत्रैव स्थितित्वमुक्तमथे
दानीं पंचदशे पूर्वोक्तज्ञानस्थिरकरं प्राकृतविषयवैराग्यं पुरुष
स्य भजनीयं भगवदंशत्वं भगवतस्त्रीभाभ्यां तादृशाभ्यां पुरुषा
भ्यामुत्तमत्वं वर्ण्यते तत्र तावत्प्राकृतसत्वादिगुणसंगविरचितस्य
संसारस्य गुणसंगरूपेण वैराग्यशस्त्रेणैव छेद्यत्वात्संसारं वृक्ष
रूपकत्वेन वैराग्यं च शस्त्ररूपकत्वेन वैराग्यं निरूपयन्पार्थसार
थिर्भगवानुवाच त्रिभिः ऊर्ध्वमूलमिति पंचेतनाचेतनात्मकं सं
साराख्यमश्वत्थं श्वोनादौ भविष्यत्काले तिष्ठतीति व्युत्पत्त्याः अश्व
त्थोऽश्वत्थस्या [illegible] स्य ब्रह्मात्मकं प्रवाहेनित्यत्वात्ः अकारो वासुदे
वश्च अश्वत्थश्च वदराणामकारोसौ त्यादि स्मृतेश्वतेयो हृतोपिय स्यात्यः स
वेहृताणामित्युक्तत्वात् श्रुतयः प्राहुः प्रकर्षेणोसनातनत्वेन त्रु
वंति ता अपि ऊर्ध्वमूलोर्वाक्शाख एषोऽश्वत्थः सनातनः ऊर्ध्वमूलम
र्वाक्शाखं वृक्षं यो वेद संप्रतीत्यादिकाः कीदृशं ऊर्ध्वमूलं ऊर्ध्वं सर्वो
परि सत्यलोके प्रधानवीजेऽस्य प्रथमप्ररोहरूपमहत्तत्वात्मकं च
तुर्मुखरूपं मूलं यस्य तथा तम् पुनः अधः शाखमधः सत्यलोका
दर्वाचीनेषु स्वर्भुवो भूलोकेषु देवादिगंधर्वकिन्नरासुर यक्ष रा
क्षसमनुष्यपशुपक्षिकीटपतंगस्थावरांतरूपानादिप्रसृतत्वाच्छा
खा यस्य तं पुनरव्ययं प्रवाहरूपेणानश्वरमीदृशं चतुर्वर्गफलाश्रय
त्वाद् अश्वत्थमुत्तमसंहृतं तादृशाविवेकज्ञानेन विनाश्यच्छेदनाशक्य
मित्यर्थः यस्य संसाररूपस्याश्वत्थस्य छंदांसि वायव्या [illegible] नमा

मे

लभेतभूमिकामः ऐंद्राग्नमेकादशकपालंनिर्वपेत्प्रजाकामइत्यादी
निकाम्यकर्मप्रतिपादकानिश्रुतिवाक्यानिपर्णानिवा[illegible]
[illegible]पत्राणिप्राहुः पत्रैर्लतावर्द्धतेशोभतेचयथेहसंसारतम
स्यवेदजानाति[illegible]सवेदवित्वेदोहिसंसारवृक्षस्यदे
हतोपायंवदतिअनंतंहितच्छेदस्यहेतुस्यस्वरूपस्यज्ञानेछेदनो
पायंज्ञानोपायंचजानातीत्यभिप्रायः १

मधुसूदनी टीका १·

पूर्वाध्यायेभगवतासंसारबंधहेतून्गुणान्व्याख्यायतेषामत्य
येनब्रह्मभावोमोक्षोऽज्ञानेनलभ्यतइत्युक्तं मांचयोऽव्यभिचा
रेणभक्तियोगेनसेवते सगुणान्समतीत्यैतान्ब्रह्मभूयायकल्पत
इति तत्रमनुष्यस्यतवकथंभक्तियोगेनब्रह्मभावइत्याशंकायां
स्वस्यब्रह्मरूपताज्ञापनायसूत्रभूतोयंश्लोकोभगवतोक्तः ब्र
ह्मणोहिप्रतिष्ठाहममृतस्याव्ययस्यच शाश्वतस्यचधर्मस्यसु
खस्यैकांतिकस्यचेत्यस्यसूत्रस्यवृत्तिस्थानीयः अयंपंचदशोध्या
यआरभ्यते भगवतः श्रीकृष्णस्यहितत्वंज्ञात्वातद्भजनेनसम्यगु
णानतीतःसन्ब्रह्मभावंकथमाप्नुयाल्लोकइति तत्रब्रह्मणोहिप्रति
ष्ठाहमित्यादिनाभगवद्वचनमाकर्ण्य ममतत्त्वामनुष्योयंकथ
मेवंवदतीतिविस्मयाविष्टमप्रतिभयाप्रज्ञयाचकिंचिदपिप्रष्टु
मशक्नुवंतमर्जुनमालक्ष्यकृपयास्वस्वरूपंविवक्षुः श्रीभगवानु
वाच तत्रविरक्तस्यैवसंसाराद्भगवत्तत्त्वज्ञानेधिकारोनान्यस्येति
पूर्वाध्यायोक्तंपरमेश्वराधीनप्रकृतिपुरुषसंयोगकार्यंसंसार
वृक्षरूपकल्पनयावर्णयतिवैराग्यायप्रशस्तेनगुणातीतोपाय
त्वात्तस्य ऊर्ध्वमूलमित्यूर्ध्वंकारणंस्वप्रकाशपरमानंदरूप
त्वेननित्यत्वेनचब्रह्म ऊर्ध्ववाऊर्ध्वंसर्वसंसारबाधेप्यबाधितं
सर्वसंसारभ्रमाधिष्ठानंब्रह्मतदेवमाययामूलमस्येतिऊर्ध्व
मूलं अधइत्यर्वाचीनाःकार्योपाधयोहिरण्यगर्भाद्याःगृह्यंते

तेनानादिकस्य हृतत्वाच्छाखाचेद्वशाखोऽश्वस्येत्यर्थः शाखेमा
श्वविनाशित्वेन न श्वोऽपि स्थाता इति विश्वासानर्हं अश्वत्थं मा
यामयं संसारवृक्षमव्ययमनाद्यंतदेहादिसंतानाश्रयमा
त्मज्ञानमंतरेणानुच्छेद्यमनंतमव्ययमाहुः श्रुतयः स्मृत
यश्च श्रुतयस्तावत् ऊर्ध्वमूलोऽर्वाक्शाख एषोऽश्वत्थः सना
तन इत्याद्याः कठवल्लीषु पठिताः अर्वाचो निकृष्टाः का
र्योपाधयो महदहंकारतन्मात्रादयो वा शाखाः अस्येत्यर्वा
क्शाख इत्यर्थः शाख एव पदं समानार्थं सनातन इत्यव्ययप
दसमानार्थं स्मृतयश्च अव्यक्तमूलप्रभवस्तस्यैवानुग्र
होत्थितः बुद्धिस्कंधमयश्चैव इंद्रियांतरकोटरः महाभू
तविशाखश्च विषयैः पत्रवांस्तथा धर्माधर्मसुपुष्पश्च सु
खदुःखफलोदयः आजीव्यः सर्वभूतानां ब्रह्मवृक्षः स
नातनः एतद्ब्रह्मवनं चैव ब्रह्माचरति साक्षिवत् एतच्छि
त्त्वा च भित्त्वा च ज्ञानेन परमासिना ततश्चात्मगतिं प्राप्य
तस्मान्नावर्तते पुनरित्यादयः अव्यक्तमव्याकृतं मायो
पाधिकं ब्रह्म तदेव मूलं कारणं तस्मात्प्रभवो यस्य स त
था तस्यैव मूलस्याव्यक्तस्यानुग्रहादतिदृढत्वादुत्थि
तः संवर्धितः वृक्षस्य हि शाखाः स्कंधादुद्भवंति संसार
स्य च बुद्धेः सकाशान्नानाविधाः परिणामा भवंति तेन
साधर्म्येण बुद्धिरेव स्कंधस्तन्मयस्तत्प्रचुरो यं इंद्रिया
णामंतराणि छिद्राण्येव कोटराणि यस्य स तथा म
हांति भूतान्याकाशादीनि पृथिव्यंतानि विविधाः शा
खा यस्य विशाखः स्तैर्भोग्यस्येति वा आजीव्यः उपजी
व्यः ब्रह्मणा परमात्मनाधिष्ठितो वृक्षो ब्रह्मवृक्षः आ
त्मज्ञानं विना छेत्तुमशक्यतया सनातनः एतद्ब्रह्म

गी॰
टी॰
प॰

6

वनमस्य ब्रह्मणो जीवरूपस्य भोगं वननीयं संभजनीयमिति वनं
ब्रह्मसाक्षिवदाचरति नत्वेतत्कृतेन लिप्यत इत्यर्थः एतद्ब्रह्म
वनं संसारवृक्षात्मकं छित्वा च भित्वा च अहं ब्रह्मास्मीत्यतिदृढ
ज्ञानखड्गेन समूलं निष्कृत्येत्यर्थः आत्मरूपां गतिं प्राप्य तस्मा
दात्मरूपान्मोक्षान्नावर्तत इत्यर्थः स्पष्टमितरत् अत्र च गंगातीरे
गच्छमानो गंगातीरतिर्यक्पतितमर्धोन्मूलितं मारुतेन म
हान्तमश्वत्थमुपमानीकृत्य जीवन्तमिदं रूपककल्पनेति द्रष्ट
व्यं तेन नोर्ध्वमूलत्वाधःशाखत्वाद्यनुपपत्तिः यस्य मायामय
स्याश्वत्थस्य छंदांसि छादनात्तत्ववस्तुप्रावरणात्संसारवृक्ष
रक्षणाद्वा कर्मकांडानि ऋग्यजुःसामलक्षणानि पर्णानी
व पर्णानि यथा वृक्षस्य परिरक्षणार्थानि पर्णानि भवंति त
था संसारवृक्षस्य परिरक्षणार्थानि कर्मकांडानि धर्माधर्मतद्धे
तुफलप्रकाशनार्थत्वात्तेषां यस्तं यथा व्याख्यातं समूलं संसार
वृक्षं मायामयमश्वत्थं वेद जानाति स वेदवित् कर्मब्रह्माख्यवे
दार्थवित्स एवेत्यर्थः संसारवृक्षस्य हि मूलं ब्रह्म हिरण्यगर्भा
दयश्च जीवाः शाखास्थानीयाः स च संसारवृक्षस्वरूपेण विनश्व
रः प्रवाहरूपेण चानंतः स च वेदोक्तैः कर्मभिः सेव्यते ब्रह्मज्ञा
नेन च च्छिद्यत इत्येतावानेव हि वेदार्थः यश्च वेदार्थवित्स एव

सर्ववित् इति समूलवृक्ष
ज्ञानं स्तौति स वे
दविदिति १ ॥

द्विविद्याकामायैर्ट्वनरहमूलैकपवितेफलैर्दुःखाकारैर्नितिंविउमजरंचांतिवह्नलं उर्मसे
सारवृक्षंविषमगतिमहंब्रह्मसुचि

शात्तमायत्याद्यप्रेरतिरनुदिनंनौमितमजंब्रह्मरंमायाकार्यंच
रमचरमश्वावचमिदंमहामायाशमप्तत्तरमपितदथ्यत्तमपि
ले विद्वानंदेयस्मिन्परमपुरुषेब्रह्मणिविभातमीशानेकृत्स
क्रुतिहृदयमीडेनवरतं पूर्वाध्यायगुणात्वंथहेतून्वक्ताहरिः
पुनः नेभ्यस्तत्वधियामोक्षंसामसंकोपेतिवावदत् १ भगवत्तत्व
विज्ञानेविरक्तस्याधिकारतः नान्यस्येत्यर्जुनंप्राहनिर्मितीकृत्य
केशवः ४ सर्वेषांप्राणिनांकर्मफलंज्ञानफलंविदो ईशायतमतः
सर्वैकृपास्योभगवान्हरिः मांचयोव्यभिचारेणेत्यतः संक्षेपक्रतवान्स्व
यं मद्भक्ताप्राप्तविज्ञानागुणातीताः परंपदं ६ प्रयांतीतिहरिः
प्रोच्यसम्यग्ज्ञानैकसाधनं वैराग्यंनत्तामनुत्पत्तिः सारासारविवेकता
न ७ अतस्तदर्थंसंसारस्वरूपंवक्तवाहयं विवदहेतुरूपेणसंसा
रेवर्णयत्यजः ८ ब्रह्मणोहिप्रतिष्ठेतिश्लोकःसूत्रात्मकस्ततः ह
निरूपणीयपतस्याध्यायआरभ्यतेधुना ९ सर्वभूतहितैषित्वाद्विशे
षादर्जुनप्रियः अपृष्टोपिस्वयंप्राहभगवान्सान्त्वनांपतिः १० वैरा
ग्यंतत्वविज्ञानसाधनंपुष्कलंमतं संसारादेहघनागारान्मुमुक्षोर्हि
निर्विद्यतव ११ तामिमौप्राहभगवान्वृत्तरूपकमादितः उत्कृष्टंका गा१
रणंब्रह्मस्वप्रकाशंचिदद्वयं १२ यद्यदोर्ध्वंसर्वसंसारबाधेपियदबा
धितं मायया सर्वसंसारभ्रमाधिष्ठानमद्वयं १३ ब्रह्ममूलंतदेवास्ये
मूर्द्धमूलस्तमीहशं अथोहिरण्यगर्भाद्याअर्वाचीनाउपाधयः १४
सर्वतः प्रहतत्वाच्छाखेवास्ययतोस्यते आशुनाशित्वयाप्यतवि
श्वासानर्हभावतः १५ सोपिप्रभातपर्यंतस्थानेयोग्यानवाप्यय
मायामयत्वमस्यास्येसंसारतरुमव्ययं १६ अनाद्यनंतदेहादिसंता
नाश्रयमानतं तत्वज्ञानविनोछेद्याभावाडस्तमव्ययं १७ उर्ध्वमू गा२
लोवाकूशाखिपषोप्यस्य सनातनः इत्याद्याः श्रुतयस्त्वहन्यस्तन
योपिसहस्रपाः १८ अव्यक्तमूलप्रभवस्तस्यैवानुग्रहोच्छ्रितः
बुद्धिस्कंधमयश्चैवइंद्रियांतरकोटरः १९ महाभूतविशाखश्च

विषयैः पत्रवांस्तथा धर्माधर्मसपुष्पश्च सुखदुःखफलोदयः २०
आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः एतद्ब्रह्मवनं चैव ब्रह्मा
चरति साक्षिवत् २१ एतच्छित्त्वा च भित्त्वा च ज्ञानेन परमासिना त
तश्चात्मगतिं प्राप्य तस्मान्नावर्तते पुनः २२ मायोपाधिकमव्यक्तंमू
लं तस्मात्समुद्भवः यस्य संसारवृक्षस्येत्यर्थः स्मृत यः स्मृताः २३
वृक्षरूपकविन्यासे उपमेयं विवक्षिता श्रीमद्भगवतेरेभेयत्स्वयमात्म
त्तदमहान् २४ ततोरेतुतनेव्यंतवाउतोन्मूलितो बलात् तिर्यक्
पतितो जीवनशाखापत्रादिभिर्हतः तमेवोपमानीकृत्य स्वस्य जी
वतमलते पुराणेव कृतो गीता विषये रूपककल्पना २६ तेनोर्द्ध
मूलभावादेर्नानुपपत्तिरेवापि यस्मान्मायामयस्यास्य स्वस्य स्यावा
दनात्मरोः २७ तत्त्वप्रावरणाच्छदा संसारतरुलक्षणात् छंदांसि कर्म
कांडानि पर्णानीव भवंति वै २८ यथा वृक्षस्य पर्णानि रक्षणाय
निसंस्थित तथा संसारवृक्षस्य कर्मकांडानि सर्वतः २९ अत एव तः सा
मरूपाणि रक्षणार्थानि संत्यपि धर्माधर्मादितद्धेतुफलभासका
नायतः ३० छेदसामर्थ्यितस्मात्तत्र्याणं त्वतत्वदर्शिनं मायामयं तम
श्वत्थं यथाख्यात्वानमेव यः ३१ समूलमभिजानाति शास्त्रतो गुरुतः
स्वतः कर्मब्रह्मात्मवेदार्थविन्स एवास्ति वेदवित् मूलं संसारवृ
क्षस्य शुद्धं ब्रह्म स्वमायया शाखा हिरण्यगर्भाद्या जीवाः संति सह
स्रशः स च संसारवृक्षोस्ति स्वरूपेण विनश्वरः प्रवाहरूपेण तथा
नाद्यनंतनयाव्ययः ३४ वेदोक्तैः कर्मभिर्जीवैः सेव्यते स च सर्वदा
छिद्यते ब्रह्मबोधेन साक्षात्कारात्मना स च ३५ इत्येतावान्हि वेदा
र्थः संगृहीतो यथार्थतः न संसारतरोरस्मात्समूलादागमार्थतः
३६ ते योगमात्रेणप्यमोर्त्ति सवशिष्टोनपवाहि समूलं वेत्ति संसार
वृक्षं यः स च वेदवित् ३७ यश्च वेदार्थविज्ञातः स एवास्तीह सर्ववित्तत
इत्थं समूलवृक्षस्य ज्ञानेनैतीति हरिः स्वयं १

पूर्वाध्यायांते सुखस्यैकांतिकस्य प्रतिष्ठा परा काष्ठाहमित्युक्तं तत्र कि
लक्षणं तत्सुखं केन वा प्राप्तं केन वा साधनेनास्यावरणभंगः केन
वाधिकारिणा तत्प्राप्यमित्यादि वर्णयितुं पंचदशोध्याय आरभ्यते
ऊर्ध्वमूलमिति आनंदघनदेवः खल्विमानि भूतानि जायंत इति श्रुति
प्रसिद्धं मानुषानंदमारभ्योत्तरोत्तरशतगुणविवृद्धानंदसोपानपं
क्तेरुपरिस्थितं परमानंदाह्वयं वस्तु ऊर्ध्वं न देवमूलं मूलकारणम
स्य संसाराश्वत्थस्य तमूर्ध्वमूलं अधःशाखं ऊर्ध्वादधोधः सोपान
स्थानीयाः शाखा इव शाखाः अव्यक्तमहदहंकारपंचतन्मात्राषोड
शविकारहिरण्यगर्भविराट्प्रजापतिस्वर्गगंधर्वासुरनरतिर्यक्
स्थावररूपा यस्य सोधःशाखस्तं न श्वोपि स्थातेत्यश्वत्थः तत्वाद
श्वत्थं संसारवृक्षं तथापि अव्ययं मूढानां अनाद्यनंतं प्राहुर्वेदाः ऊ
र्ध्वमूलोऽवाक्शाख एषोश्वत्थः सनातन इत्यादयः छंदांसि वेदा
स्तद्रूपलक्षिता यज्ञादयः तएव पर्णानि संचाननवत् शोभाहेतवो यस्य
तरोस्तमश्वत्थं यो वेद मिथ्यात्वेन स एव वेदवित् विदितवेद्यस्तत्व
र्थः अत्राश्वत्थरूपकेण संसारो वर्ण्यते ॥१॥

निपर्णं

आनंदीटीका ॥

पूर्वाध्यायान्ते ऐकान्तिकस्य सुखस्य प्रतिष्ठाहमिति यदुक्तं तत्सु
खं संसारोच्छेदादेव सुलभमिति तदुच्छेदाय देवदेवस्तत्संयोगा
त्मके संसारेश्वत्थत्वमारोपयन् श्रीभगवानुवाच ऊर्जि
हीनं प्रथममेवोच्छूनिकाले प्रतिना विश्वकरणाय निश्चुत्य
मायया परस्वरूपात्पुरुषप्रकृतिसंज्ञा पारमेश्वरी शक्तिः प्रधान
तत्वं मूलं यस्य तनम् तथाऽधः प्रकृतेरर्वाचीनाः शाखाः शेते यु
ध्यपञ्चादिकमत्रेति व्युत्पत्त्या प्रसवधर्मिणः महदादयः सप्त
प्रकृतिविकृतयो यस्य तम् अश्वत्थं न श्वस्तिष्ठतीति व्युत्पत्त्यपेक्ष
या नानात्वेन परिणामात्मविकारं संसारपर्यायं संगीत्रमव्ययमव्ययः प्र

तिनिवर्त्तनं तद्धीनं सदा संसरणशीलं कपिलादय आहुः यस्य संसारा
श्वत्थस्य छंदांसि वेदाः तत्त्वाध्यवसायलक्षणाया धर्माधर्मज्ञानाज्ञा
नविरागाविरागैश्वर्यानैश्वर्यरूपाः महत्तत्त्वपर्यायाः बुद्धेः धर्माः
पत्राणि पुण्यफलरूपाणां विषयाणां कारणानि भोगस्थानानि च
भवंति तमीदृशं संसाराश्वत्थं यो वेद स एव वेदार्थविदित्यर्थः १

रामकंठटीका १५

एवं त्रयोदशाध्याये स्थूलदृष्ट्या भूतप्रकृतेर्भेदः परमात्मि देहत्वे
नेतोक्तः चतुर्दशेन तु सूक्ष्मदृष्ट्या गुणपरमार्थतया तस्यास्तदतिक्र
मेण विशेषतो ब्रह्मभावप्राप्तिरुपदिष्टा इदानीं भुवनसंतानभा
वेन परिणतायास्तस्या निर्भेदप्रतिपादनक्रमेण पुनस्तादृति
पदप्राप्तिं प्रतिपादयितुं भगवानुवाच प्रतिपाद्यमानविशेषणस्या
धर्मादेरश्वत्थवदध्यवसायेन नानाभुवनसंतानरूपः संसारप्र
पंचो विवर्त्तितः तमश्वत्थमेवंविधमाहुः परावरद्रष्टारः कथयं
ति कीदृशमूर्ध्वमूलं वकुलप्रपंचस्यापि भुवनसन्तानस्य केवलं
भोगभूमिकर्मभूमिभेदेन संग्रहाद्द्विप्रकारत्वे सति भोगभूमिरूपो
भाग ऊर्ध्वशब्देनोक्तः भोगस्य फलत्वात्फलस्य च प्राधान्यान्मूल
शब्देन चाविद्यादिक्लेशजालमूलकम् तस्मिन् हि सति भोगभूम्यात्म
ना देवत्वान्मतिप्रकृतिर्विपरिणमते अन्यच्च कीदृशं तमधःशा
खं अधःशब्देन कर्मभूम्यात्मको भाग उच्यते तेन पुनरारोहस्याधि
करणत्वादधो विषयत्वेनोक्तः कर्मभूमय एव शाखाः इत्यमधः
शाखा यस्य तं तथाविधं यतः सत्त्वोत्कर्षेण पुण्यभाग्भूमभोगाधिक
रणभूतेभ्यो भुवनेभ्यः देवत्वानां पुनः कर्मभूमौ निपतनमवश्य
मेव स्थितं यदुक्तं आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोर्ज्जुनेति अ
न्यच्च कीदृशमव्ययमनंतत्वात्परमेश्वरमायाव्यापितानां देव
त्वानां गमागमानिवृत्तेः तान्यतितथास्य परिणमतः प्रवाहनित्य

त्वेनाविद्यमानत्वयतं अश्वत्थं कीदृशं यस्य छंदांसि वेदाः पर्णानि प
त्राणि विप्रकं भवति वेदसमग्रवत्वानानितानि कर्माणि छन्दः
शाद्वेनोक्तानि तान्येव नाटकपरिणामावधिभूतत्वात्पर्णत्वेनाध्यव
सितानि यस्य तमेवंविधमेनं क्लेशप्रभवत्रयीनियमितकर्मफ
लभूतभोगाधिकरणात्मकं भुवनसंतानरूपमूर्ध्वमूलत्वादिनासा
दृश्यादश्वत्थं यो वेद वेद्यत्वेन वेदरूपाद्युतिरिक्तं जानाति स वेदार्थ
वित् तत्वज्ञस्तस्मिन्ममत्वादिग्रहेणनिमग्नमना इत्यर्थः [illegible]

[illegible] ॥ १ ॥

ॐ एवं त्रयोदशेऽध्याये सक्षृद्वाच्यं सविस्तरमुपवर्ण्य तदवांतरदशाभू
तां सिद्धभूमिकां चतुर्दशेऽध्याये व्याख्याय अथ नामक्षस्य व्याख्यान
रभूतमैश्वरं रूपमत्रैव देहे उपासनार्थं प्रत्यभिज्ञानार्थं च प्रतिपादयि
तं पुरुषोत्तमयोगाख्यः पंचदशोऽध्याय आरभ्यते तत्रेश्वरस्याश्वत्थेन
सह रूपकानि शुप्रसिद्धेन रूपकालंकारेण तद्वैतन्यपवर्णयितुं श्रीभग
वानुवाच ऊर्ध्वं सर्वोत्कृष्टमनंतमंत्रत्वात्तमेवं मूलं यस्य तम् तथाधःशा
खमधः स्वस्वरूपानिकृष्टाः शाखा जीवा यस्य तम् ईश्वरापेक्षया जीवा
नां परतंत्रत्वतया परिछिन्नतया विनाशयोगितया च निकृष्टत्वात् अव्य
यं नित्यमश्वत्थं व्यापकतया स्थायित्वतया चाश्वत्थमीश्वरं प्राहुः श्रुतयः
तथा च श्रुतिः ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः तदेव
शुक्रं तद्ब्रह्म तदु नात्येति कश्चनेत्याद्याः यस्येश्वरस्य वेदाः पर्णानि
यथा हि पर्णैर्वृक्षस्य महत्त्वफलवत्त्वरसत्वादयः सूच्यन्ते एवं वेदै
रीश्वरस्य माहात्म्यं सूच्यते अतः पर्णस्थानीयानि छंदांसि यस्तं ईश्व
रं वेद स वेदवित् तेनैव वेदार्थः सम्यग्ज्ञातः [illegible] १ ॥

यस्मान्मदधीनं ज्ञानिनां कर्मिणां च ज्ञानफलं कर्मफलं च अतो ये मां भक्तियोगेन सेवन्ते मत्प्रसादात् ज्ञानप्राप्ति क्रमेण गुणातीता मोक्षं लभन्ते परमात्मतत्त्वसम्यग्ज्ञानं ततो मोक्षं लभन्ते इत्यत्र किं वक्तव्यं इत्याशयवान् तज्ज्ञानेनाधृष्टमपि च पंचदशाध्याये परमात्मतत्त्वं दिदर्शयिषुः विरक्तस्य तज्ज्ञानाधिकारिणो वैराग्यजननार्थं प्रथमं तावत्सार्धश्लोकाभ्यां संसारस्वरूपं वृक्षरूपकालंकारेण दर्शयन्नाह ऊर्ध्वमूलमिति ऊर्ध्वं उपरिकाले वर्तमानं अथवा सूक्ष्मत्वात्कारणत्वान्नित्यत्वान्महत्त्वाच्चोर्ध्व

गी॰
पं॰ टी॰

९

पैठोले टीका

मनुष्यकृष्टमव्याकृतं ब्रह्म मूलं कारणं यस्येति तं ऊर्ध्वमूलं संसारवृक्षं अधःशाखं महदहंकारपंचतन्मात्राणि पंचमहाभूतानि एकादशेंद्रियाणि एवं त्रयोविंशति प्रकृतिविकाराः अस्य संसारवृक्षस्य शाखा इव मूलकारणापेक्षया अर्वाग्भूतानि कृष्टावर्तिनि शाखा यस्य सम्तं अधःशाखं अश्वत्थं श्वोपि न स्थातारिति ध्वंसी तमश्वत्थं अव्ययं कारणप्रवाहानादित्वात् ब्रह्मज्ञानपर्यंतम संतानुच्छेदात् देहादिसंतानस्य नष्टव्ययं छंदांसि यस्य ऋग्यजुःसामाथर्वणलक्षणानि वेदाः यस्य संसारवृक्षस्य पर्णानीव धर्माधर्मतद्धेतुफलप्रकाशनार्थत्वात् संसारवृक्षं परिरक्षंति पर्णानि यथा तं समूलं संसारवृक्षं वेद स वेदवित् नहि संसारवृक्षान्यज्ज्ञातव्यं विद्यते सर्वेरक १

सर्वार्थसिद्धिदायिनी॥

श्रीकार्तवीर्यार्जुनाय नमः। जंबूकाश्मीरतेर्धज्ञान्तरलवीरस्य रचितः करोमि टीकामध्याये भूयः पंचदशोमता। पूर्वाध्याये गुणत्रयस्य बंधहेतुत्वमभिधाय मां च योऽव्यभिचारेण भक्तियोगेन सेवते इत्यनेन श्लोकेन मद्भक्तिलक्षणेन स्ववर्णाश्रमानुरूपधर्माचरणेन पुरुषस्य गुणातीतत्वं भवतीति प्रतिपादितं तस्य च स्वजात्युचितधर्मस्य स्वरूपज्ञाने सति हेयोपादेयता निश्चीयते अतिधर्मस्य मूलं यत् वेदरूपमश्वपादयतात्मस्य रूपकालंकारेणाह तत्त्ववर्णयं श्रीभगवानुवाचोर्ध्वमूलमिति ऊर्ध्वं सर्वोपरि वर्तमानं परमेश्वराख्यं तत्त्वं तदेव मूलमिव मूलं उत्पत्तिकारणं यस्य यत् वेदवृक्षस्य तमूर्ध्वमूलं सर्वासां विद्यानां तस्मादेव सर्वज्ञात् उत्पत्तिश्रवणात् हि वेदस्यादि

भाषा अनुवाद

वैराग्यके विना ज्ञान औ भक्ति दुर्लभ है इस लिये पंद्रहे अध्याय
मे भगवान वैराग्य सहित ज्ञान काउपदेश अर्जुन को दिया है
औ पूर्व चौदहें अध्यायके अन्तमे जो कहा कि मां च योऽव्यभि
चारेण भक्तियोगेन सेवते इत्यादि छब्बिशयें श्लोकादिसे कि
एकान्त भक्तिसे परमेश्वरका भजनकारी मनुष्यभगवतकी
कृपासे ज्ञान लाभके द्वारा मुक्त होता है सो विषयों से विराग
रहित पुरुष को एकान्त भक्ति अथवा ज्ञान होता नहीं इसी
हेतु से वैराग्य कथन पूर्वक ज्ञान उपदेश करनेके मनोरथ
से प्रथम ऊर्ध्व श्लोककरिके संसारस्वरूपको वृक्षरूप रूप
क अलङ्कारसे वर्णन करते हुये भगवान श्रीकृष्ण अर्जु
नसे कहते हैंकि ऊर्ध्वमूल कहे उत्तम अर्थात क्षर अक्षर से भी
ऊ उत्कृष्ट जो पुरुषोत्तम परमेश्वर सो संसारके मूल कारण हैं इ
सीसे संसार ऊर्ध्वमूल है और अधःशाख कहे परमेश्वर की
अपेक्षा अधः अर्थात कार्यरूप उपाधि युक्त हिरण्यगर्भ आ
दि जो संसार की शाखा स्वरूप सोई संसार को अधःशाख क
हा और यह संसार विनश्वर है तसे परदिन प्रभात लों रहैगा
ऐसी विश्वास के योग्य नही है इस से अश्वत्थ कहा और अट
यें अध्यायके उनीशवें श्लोक की उक्त अभिप्राय से यह संसार
प्रलय के अनन्तर पुनः पुनः उत्पन्न होता है तो होनाजाना इस
हेरफेर लगे रहनेसे धारावाहिक वृत्तिरूप इस संसार का
विच्छेद नही हैअर्थात सदाही बना रहता इससे अव्यय औ
अनादि भी है और ऐसे ही श्रुतियों मे भी कहा है औरछन्द
कहे वेद सकल इस संसार वृक्षके पत्र हैं अर्थात धर्म्म अध
र्मका प्रतिपादन करिके छायाके तुल्य हैं और कर्म्मफलके
हेतु संसार वृक्षके आश्रित जीव समूह है यह कहते हुये वे
द पत्र समान हैं जो मनुष्य ऐसे करके संसार वृक्ष अश्वत्थरू

श्री·
गी· टी·
पं·

प को जानते हैं सोई वेदके अर्थवित हैं तात्पर्य यह कि प्रपंचरूपसं
सार वृक्ष के मूल परमेश्वर और परमेश्वर के अंश स्वरूप जो ब्र
ह्मादिक सो सब शाखा समान हैं सोई वृक्ष विनश्वर औ प्रवाह
रूपसे नित्य भी है और वेद विहित कर्मोंके द्वारा संसार वृक्षको
सेवा करना भीकहा है इतनही वेदों का निश्चित अर्थ है इस
से इस वृक्षके ज्ञानी को वेदवित कहना चाहिये १

10

दोहा

ऊर्ध्वहिमूल शाखाअधकह पीपल अव्ययसोय वेदहि
जाके पत्रहे जोजाने वेदवितहोय १॥

पारम्पर्योपदेशद्वारेण तस्मादेवोपदेष्टृत्वेन वेदस्य प्रवर्तकत्वा
च्छाखाः शाखमिति तस्मात्प्रथमोपदेष्टुः परमेश्वरादर्वा-
चीनोऽपदेशत्वेन निकृष्टा विवस्वन्मनुप्रभृतयो नानादिक्त्व
प्रसारकत्वात् कार्योपचारेण शाखा इव शाखा यस्य तम
धःशाखं तथाश्वत्थमिवाश्वत्थं पूज्यतमं तथाप्याश्वत्थः शुभा
दिकामनयाऽपूजितः सर्वान्कामान्प्रयच्छतीति एवं यजुर्वेद-
विधापूजिताद्धेममास्फालिता तांज्ञानेहिकात्राज्यभोगा
दीन्कामानामुष्मिकांश्च स्वर्गभोगादीन्कामान्प्रयच्छतीति अत
एवाव्ययमविनाशि परमकारणभूतत्वादव्ययमविनश्वरं
नित्यमिति यावत् यद्वाऽनादेः परमेश्वरादारभ्याद्य यावत्स
र्वैः संघमिलितत्वादव्ययं प्रवाहरूपेणानवच्छिन्नमित्यर्थः छं
दांसीति छंदयते संब्रियते अश्वादिभिरिति छंदांसि छंदि
धातोरौणादिकेसिरूपं छंदांसि कवचाख्येणाभावदत्वेन स
माश्रितजनस्वरक्षकत्वेन पर्णानीव पर्णानि यथा पर्णा
नि वृक्षं भूषयंति छायया च समाश्रितजनमुपकुर्वंति एवं
कवचाद्यनुर्वेदशाखिरां पुरुषं युद्धे परत्रकृतशत्रवत्रणे
नोपकुर्वंतीति तमेवंभूतं यजुर्वेदवृक्षं वेद जानाति स एव
वेदवित्तस्य यजुर्वेदवृक्षस्य तत्त्वविदिति कथ्यते १॥

मधुनाश्च

संसारस्वरूपमेतद्द्योपायविज्ञानमात्यस्मिन्नध्यायेदर्शयति
ऊर्ध्वोविस्तृ ऊर्ध्वपवित्रोवाजिनीवस्वमृतमस्मिद्धविनस
र्वथमिति हि श्रुतिः ऊर्ध्वमुत्तमः सर्वतः श्रेयोनिकृ
ष्टपाशाश्चभूतानि सोऽप्येकप्रकारेणातिष्ठतीत्यश्वत्थः त
थापि नश्वत्वादश्वत्थः पूर्वं श्वः कालपर्यंतं तिष्ठति तथा सर्व
थापि नित्यत्वाद्व्ययितो फलेकारणत्वाच्छंदसापर्णत्वं नहिक

द्वाविदप्यज्ञाते परलोकफलोत्पत्तिः अव्यक्तेपि सूक्ष्मरूपेणा
सतिस्त्रस्त्रीपादेवभूतानीत्यधश्चोर्ध्वंचप्रसृताः गुणैः सत्वा
दिभिः प्रतीतिमात्रस्वरूपत्वात्प्रवालं विषयाः मूलानि भग
वद्रूपादीनि भगवान्नायिकर्मानुबंधेन द्विफलं ददातीति ॥
तथाच भाल्लवेयशाखायां ब्रह्मवाक्यस्य स्वमूलं प्रकृ
तिः समूलं सत्वादयोर्वाचीनमूलं भूतानि शाखाः छंद
सि पत्राणि देवनरतिर्यंचश्च शाखाः पत्रेभ्यो द्विफलं जा
यते भावाभिफः भुक्तिः फलमभुक्तिश्च फलं मोक्षोर
सोऽमोक्षोरसः अव्यक्ते च शाखाव्यक्ते च शाखाः अव्यक्ते
च मूलं व्यक्ते च मूलं एषा ह्यस्यां गुणा लोलपत्रो नक्षीयते
नक्षीयते नक्षेष कदाचनान्यथा जायते नान्यथा जायत
इति यथास्थितस्तथा नोपलभ्यते अनादिर्विभुः त्वमा
दिरंतो जगतोऽस्य मध्यमिति भागवते अनाद्यंतं परं ब्रह्म
न देवा नर्षयो विदुरिति मोक्षधर्मे असंगशस्त्रेण सगरा
द्वित्यस्य दृढेन ज्ञानेन ज्ञानासिनोपासनया शितेनेति
भागवते छेदश्चविमर्शापत्र न तस्य तत्त्वस्यैवाबंधकं भव
ति तथाहि मूलस्य ब्रह्म प्रतीयते तथोक्तं तस्मात्तावेव वि
मर्शीयस्य छेदः तत्र न भातिवान्यानीति तेदर्शवत्तमेव
प्रपद्ये प्रपद्यते तथोक्तं तत्रैव तं वै प्रपद्यतेयं वै प्रपद्यत
ऽयोवतिन हृष्यति नजायते नम्रियते तद्धस्त मूलं तच्छिन्न
विति नारायणो न दृष्टस्तु प्रतिबुद्धो भवेत्पुमान् इतिमोक्ष
धर्मे छेदनोपायोऽसंगाकांक्षितः नचभगवतोऽन्यः पारोऽ
स्ति साधनांतरमाह ९॥

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके २ ॥

शांकरभाष्य टीका २

नहि संसारवृक्षादस्मात् समूलात् ज्ञेयोऽणुमात्रोऽप्यवशिष्टोऽस्ति अतः सर्वज्ञः स यो वेद स वेदार्थविदिति यस्मात् संसारवृक्षे समूले स वृत्ते ये अन्तर्भवन्तीति तस्मात् समूलवृक्षज्ञाने सोऽपीति तस्यैव संसारवृक्षस्यापरावयवव्यापारकल्पनोच्यते अधो मनुष्यादिभ्यो यावत् स्थावरमूर्ध्वं च यावद्ब्रह्मा विश्वसृजो धर्म इत्येतदन्तं यथा कर्म यथाश्रुतं ज्ञानकर्मफलानि तस्य वृक्षस्य शाखा इव शाखाः प्रसृताः प्रगता गुणप्रवृद्धाः गुणैः सत्त्वरजस्तमोभिः प्रवृद्धाः स्थूलीकृता उपादानभूतैर्विषयप्रवालाः विषयाः शब्दादयः प्रवाला इव देहादिकर्मफलेभ्यः शाखाभ्यः अङ्कुरीभवन्तीव तेन विषयप्रवालाः शाखाः संसारवृक्षस्य परममूलमुपादानं पूर्वमुक्तमथेदानीं कर्मफलजनितरागद्वेषादिवासना मूलानीव धर्माधर्मप्रवृत्तिकारणान्यवान्तरभावीनि तान्यधश्च देहाद्यपेक्षया मूलान्यनुसंततानि अनुप्रविष्टानि कर्मानुबन्धीनि कर्म धर्माधर्मलक्षणमनुबन्धः पश्चाद्भावी येषामुद्भूतिमनुभवन्तीति तानि कर्मानुबन्धीनि मनुष्यलोके विशेषतः नहि मनुष्याणां धर्माधिकारः प्रसिद्धः २

आनंदगिरिकृत टीका २

समूलसंसारवृक्षज्ञाने तु फले हित्वा मूलमेव निःकृष्य ज्ञातं शक्यमिति तत्तत्त्वार्थं प्रयतितव्यमिति मत्वा तत्त्वज्ञानस्तुतिरत्र विवक्षितेत्याह नहीति अवयवसम्बन्धिनापरा प्रगुणादतिरिक्ता कल्पना इति यावत् आमनुष्यलोकादाविरिञ्चेरित्यधः शब्दार्थमाह मनुष्यादिभ्य इति तस्मादेवारभ्या सत्यलोकादित्यूर्ध्वशब्दार्थमाह यावदि

श्री·
गी·टी·
प·

१५

ति शाखाशब्दार्थं दर्शयति ज्ञानेति तेषां हेत्वनुगुणत्वेन बहुविधत्वं
सूचयति यथेति प्रसृतानां शब्दादिविषयाणां प्रवालत्वं शाखास्व
पल्लववत्वे अङ्कुरत्वं स्फोरयति देहादीति ऊर्ध्वमूलमित्यत्र संसारवृक्ष
स्य मूलमुक्तं किमिदानीमधश्चमूलानीत्युच्यते तत्राह संसारेति
अनुप्रविष्टत्वं सर्वेषु लिङ्गेष्वनुगततया सन्ततत्वमविच्छिन्नत्वं रा
गादीनाञ्च कर्मफलजन्यत्वं प्रकटयति कर्म्मेति कर्मणां रागा
दीनां मिथो हेतुहेतुमत्त्वं तेषां तथात्वेनानवच्छिन्नतया प्रवृत्तिः
विशेषतो मनुष्यलोके भवतीत्यत्र हेतुमाह अत्र हीति कर्मस्व
त्वता प्राणिनिकायो लोकः मनुष्यश्चासौ लोकश्चेत्यधिकृतो ब्राह्म
णादिविशिष्टो देहो मनुष्यलोकः २

स्वामिकृत टीका ३

किं च अधश्चेति हिरण्यगर्भादयः कार्योपाधयो जीवाः शाखास्था
नीयत्वेनोक्ताः तेषु च ये दुष्कृतिनः ते पश्वादियोनिषु प्रसृता विस्ता
रं गताः सुकृतिन ऊर्ध्वं देवादियोनिषु प्रसृतास्तस्य संसारवृक्षस्य
शाखाः किं च गुणैः सत्वादिवृत्तिभिर्जलसेचनैरिव यथायथं प्र
वृद्धा वृद्धिं प्राप्ताः किं च विषयानूपादयः प्रवालाः पल्लवस्थानी
यायासां ताः शाखास्थानीयाभिरिन्द्रियवृत्तिभिः संयुक्तत्वात् किं चा
धश्चेति च शाखा न ऊर्ध्वं च मूलान्यनुसन्ततानि विरूढानि मुख्यं मूल
मीश्वर एक एव इमानि त्ववान्तरमूलानि तत्तद्भोगवासनालक्षणानि
तेषां कार्यमाह मनुष्यलोके कर्मानुबन्धीनि कर्मानुबन्धः अनन्तर
भावी येषां तानि ऊर्ध्वाधोलोकेषूपभुक्तयत्ततद्भोगवासनाभिर्हि
कर्मक्षये मनुष्यलोकं प्राप्तानां तत्तदनुरूपेषु कर्मसु प्रवृत्तिर्भवति
अस्मिन्नेवहि कर्माधिकारः नान्येषु लोकेषु अतो मनुष्यलोक इत्युक्तम्
२

पिशाचभाषा टीका ४

अस्याश्वत्थस्य महल्लोकप्रभृतिषु ऊर्ध्वं जनलोकप्रसृताः गतास्तस्य शा
खाः कर्मज्ञानवासनानुरूपाः शरीरेन्द्रियविषयाः कर्मफलभूताः

गुणप्रवृद्धाः गुणैः सत्त्वरजस्तमोभिरुपादानकारणभूतैः प्रवृद्धाः
विषयप्रवालाः विषयाः शब्दस्पर्शरूपरसगंधाः प्रवालाश्च यस्याः
शाखानानाश्च स्वस्य महतो वृक्षस्य तिमूलानि निहितधर्माणि त
दुपकरणानि च अनुसंततानि अवस्तनानि कर्मानुबंधीनि कर्म
णोमितानि मनुष्यलोकस्य ग्रहणमुपलक्षणार्थं २

रामानुजभाष्य टीका ५

अधेति तस्य मनुष्यादिशाखस्य वृक्षस्य तत्कर्मकृता अपरा ऊर्ध्वं च
शाखाः पुनरपि मनुष्यपश्वादिरूपेण प्रसृता भवंति ऊर्ध्वं च गंध
र्वयक्षदेवादिरूपेण प्रसृता भवंतिता अश्च गुणप्रवृद्धाः गुणैः सत्त्वा
दिभिः प्रवृद्धाः विषयप्रवालाः शब्दादिविषयपल्लवाः कथमि
त्याह अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके ब्र
ह्मलोकमूलस्यास्य वृक्षस्य मनुष्याग्रस्य अधो मनुष्यलोके च मूला
न्यनुसंततानि च कर्मानुबंधीनि कर्माण्येवानुबंधीनि [illegible] मूला
न्यधो मनुष्यलोके च भवंतीत्यर्थः मनुष्यत्वावस्थायां कृतैर्हि
कर्मभिरधो मनुष्यपश्वादय ऊर्ध्वं च देवादयो भवंति २

अभिनवगुप्तकृत टीका ९

स्पष्टार्थं २ ॥ ॥

परमार्थप्रपा टीका ७

अथास्य शाखादिविस्तारमाह अधश्चोर्ध्वमिति अधो देवपितृमनु ३॰
ष्यलोकाद्याः ऊर्ध्वं महर्जनतपोलोकमुखाः प्रसृताः विस्तृताः संति
किंभूताः गुणप्रवृद्धाः यथायोग्यं सत्त्वरजस्तमोभिर्जलसेकादिभि ४॰
रिव प्रवृद्धाः वृद्धिं प्राप्ताः तथा विषयाः रूपरसादयः पत्रप्रवालाः
पल्लवाश्च प्रसृताः संति अधः पाताले मूलानि यद्वा रताः सि अनुसं
कृ॰ ततानि सम्यक् प्ररूढानि विस्तृतानि मनुष्यलोके तत्कर्मानुबंधी
नि कर्माधीनानि तेषामेव कर्माधिकारित्वात् मनुष्यलोके क
र्मकृत्वेतरलोकेषु तत्फलं भुंजंत इत्यर्थः २

वनमाली टीका ८

तस्यैव वृक्षस्यावयवसंबंधित्वप्रकल्पनोच्यते अधश्चेति तस्य
जगद्वृक्षस्य शाखाः शाखावच्छाखास्थानीयानि पंचभूतानि
अधोनिकृष्टमूर्द्धमुन्नतकार्यं च प्रसृतास्तदुभयत्रस्थिताः जगद्वृ
क्षस्य शाखारूपाणि भूतानि स्वकार्यशरीरादौ स्वकारणे प्रकृत्या
दौ च सूक्ष्मरूपेण संतीति भावः कीदृश्यः शाखाः गुणैः सत्वादि
भिरर्वाचीनमूलरूपैः प्रवृद्धाः लोकेऽप्यर्वाचीनमूलैः शाखानां वृ
द्धिर्भवति विषयाः शब्दाद्याः प्रवालाः पल्लवरूपा यासां ताः
प्रतीतिसुखहेतुत्वाद्विषयाणां पल्लवसाम्यं अधश्चानुसंतता
निव्याप्तानि मूलानि तानि च कर्मानुबंधीनि कर्म वानुबंधस्वरम
कारणांतर्भूतानि सर्वस्य कर्मापेक्षया प्रवृत्तत्वात् ईश्वरस्यापि
कर्मापेक्षया फलप्रदत्वात् अस्य वृक्षस्य स्वरूपं मनुष्यैस्तथा नोप
लभ्यत इत्युत्तरेणान्वयः यद्वा जीवाः सानुशयाः शाखाः तत्र दुः
कृतिनोऽधः पश्वादियोनिषु प्रसृता विस्तारेण गताः सुकृतिन ऊर्द्धं
देवादियोनिषु प्रसृताः अधो मनुष्यत्वादारभ्याऽऽवीच्यपर्यंतं ऊर्द्ध
मनुष्यत्वादारभ्य सत्यलोकपर्यंतं प्रसृता जगद्वृक्षस्य शाखाः
कीदृश्यो गुणैः सत्वादिभिर्देहादिरूपेण परिणतैर्जलसेचनैरि
व प्रवृद्धाः किंच विषयाः शब्दाद्याः प्रवालाः शाखाग्रस्थानीया याभि
रिंद्रियवृत्तिभिः सह संबंधाद्धानाधिष्ठानत्वाच्च पल्लवाश्च पल्लवा
यासां संसारवृक्षशाखानां तथा अधश्च मूलान्यवांतराणि त
द्भोगजनितरागद्वेषादिवासनानि मूलानीव धर्माधर्मप्रवृत्ति
कारणानि तस्य जगद्वृक्षस्यानुसंततानि अनुस्यूतानि मुख्ये
मूले विश्वचित्यवृक्षत्वादिकमेवेति न दोषः कीदृशान्यवांतर
मूलानि कर्म धर्माधर्मलक्षणमनुबंधं पश्चाज्जनयितुं शीलं ये
षां तानि कर्मानुबंधीनि क्व मनुष्यलोके मनुष्याणां हि कर्मा
धिकारः प्रसिद्धः २

ऊसमवैनयवीटीका १

किंच अधश्चोर्द्धमिति तस्योक्तलक्षणस्य संसाराख्यवृक्षस्य शा

खा अधः प्रसृताः पापकर्मभिः मनुष्यपशुपतितिर्यगादियो
निषु विस्तृताः च पुनः ऊर्द्धं पुण्यकर्मभिः देवगंधर्वादि
किन्नरपक्ष्यादियोनिषु विस्तृताः कीदृश्यः शाखा गुणप्र
वृद्धाः गुणैस्सत्वरजस्तमोवृत्तिरूपैः संवृद्धाः जलसे
कैरिव स्थौल्यदैर्घ्यादिभाजः पुनः कीदृश्यः विषयप्रवा
लाः विषयाः शब्दस्पर्शरूपरसगंधाः प्रवालाः नवपल्ल
वा यासां ता स्तथा शब्दादिविषयाणां शाखाग्रस्थानीयाभिः
श्रोत्रत्वक्चक्षूरसनघ्राणवृत्तिभिर्योगाद्रागद्वेषाधिष्ठा
नत्वात्पल्लवस्थानीयत्वं भवतीत्यर्थः तस्य ब्रह्मलोक
मूलस्य मनुष्याग्रस्याश्वत्थस्य तस्याधश्च शाखाद्यूर्ध्वं वा
वांतराणि न्यग्रोधस्येव जटोपजटावृंदानि तत्तद्भोगज
नितरागद्वेषादिवासनारूपाणि मूलान्यनुसंततानि
विस्तृतानि संति तेषां धर्माधर्मकर्मप्रवृत्तिकारित्वान्मू
लत्वान्युच्यंते वत मेवास्यावस्य मुख्यमूलेन ब्रह्मणा सहाव
वांतरमूलानीत्यर्थः कीदृशानि तानीत्यपेक्षायामाह म
नुष्यलोके कर्मानुबंधीनि कर्माण्येवानुबंधीनि मूला
नि येषां तानि यतस्ततः कर्मफलभोगावसाने पुनस्तु
नर्मनुष्यलोकेऽधः कर्महेतुभूतानि तस्य लोकस्य कर्मभूमि
त्वप्रसिद्धत्वादित्यभिप्रायः २

श्री·
गी·टी·
प·

तस्यैव संसारवृक्षस्यावयवसंबंधिन्यपराकल्पना उच्यते

पूर्वं हिरण्यगर्भादयः कार्योपाधयो जीवाः शाखास्थानी
यत्वेनोक्ताः इदानींतनजनो विशेष उच्यते तेषु ये कपूय
चरणा दुष्कृतिनस्तेधः पश्वादियोनिषु प्रसृता विस्तारं ग
ताः ये तु रमणीयचरणाः सुकृतिनस्ते ऊर्ध्वं देवादियोनि
षु प्रसृताः अतोधश्च मनुष्यत्वादारभ्याविचिपर्यंतं ऊर्ध्वं
च तस्मादेवारभ्य सत्यलोकपर्यंतं प्रसृतास्तस्य संसारवृक्ष
स्य शाखाः कीदृश्यस्ताः गुणैः सत्वरजस्तमोभिर्देहेंद्रियवि
षयाकारपरिणतैर्जलसेचनैरिव प्रवृद्धाः स्थूलीभूताः
किंच विषयाः शब्दादयः प्रवालाः पल्लवा इव यासां वृक्ष संसार
शाखानां तास्तथा शाखाग्रस्थानीयाभिरिंद्रियवृत्तिभिः
संबंधाद्रागाधिष्ठानत्वाच्च किंच अधश्च शब्दादूर्ध्वं च
मूलान्यवांतराणि तत्तद्भोगजनितरागद्वेषादिवासना
लक्षणानि मूलान्येव धर्माधर्मप्रवृत्तिकारणानि तस्य
संसारवृक्षस्यानुसंततानि अनुस्यूतानि मुख्यं तु मूलं ब्रह्मै
वेति न दोषः कीदृशान्यवांतरमूलानि कर्म धर्माधर्मल
क्षणमनुबंधं पश्चाज्जनयितुं शीलं येषां तानि कर्मानुबं
धीनि क्व मनुष्यलोके मनुष्यश्चासौ लोकश्चेत्यधिकृतो
ब्राह्मणादिविशिष्टो देहो मनुष्यलोकस्तस्मिन्बाहुल्ये
न कर्मानुबंधीनि मनुष्याणां हि कर्माधिकारः प्रसिद्धः २

यस्त्वयं संसारवृक्षो वर्णितः

णार्थानि भवंति तेन यथा संसारवृक्षस्य परिरक्षणार्थानीति कर्मकांडा
नि धर्माधर्मौ धर्माधर्मतद्धेतुफलप्रकाशनार्थत्वात्तेषां पर्णत्वोपपत्तेः यथा
व्याख्यातं समूलं संसारवृक्षं मया यस्त्वं वेद जानाति स वेदवि
त्कर्मब्रह्माख्यवेदार्थवित्स एवेत्यर्थः संसारवृक्षस्य हि मूलं ब्र
ह्म हिरण्यगर्भादयश्च जीवाः शाखास्थानीयाः स च संसारवृक्षः
स्वरूपेण विनश्वरः प्रवाहरूपेण चानंतः स च वेदोक्तैः कर्मभिः
सेव्यते ब्रह्मज्ञानेन च छिद्यत इत्येतावानेव हि वेदार्थः यश्च वे
दार्थवित्स एव सर्वविदिति समूलवृक्षज्ञानं स्तौति स वेदविदिति
तस्यैव संसारवृक्षस्यावयवसंबंधिन्यपराकल्पनोच्यते ॥ २

सदानंदी टीका ॥

एवं वेदार्थवित्त्वेन समूलतरुवेदिनं स्तुत्वा तस्यैव संसारवृक्षस्य क
ल्पनापरा १ वैराग्यायोच्यते संगसंबंधिमदद्वयमेव पूर्वं हि हिरण्यगर्भा
द्याकार्योपाधितयान्तरोः २ शाखास्थानीयभावेन प्रोक्तास्तत्राधुना
वन्नाहयं विशेषस्तत्रतो मोपि वैराग्यायोच्यते स्फुटं ३ कुत्सितच
रणा ये ते पापाः पश्वादियोनिषु सुविस्तारं गता ये तु धर्मात्मानस्त
ऊर्ध्वगाः ४ देवादियोनिषु प्राप्ता विस्तारमत एव हि अधश्चाधो मनु
ष्यत्वादारभ्यावीकत्वणावधिः ५ ऊर्ध्वं च तत आरभ्य सत्यलोका
न्तमासक्ताः शाखाः संसारवृक्षस्य कीदृश्यस्ता गुणैस्त्रिभिः ६ दे
हेंद्रियाद्याकारेण सत्त्वकारिणा तैस्तैः स्थूलीभूताः प्रवृद्धास्ताः
सेवनैरिव पादपाः ७ विषयारंजकत्वेन शब्दाद्याः पल्लवा इव या
सां संसारवृक्षस्य शाखानां तास्तु कीर्तिताः ८ अधश्च शब्दाद्बृहत्तु च मू
लान्यवांतराण्यपि तत्तद्भोगजरागादिवासनालक्षणानि वै ९
धर्माधर्मप्रवृत्तेश्च कारकाणि समंततः तस्य संसारवृक्षस्यानुस
तानि भवेत्यतः १० मुख्यं तु मूलं ब्रह्मैवेत्यतो दोषो न कश्चन तान्य
वांतरमूलानि कीदृशानीति कथ्यते ११ धर्माधर्मात्मकं कर्मानुब
न्धुपरिणामतः येषां जनयितुं शीलमधिकारिजनेषु वि १२ तानि
कर्मानुबंधीनि तत्रायं भावदर्शितः संसारवासनानां च धर्माधर्मा
ख्यकर्मणां १३ बीजांकुरवदन्योन्यजन्महेतुतया सदा तत्कृतो

श्री· गी· टी· प·

15

जन्मस्थित्यादिसंततानात्मानर्थदः १४ संसारवृक्षच्छेदोत्तरेण पर

मात्मना नोपेक्ष्यो दीर्घरोगो यथा जनैः सम्यग्बुद्धिभिः २

नीलकंठी टीका १२

अधश्चमानुषेभ्यस्तिर्यक्स्थावरादयोः वीचंता ऊर्ध्वं च मानुषेभ्य

एवोपरि वर्गं यावद्ब्रह्मादिहिरण्यगर्भपर्यंतं प्रसृताः प्रसरं प्राप्ताः स्त

स्य शाखाः गुणैः सत्त्वादिभिः प्रकर्षेण प्रवृद्धाः गुणप्रवृद्धाः विषया

एव रंजकतया कोमलपल्लवरूपाणि प्रवालानि यासां ताः संसारवृ

क्षस्योपरि मूलं ब्रह्म उक्तं अधश्चेह मनुष्यलोके च तस्य मूलानि वा

सनारूपाणि अवांतरमूलानि प्रवाहनित्यानि यतः कर्मानुबंधीनि (संततानि)

कर्मैव धर्माधर्माख्यं अनुबंधः पश्चाद्भावि येषां तानि कर्मानुबंधी

नि वासनाभ्यः कर्माणि कर्मभ्यो वासना इत्यनवरतसंततानीयं वृ

क्ष इत्यर्थः २

आनंदी टीका १२

तस्यैवंभूतस्य संसारवृक्षस्य शाखा महदादयस्समष्टिप्रकृतिविकृ

तयः गुणैः सत्त्वादिभिः प्रवृद्धाः सात्त्विकएकादशकः प्रवर्तते वै

कृतादहंकारात् भूतादेस्तन्मात्रः सतामसः तैजसादुभयमि

त्यु[illegible]पदिष्टक्रमेणेंद्रियगणैकादशकतन्मात्रभेदेन विका

रविशेषं प्राप्तास्तथा विषयप्रवालाः विषयाः स्थूलाः शब्दादय

एव प्रवालाः पल्लवाः शाखापत्रयोः पर्वरूपाः भोगापवर्गयोः पु

रुषार्थयोः पुष्पफलयोरुद्गमस्थानानि यासां ताः अधश्चोर्ध्वं प्र

सृताः परस्परं प्रकृतित्वेन विस्तारं गताः तथाहि महत्तत्त्वं प्रधाना

प्रकृतित्वेनाधोगतमथ अहंकारप्रकृतित्वेनोर्ध्वगतम् एवमहंकार

स्य महत्तत्त्वापेक्षयाधोगतत्वेऽपि तन्मात्रेंद्रियापेक्षयोर्ध्वगतत्व

तन्मात्राणां चाहंकारापेक्षयाधोगतत्वम् भूतापेक्षयोर्ध्वगतत्व

मेव पुनः मूलानि पुरुषाधिष्ठितान्यक्षीणावैव प्रकृतयः संभूय च

तुर्विंशतितत्त्वरूपेण व्यक्ततां प्राप्ताः तासां समुदायरूपाणि सांख्य

प्रसिद्धानि लिंगानि सूक्ष्मशरीरसंज्ञकानि कर्मानुबंधीनि पुण्यपा

पुण्यस्य कर्मणोऽनुपातीनि मनुष्यलोके इत्युपलक्षणमास्तनास्तु

भोगभूमिषुयस्मान्नुसंततानिसंस्तृतानिचकाराऊर्ध्वमपितथाचो
क्तं पूर्वोत्पन्नमसक्तंनियतंमहदादिसूक्ष्मपर्यन्तम् संसरतिनिरुप
भोगंभावैरधिवासितंलिंगम् पूर्वोत्पन्नमादिसर्गेतत्वोत्पत्तिसम
नन्तरमुत्पन्नमश्वसक्तंसूक्ष्मत्वात्पाषाणमप्यनुप्रविशति धर्मेण
गमनमूर्ध्वंगमनमधस्ताद्भवत्यधर्मेणज्ञानेनचापवर्गोविपर्यया
दिष्यतेबंधः वैराग्यात्प्रकृतिलयः संसारोभवतिराजसाद्रागात्
ऐश्वर्यादविघातोविपर्ययात्तद्विपर्यासः नविनाभावैर्लिंगंनवि
नालिंगेनभावनिष्पत्तिः लिंगाख्योभावाख्यश्चभवतितस्माद्द्विधा
सर्गः अष्टविकल्पोदैवस्तैर्यग्योनश्चपंचधाभवतिमानुष्यश्चैक
विधःसमासतोभौतिकःसर्गः ऊर्ध्वंसत्वविशालस्तमोविशाल
श्चमूलतःसर्गःमध्येरजोविशालोब्रह्मादिस्तम्बपर्यन्तः २॥

रामकंटीका १५

+ननुकिमयमश्वत्थऊर्ध्वमूलएवाधःशाखएव
चस्याद्उततद्रूपान्तरमप्यस्यास्तीत्याशंकायांत
त्प्रतिपादनार्थमाह॥

+यस्यचास्याश्वत्थस्योक्तक्रमेणाधःशाखाःप्रसृताऊर्ध्वंचप्रसृताःऊतः
चशाखाहेतौ यस्मादधोमर्त्यलोकशाखेतोकार्याकर्मभूमौमूलान्य
नुसंततानिक्लेशाएवप्रसृताइत्यर्थः कर्माण्यपिहिक्लेशमूला
न्यतएवतादृशिमूलानिकर्मानुबंधीनिकर्माणिधर्माधर्माःकि
याअनुबंधुगमयितुंशीलंयेषांतानितथोक्तानिभोगभूमिषुहिभो
गत्वेनक्लेशाएवयथाविजृंभंतेतथाकर्मभूमिषुतएवकर्मत्वेन
विजृंभंतेनतश्चकर्मप्रभवाएवभोगभूमयऊर्ध्वप्रसृतशाखात्वे
नाध्यवसिताः तथोभयरूपाश्वत्थस्यशाखाःकीदृशाइत्याह गु
रू५ णप्रवृद्धाइति गुणैःसत्वादिभिःस्वखाद्यात्मनापरिणमद्भिःप्रवृद्धा
वपचयंप्राप्ताः यावद्धिप्रसरस्तासांससर्वोगुणानुविद्धएव भो
गात्मनाकर्मात्मनावाविजृम्भतेतेनयथारसेनशाखाहृदस्यप्रव
र्धंतेएवंगुणैःकर्मभूमयःफलभूमयश्चप्रवर्धंतेनतदात्मकाएव
तारत्यर्थः तथाविषयप्रवालाविषयाशब्दादयोबुद्धिप्रधानास्तभू
मिषुध्यवसिताःप्रवालस्थानीयाःपल्लवतुल्यायासामुपरितनी

श्री॰ षयस्तनीषु च सर्वास्वेव हि शुभाशुभविषयत्वेन परिणता
गी॰टी॰ गुणप्रवपर्यायेण गमागमहेतुत्वमापाद्यमानाः देवत्वान्निवध्नं
पं॰ तीति तात्पर्यम् [illegible]

[illegible] २ ॥

लासिकी [illegible]नीटीका १५

किंच तस्येश्वरस्य शाखा जीवाः अधो निकृष्टास्तु प[illegible]दियोनिषु ऊर्ध्वं चोत्कृष्टास्तु देवादियोनिषु प्रसृता विस्तारमापन्नाः कीदृश्यो गुणप्रवृद्धाः गुणैः सत्त्वादिभिः प्रकर्षेण गुणवैषम्येन वृद्धिंगताः तथा विषयप्रवालाः विषया रूपादयः प्रवालाः स्वरूपाच्छादकतया पत्रस्थानीयाः किंच तासां जीवशाखानां मनुष्यलोके कर्मानुबंधीनि निहंतुम् शुभाशुभात्मककर्मवासनारूपाणि मूलानि अधश्च पश्वादियोनिषु चकारादूर्ध्वं च देवादियोनिषु जीवत्वप्राप्त्यनंतरं संततानि विस्तृतिमापन्नानि [illegible] २ ॥

पंचोलीटीका

तस्यैव संसारवृक्षस्य अवयवव्यापारकल्पनामाह अधश्चेति पूर्वार्द्धेन पूर्वं परममूलकारणात्मकं ऊर्ध्वमूलमिति इदानीं प्राग्भावीयकर्मफलजनितरागद्वेषादिवासनामवांतरकारणान्वेनाह अधश्च मूलानीति तस्य संसारवृक्षस्य पूर्वोक्ताः शाखाः अधो मनुष्यलोकमारभ्य स्थावरपर्यंतं ऊर्ध्वं मनुष्यलोकादारभ्य हिरण्यगर्भलोकपर्यंतं कर्मज्ञानानुसारेण ज्ञानकर्मफलभूताः शाखा इव प्रसृताः गुणैः सत्त्वरजस्तमोभिः प्रवृद्धाः स्थूलीकृताः विषयप्रवालाः विषयाः शब्दादयः कर्मफलेभ्यो देहादिभ्यः संसारवृक्षस्य अंकुरीभवंतीति विषयप्रवालाः शाखाः अधश्च मूलानि वर्तमानदेहापेक्षया प्राग्भावीयकर्मफलवासनाः अधः अर्वाग्भूता वर्तमानदेहारंभकधर्मप्रवृत्तिहेतुतानतम्रा

लानिवर्तमानसंसारस्यकारणानिमनुष्यलोकेअनुसंततानि
निमनुष्यदेहोपार्जितानिकर्मानुबंधीनिकर्मधर्माधर्मलक्षण
अनुबंधःपश्चाद्भावियेषांतानि २॥

रत्नवीरसमिद्धायिनी

अधश्चेति तस्ययजुर्वेदवृक्षस्यप्रोक्तलक्षणस्यशाखाअवांतरशाखा
शाखामन्वादिपरंपरयाउपदेशक्रमेणाधिगतयजुर्वेदविद्यावृक्ष
वोराजानोधोनरकादिलोकान्प्रतिहेसंमुखमरणाद्यभावेनापालि
तस्वधर्मत्वात्प्रसृतागतास्तथाधुहेसंमुखमरणादिनासम्यक्पा
रिपालितस्वधर्मत्वादूर्ध्वंस्वर्गादिलोकान्प्रसृतागताः कीदृशास्ते
गुणप्रवृद्धाःसंधिर्नीविग्रहोयानमासनंद्वैधमाश्रयः षड्गुणास्तेष
नुपासनाहुतोःसंध्यादिभिःषड्भिःप्रवृद्धाःप्रकर्षेणानेकदेशाधि
कारित्वेनवृद्धिंप्राप्ताविषयप्रवालाविषयादेशाएवप्रवालाःपल्ल
वस्थानीयायासांराजरूपावांतरशाखानांता विषयप्रवाला अने
केदेशेभ्योधिगततयनसमृद्ध्यापन्नैः शाखैवदेदीप्यते द्विरूपः अ
धश्चेति ईश्वरतत्त्वमेकमेवास्यमुख्यंमूलमिति मूलानीति बहुव
चनंमनुप्रभृतिभ्योनंतरंयजुर्वेदोपदेष्टृपदमाप्नवतांविद्याभि
मानिनांग्रहणंकरोति मूलान्यवांतरमूलान्युपदेष्टृरूपाणिवृह
निमनुष्याणांमनोःप्रथमयजुर्वेदाचार्यस्यापत्यानांलोकेभुवने
उत्पत्तिभूमौकर्मानुबंधीनि कर्मपुण्यपापात्मकंतदेवानुबध्यते
ऽनंतरभावियेषांतानिकर्मानुबंधीनि अधश्चेति चकारादूर्ध्वंचनरकलो
केषुस्वर्गलोकेषुवानुसंततानिविरूढानिअयमत्राभिप्रायः यजु
र्वेदवृक्षस्यावांतरमूलभूताउपदेष्टारउपदेशस्य यजुर्वेदवृक्षस्यो
ल्लुंठनपूर्वकोपदेशेनस्वर्गादीनुत्तमान्लोकान्प्राप्नुवंति तदनुल्लुं
ठनपूर्वकोपदेशेननरकादीनधोलोकानाधिगच्छंति तत्रस्वर्ग
नरकेषुपुण्यपापोपस्थितान्सुखदुःखादीनुपभुंजंत्यकर्मयोषेणमत्र

ब्रलोकंगछंति तत्र च पूर्वान्वंधिनामिति नचमनु
वेदोक्तस्यसम्यगाचरणेनक्षत्रियाणांमद्धर्मप्रदावामि
र्भवतीति तदुपदेष्टॄणां केवलेनज्ञानेनमद्धर्मप्रदोषामेर्डल
भावादिति समाधेयं अतएवक्षत्रियाणांसम्यगभ्यस्तथन
वेदानामध्ययनमात्रेणस्वधर्मोनहिमोनमवेकिंतत्तदुक्त
स्वधर्मपालनेनेति २॥

मधुभाष्य

२॥

और कार्यरूप उपाधि विशिष्ट हिरण्यगर्भआदि जो सकल जीव सोई शाखारूप पूर्व श्लोकमे कहा है तिन के मध्यमे जो अकर्म कारी अर्थात् कुत्सित कर्म करते हैं तेई अधः अर्थात् पशु आदि योनिसे जाते हैं और जो सत् कर्म करते हैं वे ऊर्ध्व कहे देव योनि मे प्राप्त होय हैं येई संसार वृक्ष के शाखारूप सत्व आदि गुणों की वृत्तिसे जल सेचन के समान यथा योग बढते हैं और शाखाके अग्रतुल्य इन्द्रिय औ इन्द्रियोंके विषय जो रूप रसआदि सोई प्रबाल अर्थात् पत्रतुल्य हैं और अधोभाग मे ऊर्ध्व भागमे औ समस्त मूलोमे परमेश्वर ही मुख्यमूल हैं और तहां रागवासनारूप अवान्तर वासना सब अवान्तर मूल हैं और अवा न्तर वासना के कार्य कहते हैं कि कर्म्म मात्र ही सकल वासना के अनुवन्ध अर्थात् उत्तर भावी कहे होनहार सोई वासना स मस्त मनुष्य लोकमे कर्म्म अनुवन्धी होता है अर्थात् ऊर्द्ध अ धो लोकमे भुक्त जो नानाप्रकार के भोग सोई सोई भोग वासना के द्वारा ही कर्म्म क्षय होनेसे मनुष्य लोकको प्राप्त लोगों को सोइ सोई वासना अनुरूप सकल कर्मोंमे प्रवृत्ति होती है औ र जिसहेतु मनुष्य लोकहीमे कर्म्म का अधिकार है और कोई लोकमे नहीं है इससे मनुष्य लोकहीमे वासनारूप मूल कोक र्म्मका अनुवन्धी कहा है भाव है कि हाए मूढ सकल साधन म नुष्य देह पायके न कुछ करपाके इस मूलको भी भूलगये कि सीको देख या किसीके उपदेशमे आय अंधो औ कान वहरे ही रहगये २

चौपई

नीचे ऊपर फैली तिह साखा उत्तमइह वृक्ष पीपल सो भाखा
मूलसिखर पर्यंत विस्तार कर्मबंधी नरलोक उतार २॥

18

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सं
प्रतिष्ठा अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रे
ण दृढेन छित्वा ३ ॥

शांकरभाष्यटीका १

यस्त्वयं वर्णितः संसारवृक्षः न रूपेति न रूपमस्य इह यथा वर्णितं
तथा नैवोपलभ्यते स्वप्नमरीच्युदकमायागन्धर्वनगरसमत्वात्
दृष्टनष्टस्वरूपो हि स इत्यत एव नान्तो न पर्यन्तो निष्ठा समाप्तिर्वा वि
द्यते तथा न चादिरित आरभ्यायं प्रवृत्त इति न केनचिद्गम्यते न च सं
प्रतिष्ठा स्थितिर्मध्यमस्य न केनचिदुपलभ्यते अश्वत्थमेनं यथोक्तं
सुविरूढमूलं सुष्ठु विरूढानि विरोहं गतानि मूलानि यस्य त
मेनं सुविरूढमूलमसंगशस्त्रेण असंगः पुत्रवित्तलोकैषणादि
भ्यो व्युत्थानं तेनासंगशस्त्रेण दृढेन परमात्माभिमुख्यनिश्चयदृ
ढीकृतेन पुनः पुनर्विवेकाभ्यासाश्मनिशितेन छित्वा संसारवृ
क्षं सबीजमुद्धृत्य ३

आनंदगिरिकृतटीका ३

पुनः पुनः रागादिना प्रवृत्तत्वेनानादित्वात्संसारवृक्षः स्वयमुच्छि
द्यते न चोच्छेत्तुं शक्यते केनापीत्याशंक्याह यस्त्विति यथा पूर्वं वर्णि
तं यथा वा लोके प्रसिद्धं तथास्य रूपमिह शास्त्रेऽनुमीयते तथा वा
स्यज्ञानापनोद्यत्वं युक्तमित्याह यथेति तस्याप्रसिद्धौ हेतुमाह स्वप्ने
ति तस्य स्वप्नादिसमत्वे दृष्टनष्टस्वरूपत्वं हेतुं करोति दृष्टेति इत्य
मेयतीति शेषः तमेवामेयत्वे हेतुं कृत्वावसानमपि तस्य न
भातीत्याह अत एवेति ज्ञानं विना भ्रान्तिवासनाकर्मणामन्यो
न्यनिमित्तत्वान्नावसानमस्तीत्यर्थः इदं प्रथमत्वमपि नास्य परि
च्छेत्तुं शक्यमित्याह तथेति आद्यन्तवन्मध्यमपि नास्य प्रामाणिक
मित्याह मध्यमिति संसारवृक्षस्याप्रमाणत्वादित्यस्य स्थाणुभङ्गस्य
स्वयमेवोच्छेदसम्भवात्तदुच्छेदार्थं न प्रयतितव्यमित्याशंक्याह दृढ

यस्मादेवंभूतत्वादयं संसारवृक्षो दुरुच्छेदोऽनर्थकरश्च तस्मादेनं दृढेन वैराग्येन शस्त्रेण छित्त्वा तत्त्वज्ञाने
यतेतेत्याह अश्वत्थमिति सार्धेन एनमश्वत्थं सुविरूढमूलमत्यन्तं नानावासनाभिर्बद्धमूलं सन्तमसंगः
संगराहित्यमहंताममतात्यागस्तेन शस्त्रेण दृढेन सम्यग्विचारवता छित्त्वा पृथक्कृत्य ॥२

अश्वत्थमिति सुस्थानं वैराग्यपूर्वकं पारिव्राज्यं दृढीकृतत्वमेव विवेकपूर्वक
त्वेन स्फुटयति पुनः पुनरिति ३

स्वामिकृतटीका ३

किंच न रूपमिति इह संसारे स्थितैः प्राणिभिरस्य संसारवृक्षस्य न तथा
ऊर्ध्वमूलत्वादिप्रकारेण रूपं नोपलभ्यते नचान्तः अवसानमनन्तत्वा
न्नचादिरनादित्वान्नच संप्रतिष्ठा स्थितिः कथं तिष्ठतीति नचोपल
भ्यते ३

पिशाचभाष्यटीका ४

अस्य संसारवृक्षस्य यथोपवर्णितस्य यथोक्तरूपं नोपलभ्यते नान्तः
नचावसानमुपलभ्यते नचादिः आदिरिदंप्रथममनया प्रवृत्तिरस्य सं
सारवृक्षस्य नोपलभ्यते न च संप्रतिष्ठा मध्यं मायामरीच्युदकगंध
र्वनगरादिवद्दि[illegible]स्वरूपत्वात् अश्वत्थमेनं यथोक्तमूलं सु
विरूढमूलमसंगशस्त्रेण संगस्याभावः असंगः शस्त्रमिव शस्त्रं ते
न दृढेन परमार्थनिश्चयदृढीकृतेन छित्त्वा संसारवृक्षमूलमुद्धृत्य
३

रामानुजभाष्यटीका ५

न रूपमिति अस्य वृक्षस्य वक्तमेवोदित्वेन ऊर्ध्वमूलत्वेन संतानपरं
परया मनुष्यपश्वादयो मनुष्याग्रहत्वेनाधःशाखत्वं मनुष्यत्वे कृ
तैः कर्मभिः मूलभूतैः पुनरप्यधश्चोर्ध्वं च प्रसृतशाखत्वमिति यथे
दं रूपं निर्दिष्टं न तथा संसारिभिरुपलभ्यते मनुष्योऽहं देवदत्तस्य पु
त्रोऽहं यज्ञदत्तस्य पिता तदनुरूपपरिग्रहश्चेत्येतावन्मात्रमुपल
भ्यते तथास्य वृक्षस्यान्तो विनाशोऽपि गुणमयभोगेषु संगकृत इति
नोपलभ्यते तथास्य गुणसंग एवादिरिति नोपलभ्यते अस्य प्रति
ष्ठानात्मन्यनात्माभिमानइति नोपलभ्यते प्रतितिष्ठत्यस्मिन्निति अ
ज्ञानमेवास्य प्रतिष्ठा अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण
दृढेन छित्त्वा ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति
भूयः यथेनमश्वप्रकारं सुविरूढमूलं सुदृढं विविधरूढमूलमथ
स्य सम्यक्कृतानमूलेन दृढेन गुणमयभोगासंगाख्येन शस्त्रेण छि

त्वानंतो विषयासंगाद्वैतोस्तमदं परिमार्गितव्यं अन्वेषणीयं यस्मि
न्गता भूयो न निवर्तंते [illegible]

[illegible]

अभिनवगुप्तकृत टीका ९

स्पष्टार्थं ३ ॥

परमार्थप्रपा टीका ७

अथ तत्स्वरूपैर्यत्वमाह न रूपमस्येति द्वाभ्यां इह संसारे स्यस्वरू
लं प्रपंचतरोः रूपं स्वरूपं तथा लौकिकदृष्ट्या नोपलभ्यते यथा
तानदृष्टोस्यर्थः दिव्यहृदामिनेवक्षरिफत्वात वपरं मस्यांतः प
र्यवसानं न तथा प्रतिष्ठास्थितिः आदिराविर्भावश्च नोपलभ्यते
अथास्योपरमप्रकारमाह अश्वत्थमिति एतेन निरूपित प्र
कारं सुविरूढमूलं प्रकारांतरेणानुछेद्यं अश्वत्थं दृढेनमीदे
न असंगशस्त्रेण वैराग्यकुठारेण छित्वा ३

वनमाली टीका ८

अस्य जगद्वृक्षस्य स्वरूपं सविकार[illegible]त्वादिकं तत्र भंगुरमायात
रम्यं यथा श्रित्ने भागवर्णितं तथा नोपलभ्यते किं वादिरुत्पत्तिरं
तो विनाशः प्रतिष्ठा स्थितिश्च न आरभ्यो मध्यस्थितिर्नोपलभ्यते ना
दित्वात् एतावता कालतो न समाप्तिर्भविष्यतीत्यंतो नोपलभ्य
ते अपर्यंतत्वात् प्रतिष्ठा मध्यमस्य नोपलभ्यते आद्यंतयोरेव निरू
पत्वेन तत्र प्रतियोगिकमध्यस्यापि दुर्निरूपत्वात् अनाद्यनुरा
गादिना सुविरूढमूलं अश्वत्थं बहुमूलं प्राग्व्याख्यातमेनं असं
गशस्त्रेणासंगः स्पृहाशून्यसंगः संगविरोधिवैराग्यं पुत्रवित्तलोके
षणात्यागरूपम् तदेव शस्त्रं रागद्वेषभयसंसारविरोधित्वात्
तेनासंगशस्त्रेण दृढेन भगवत्तानोत्कटीकृतेन पुनः पुनर्वि
वेकाभ्यासशाणेन छित्वा निःशेषमुत्कृत्य ततः पदं तत्परि
मार्गितव्यमित्युत्तरेणान्वयः ३

कृष्णवैजयन्ती टीका १

श्री॰
गी॰टी॰
प॰

१०

किंचनरूपमितियथास्यसंसाराश्वत्थवृक्षस्यमहमत्वात्मकचतर्म
खाद्दित्वेनोर्द्धमूलत्वंतत्रत्वेनतिपर्णपत्ररूपमनुष्या[illegible]यत्वेना
धःशाखत्वेचपुनरपिमनुष्यत्वकृतैःकर्ममूलभूतैरधश्चोर्द्ध
प्रसृतशाखत्वंमयोपवर्णितंतथास्यवृक्षस्येहमनुष्यलोकेरूप
संसारिभिर्जनैर्नोपलभ्यतेनप्राप्यतेकिंतुमनुष्योहंदेवदत्तस्य
पिताहंयज्ञदत्तस्यपुत्रोहंतदनुरूपकर्मकारीसुखीदुःखीचा
स्मिन्देशेऽस्मिन्ग्रामेनिवसामीत्येतावन्मात्रमेवज्ञायतेनान्तो
वृक्षस्यान्तोनाशो[illegible]नोपलभ्यतेकथमयमनर्थव्रातनहिलोवि
नश्येदितिनज्ञायतेयहाऽस्यान्तःअपंदीचेपवस्थूलपवस्थेतप
वदैन्नादेवज्ञानेरस्येवंयाथात्म्यननिर्णयोनज्ञायतेइत्यर्थःनचादि
र्नचास्यवृक्षस्यादिःकुतोऽयमीदृशोजातोऽस्तीतिकारणंनोपल
भ्यतेनचवृक्षसंप्रतिष्ठाचपुनःसोपिनज्ञायतइत्यर्थःअस्यवृक्षस्यसंप्र
तिष्ठाकिंसमाश्रित्यायंसंतिष्ठतेइतिसमाश्रयोपिनोपलभ्यते
संप्रतिष्ठत्यास्मिन्निस्यानन्नात्तानुपूर्वकानात्ममात्माभिमानःसोपिन
ज्ञायतइत्यर्थःयस्मादेवंभूतोऽयोऽनर्थव्रातहेतु[illegible]स्मा
यमश्वत्थवृक्षस्तस्मात्सुदृढेनविवेकाभ्यासनिशितेनासंगशस्त्रे
णसंगोविषयाभिलाषस्तद्रहितोऽसंगोवैराग्यंतदेवशस्त्रंतेन
[illegible]तदभिलाषनाशक
त्वात्विषयासंगरूपेणवैराग्यकुठारेणास्यविरूढमूलंसुदृढवि
विधकर्मवासनाभिःरूढमत्यंतवर्द्धमूलंयस्यतंएनंप्रमत्तवि
षभूतमश्वत्थवृक्षंछित्वाततःप्रयत्नेनमसत्प्रसंगलब्धवस्तुयाथा
त्म्यज्ञानेनतत्पदंपरिमार्गितव्यमित्यनेनान्वयः ३

मधुसूदनी टीका ।

इहसंसारेस्थितैःप्राणिभिरस्यसंसारवृक्षस्ययथावर्णितमूर्द्ध
मूर्धमूलत्वादि नयोनेनप्रकारेणरूपंनोपलभ्यते स्वप्नमरी
चिदकमायागंधर्वनगरवन्नश्यत्वेनदृष्टनष्ट[illegible]स्वरूपत्वा
नस्यअतएवनस्यांतोनावसानंनोपलभ्यते एतावतकाले

न सन्मासिना मिथ्यानीतिश्रपर्यंतत्वात् न वास्यादिरुपलभ्यते इतश्रा
रभ्यप्रवृत्त इत्यनादित्वात् न वास्यप्रतिष्ठास्थितिः मध्यमस्योपलभ्यते
अपंतप्रतियोगिकत्वात्तस्य यस्मादेवंभूतः संसारवृक्षो दुरुच्छेदः
सर्वानर्थकरश्च तस्मादनाद्यज्ञानेन सुविरूढमूलमत्यंतवद्धमूले
प्रागुक्तमश्वत्थमेनं असंगशस्त्रेण संगः स्पृहा असंगः संगविरो
धः वैराग्यं पुत्रवित्तलोकैषणात्यागरूपं तदेव शस्त्रं रागद्वेषमयसं
सारविरोधित्वात् तेनासंगशस्त्रेण दृढेन परमात्मतानौन्मुख
दृढीकृतेन पुनः पुनर्विवेकाभ्यासनिशितेन छित्वा समूलमु
द्धृत्य वैराग्यशमदमादिसंपन्नः सर्वकर्मसंन्यासं कृत्वेत्यनेन तत् ३

सदानंदी टीका ११

यस्त्वयं वर्णितो वृक्षः संसाराख्योऽस्य जंतुभिः संसाराख्योऽस्य जंत
भिः संसारेऽस्मिन् स्थितैर्वेदे यथा वर्णितमङ्गं १ रूपं तेन प्रका
रेण नोपलभ्यते संसारे दृष्टनष्टस्वरूपत्वात् स्वप्नमायामय स्वव
त्स्वप्नमायामरीच्यंभोगंधर्वनगरादिवत् अतो नास्य वसानव
कथंचिदुपलभ्यते २ एतावता सौ कालेन समाप्तिं यास्यतीति
वा अपर्यंततया च्छस्य तथा आदिर्नोपलभ्यते ४ प्रवृत्त इतआरभ्ये
त्यनादित्वेन केनापि न संप्रतिष्ठा स्थितिर्नोपि मध्यमस्योपल
भ्यते ५ तस्मादंतनिरूपणत्वात् यस्मादेवमयं तरुः संसाराख्यो दु
रुच्छेदः सर्वानर्थकरस्ततः ६ अनाद्यविद्ययात्यंतवद्धमूलं सु
रेरितं एनमश्वत्थनामानं संसारतरुमव्ययं वैराग्याख्येनाश
स्त्रेण रागद्वेषविरोधिना दृढीकृतेन ब्रह्मैकतानौन्मुक्तात्मनः
पुनः ८ विवेकाभ्यासतीक्ष्णेन छित्वोद्धृत्य समूलतः वैराग्यात्
षट्कसंपत्या कृत्वा संन्यासमादरात् ३

नीलकंठी टीका १२

ननु सोपि स्यात्तमनर्हब्राह्मणस्यैनके प्रतिक्षणविनाशिविज्ञान
संतानरूपो वा ब्रीह्यादिवत्प्रवाहनित्यो वा यं संसारस्तर्हि दुरुच्छे
द्यो वासनानां कर्मणां च बीजांकुरवदन्योन्यजन्महेतुत्वस्यावर्जनी

श्री·
गी· टी·
प·

२१

यत्त्वादित्याशंक्य सत्त्वासत्त्वाभ्यामनिर्वचनीयोयमित्येतं पक्षमाश्रि
त्य परिहरति नरूपमिति इन्दुरगस्येवास्य रूपं सम्यग्दशावीक्ष
माणैस्तत्रोपलभ्यते इहजीवस्येव देहे यथापूर्वमज्ञानदशायां
तथा नोपलभ्यते ज्ञानदशायां तेनास्य मरुषात्वमनुभवैकवेद्य
मित्युक्तं प्रतेनानुपलभ्यरूपत्वेन च नैस्वप्रकाशानां विज्ञाना
नां रूपवतां बीजादीनां च साहश्यस्य व्याहतिः नहि शशविषा
णं वतुच्छपक्षा यं स्यादित्यत आह नांतो न चादिरिति उपादानस्य
मूलाज्ञानस्याद्यन्तशून्यत्वाद् यमप्याद्यन्तशून्यः स्यात्व्यर्थः नहि आ
त्मवद् परिहार्यः स्यादित्याशंक्याह नचसंप्रतिष्ठा अस्य प्रतिष्ठा
स्थितिलयस्यानेह्रदस्यभूमिरिवनास्ति न चायं ब्रह्मणो विकारोये
न तद्वैवलीयेत नवेष्टापत्तिः ब्रह्मणः कौटस्थ्यभंगापत्तेः किं
नर्हि तत्त्वमज्ञानमस्योपादानं तस्मिंश्च ज्ञानेन विनष्टे समूल
स्यास्योच्छेदो भवति यज्ञानस्य च तत्त्वतत्त्वेनोच्छेनाभ्यपि हिते
प्रत्यमीदिमाहि ऋत्या नकार्यस्य रज्जुरगादेः प्रलये न दृप
लंभस्थानमेवेन च सिद्धं तस्माद स्यप्रतिष्ठानोपलभ्यतइति
युक्तमेवोक्तं न मेनमश्वत्थं वासनानां दात्त्वोनसुविरूढमू
लं हठतनवमूलमपि असंगशस्त्रेणासंगो देहादितादात्म्यबुद्धि
त्तवर्जनमसंगः स एव शस्त्रं तेन दृढेन परिपक्वेन छित्त्वा न
तः पदं तत्परिमार्गितव्यमित्यन्तरेणान्वयः यद्यपि स्थूलसूक्ष्म
योः संसारयोरसंगः स्वयमेव जायते तेन तन्मूलवा
सनाभिरप्यात्मनोः संगो नमीयते तथापि वासनामूलस्याज्ञा
नस्य ज्ञानेनानुच्छेदात्त्वसंगधीर्हृढा भवति तस्मात्त्रिविवेकस्स
माध्यभ्यासेन कारणशरीरस्याप्यसंगः साध्यः तेन चासंग
शस्त्रेणास्योच्छेदो [illegible]लवणोदकवद्रज्जुरगवच्च प्रविलापनरू
पः कर्तव्यः न तु सांख्यानामिव स्वरूपेणासनः परिवर्जनमा
त्रं ।

११

अस्य संसारस्य विश्वस्यैवाश्वत्थस्य सत्त्वादिभिर्गुणैः प्रवृद्धस्य त
थैकांतिकेन नियमेनेह क्वचिदेकत्र रूपं केवलं सात्त्विकं राजसि
कं तामसिकं वा नोपलभ्यंते सर्वेषां गुणानां संभूयैव कार्यारंभ
कत्वशक्तेर्विश्ववैचित्र्यस्याविनिर्भागात् अत एव मिलित्वैव गु
णानां कार्यारंभकत्वेपि नान्तः विश्वस्य कार्यवर्गस्यैकत्रैव नियम
नात्तामसिकत्वमिति संसाराश्वत्थस्यास्यान्तस्तामसिकत्वेन समा
प्तिर्नचास्ति न चादिः प्रथममनुत्पत्त्यारंभे सत्त्वमेव हि रजस्तमसोः
कार्याणामनुत्पत्तये प्रकाशकमिति गुणकार्यस्यास्य संसारस्याश्व
स्य प्रथमावस्था सात्त्विकैवेत्यपि नास्ति न च संप्रतिष्ठा प्रवृत्तिरू
पा रज एव हि सत्त्वतमसोः स्वकार्यसमुत्पत्तये प्रकाशेन नियमने
वा प्रवृत्तिं कारयतीति विश्वस्य मध्यावस्था राजसिकी नैव तद
पि नास्ति अत्रायं तात्पर्यार्थः यद्यपि सत्त्वरजस्तमांसीव विश्वका
र्यकारणानि शब्दादौ कार्ये हि श्रवणादेः कारणस्य सत्त्वं प्रका
शं करोति तदनु तत्समुत्पत्त्यर्थं रजः प्रवर्तयति उन्नतस्त्वेव तमो नि
यमयतीति प्रथमं प्रकाशस्तदनु प्रवृत्तिः ततो नियमः इति
क्रमो नास्ति व्युत्क्रमेणापि दृष्टेः तथाहि दृष्टिवशात् क्वचि
द्विषये प्रथममेव तमसावरकेण नियमितस्य तदनु सत्त्वं त
त्रैव सत्त्वं प्रकाशयति ततो रजः प्रवर्तयति एवमेवादृष्टवशाद्र
जसा प्रथममेव प्रवर्तितस्य तदनु प्रकाशनियमौ दृष्टौ गुणा
नामन्योन्याभिभवाश्रयजननमिथुनवृत्तिवैचित्र्येण विश्ववैचि
त्र्यस्याविनिर्भागात् तथा च सत्त्वंपुराणे अन्योन्यमिथुनाः
सर्वे सर्वे सर्वत्रगामिनः रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं
रजः तमसश्चापि मिथुने ते सत्त्वरजसी उभे उभयोः सत्त्वरज
सोः मिथुनं तम उच्यते नैषामादिः संप्रयोगो वियोगो वोपल
भ्यते तथा चैतत्स्थलद्वितमेव सर्वस्मिन्नध्याये स्वयं भगवताभ्यभी

श्री॰
गी॰टी॰
पं॰

२२

तिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः अन्योन्याभिभवाश्र
यजननमिथुनवृत्तयश्च गुणाः सत्त्वं लघु प्रकाशकमुपष्टंभ
कं चलं च रजः गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः धर्मे
णगमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ज्ञानेन चापवर्गो विप
र्ययादिष्यते बंधः इत्यादि सांख्यप्रमाणोपपादकं दृश्यं ध्यायेत्स
त्त्वरजस्तमः इत्यारभ्योर्ध्वं गच्छंति सत्त्वस्था इत्यंतम् एतन्निबंधम्
तमस्पृष्टं संसारहेतुं स्वविरक्ताः निशामगुक्तं नीत्या धर्माधर्मादिहे
तुकतया नानासंभोगभूमिषु हीयोगामिन यानवरतं प्ररोहेद्वि
स्तारं प्राप्तानि मूलानि लिंगाख्यानि सूक्ष्मशरीराणि तदनुप्रवि
ष्टानि स्थूलशरीराणि च यस्मिन् शमस्य स्यं संसारहेतुं शिनेनयो
गाभ्यासादि समुत्तेजितेन असंगो वैराग्यमेव शस्त्रं तेन छित्वा ।
अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः इत्या
दिश्रुत्यवेतया विवेकख्यात्या प्रकृतिपुरुषौ पृथक् पृथग्विभा
व्येति यावत् ३ ॥

ˇतास्य

+ तदेवंविधस्योक्तस्य भवस्य वक्ष्यमाणज्ञाना
भावादाह ॥

रामकंठीटीका १४

+ अस्य यथा प्रतिपादितस्य न यानेन प्रकारेण रूपं स्वभावो
नोपलभ्यते न तु तेनैव प्रतिपद्यते अन्यथैव दृश्यमचिंत्यस्वरमा
यामात्रनिबंधनानयानत्वनिःसाररूपत्वेन स्थितो ज्ञानमप्यन्यत्वा
ज्ञानस्यैव परमार्थसत्त्वेनावभासमानो ममकारग्रहेण प्राणिनो
निवभाति यथास्य स्वरूपं नोपलभ्यते न च संप्रतिष्ठा ह्यन्तराव
स्थितिनी सम्यक् स्थितिस्तस्यापि न लभ्यते यतो येन येन रूपेण स्थि
तिः स्यात्सर्वपरिणामित्वादस्थिरमत एवंविधस्यास्य स्वभावाः
प्रकाशस्यावधायकस्याच्छेदोपायमाह एवं यथा प्रतिपादित
स्वरूपं देहज्ञानानां क्लेशनिमित्तकर्मानुरूपपरिपाकानुभवाधि
करणभूतभुवनसमात्मकमश्वत्थं तत्साधर्म्यादश्वत्थेन निरूपित

मत एव सुविरूढमूलं सुदृढाफ्तेन विविधं कृत्वा रूढानि प्ररोहं प्राप्तानि क्ले
शा एव मूलानि यस्य तं तादृशम् असंगशस्त्रेण ममताग्रहरूपगाढकोशेषत्वा
गात्मना विवेकपाषाणकषणवशात् शितेन तीक्ष्णेन कठोरेण छित्वा मू ३१
लतो द्विधा कृत्वा ॥ ३ ॥

लासिकी[illegible]टीका १५

किंच अस्येश्वरस्य स्वरूपं व्यापकत्वसर्वज्ञत्वसर्वकर्तृत्वरूपं तथा यथा भव
ति तथेह जीवलोके नोपलभ्यते नानुभूयते केनचित् तथान्तस्य नोप
लभ्यते नं [illegible] न चादिरनादित्वात् न च संप्रतिष्ठा संस्थितिराश्रय
रूपा च नोपलभ्यते एनमीश्वररूपमश्वत्थं सुविरूढमूलं सुविरूढं
दृढमूलं वल्कलरूपं यस्य तम् दृढेन वैराग्यशस्त्रेण छित्वा परिच्छि
द्य विविच्य ॥ ३ ॥

पंचोले टीका

वासनारूपं कर्मत्वाऽऽरभते प्रमान् न रूपमिति योयं संसारवृक्षो
वृक्षो वर्णितः अस्य इह लोके यथा वर्णितं रूपं नोपलभ्यते च पु
नः न अन्तः न आदिः न संप्रतिष्ठा स्थितिः मध्यभागः केनचिन्नोपा
लभ्यते एनं संसारवृक्षं असंगशस्त्रेण पुत्रवित्तलोकैषणाभ्यो
व्युत्थानेन वैराग्येणाहं देहादपरमात्माभिन्न इत्येवं दृढीकृतेन पु
नः पुनः विवेकाभ्यासाश्मशिलेन शस्त्रेणापरशुना सुविरूढमूलं
नानाप्ररोहगतमूलं संसारवृक्षं छित्वा सबीजमनन्तमूल्य ३ ॥

रणवीरसमिद्बोधिनी ॥

न रूपमिति अस्य यजुर्वेदहृदस्य येन प्रकारेणोर्ध्वमूलाधः शा
खत्वेन स्वरूपं वर्णितं तथा तेन प्रकारेणास्य रूपं नोपलभ्यते
मूलप्राप्तानां बाहुल्यात् न यान्तः पर्यन्तं एतावता कालेन समाप्तिं
गमिष्यतीति नोपलभ्यते न चास्यादिः इत आरभ्य प्रवृत्त इति चो
पलभ्यते तथास्य संप्रतिष्ठा स्थितिर्मध्यं नोपलभ्यते आद्यंत प्रति

योगित्वात्तस्येति कारणगुणाः कार्यानुगामिन इति न्यायेनादि
मध्यांतशून्यपरतत्त्वकारणसमुद्भूतस्य धनुर्वेदस्यादिम॰
ध्यांतशून्यत्वमुचितमेवेति भावः अघत्यमिति तत्तदैहिका
मुष्मिककामदुरकत्वेन शून्यतमत्वादघत्यमिवाघत्यमेनं
धनुर्वेदं हस्तं सुविरूढमूलं सुपुष्पयाप्यास्यानया विपोषेणारूढं
प्रसिद्धिं गतं परतत्त्वलक्षणं मूलं कारणं यस्य तत्त्वविरूढमूलं
परमेश्वरकारणकमित्यर्थः असंगशास्त्रेणेति अविद्यमानोऽय
नुर्वेदादन्यत्र संगः सजनं यस्य तदसंगं निरंतरं तादृशं यच्छस्त्र
मभ्यासरूपं तेनाभ्यासप्रयत्नेन दृढेन पुनःपुनः सत्यवतया
थितीकृतेन दृढाभ्यासेनेत्यर्थः छित्वासारासारपृथक्करणे
न छेदमिव प्राप्य धनुर्वेदं दृढाभ्यासेन सुनिश्चितीकृतयेति
यावदिति १॥

मधुभाष्य

१॥

भाषाअनुवादटीका १

इस संसारमे वर्तमान जो प्राणी हैं वे संसार वृक्षका उर्द्धमूलआदि भे
द नहीं जानते हैं और अत्यन्त बड़ेपनके हेतुसे इसका अन्तभी नहीं
जाना जाय है तथा अनादि हेतुसे आदि भी नहीं कोई जानिशके
है और स्थिति अर्थात यह संसार किसतरह स्थित औ कैसा है सो
भी खबर किसी को नहीं है इससे यह संसार वृक्ष दुश्छेद्य कहे इ
स का काटना कठिन है औ अनर्थकारी है इसी हेतु इस संसार
को दृढ वैराग्य रूप शस्त्रसे छेदन करके तत्वज्ञान की यत्न कर
ना चाहिये यह दृढ श्लोकसे कहते हैं कि यह अश्वत्थरूप दृढ
मूल संसार को अहं ममता त्यागरूप दृढ असंगस्वरूप सम्यक
विचार से छेदन अर्थात पृथक करके १

चौपाई

नाऽहं रूपमिले त्यौं जोई अंत न मध्य लखैं पुन कोई अश्व
त्थ को जो दृढ मूलहि दृढ असंग शस्त्र सें छेदहि १

ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न नि
वर्तंति भूयः तमेव चाद्यं पुरुषं प्रपद्ये यतः
प्रवृत्तिः प्रसृता पुराणी ४

शांकरभाष्य टीका १

तत इति ततः पश्चात् यत् पदं वैष्णवं तत् परिमार्गितव्यं परिमा
र्गितव्यं परिमार्गणमन्वेषणं ज्ञातव्यमित्यर्थः यस्मिन् पदे गताः
प्रविष्टा न निवर्तंति नावर्तंते भूयः पुनः संसाराय कथं परिमा
र्गितव्यमित्याह तमेव च यः पदशब्देनोक्त आद्यमादौ भवं आद्यं
पुरुषं प्रपद्य इत्येवं परिमार्गितव्यं तच्छरणतयेत्यर्थः कोसौ पु
रुष इत्युच्यते यतो यस्मात् पुरुषात् संसारमायावृक्षप्रवृत्तिः प्र
सृता निःसृतैन्द्रजालिकादिव माया पुराणी चिरंतनी ४

आनंदगिरिकृत टीका २

उद्धृत्य किं कर्तव्यं तदाह तत इति पश्चादश्वत्थच्छेदं अवस्थितमि
त्यर्थः किं तत् पदं यदन्विष्य ज्ञातव्यं तदाह यस्मिन्निति येन सर्वं पू
र्णं पुरि वा शयानं पुरुषं प्रपद्ये शरणं गतोस्मीत्यर्थः चित्तवृत्तिर्वा
दान्वेषणं इष्टान्तमाह यत इति ४

स्वामिकृत टीका ३

[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ततस्तस्य मूलभूतं तत् पदं वैष्णवं प
रिमार्गितव्यमन्वेष्टव्यं कीदृशं यस्मिन् गताः प्राप्ताः संतो
भूयो न निवर्तंते पुरुषं तेनाववर्तनेनेत्यर्थः अन्वेषणप्रकारमेवाह
यतः पुराणी चिरंतनी संसारप्रवृत्तिः प्रसृता विस्तृता तमेव
चाद्यं प्रपद्ये शरणं व्रजामि इत्येवमेकांतभक्त्यान्वेष्टव्यमित्यर्थः ४

५ तै

पिशाचभाष्य टीका ४

ततः पश्चात्तत्पदं वैष्णवं परिमार्गितव्यमन्वेष्टव्यं ज्ञातव्यमित्यर्थः
कथं परिमार्गितव्यमित्याह तमेव विश्वमाद्यमादिभवं पुरुषं
जगत्पूर्वकं प्रपद्ये शरणं गच्छामि यतः यस्मात्संसारमायाप्रवृ
त्तिः प्रवृत्तिराविर्भावः प्रसृता निःसृता पुराणी नित्या इति ४

+कथमनादिकालप्रवृत्तो गुणमयभोगसंगस्तन्मूलं च
विपरीतज्ञानं निवर्त्तत इत्यत्राह॥

रामानुजभाष्य टीका ५

+तत इति अज्ञानादिनिवृत्त्यये तमेव चाद्यं कृत्स्नस्यादिभूतं मयाध्य
क्षेण प्रकृतिः सूयते सचराचरं अहं सर्वस्य प्रभवो मत्तः सर्वं प्रव
र्त्तते मत्तः परतरं नान्यत्किंचिदस्ति धनंजयेत्यादिषूक्तमाद्यं तमे
व शरणं प्रपद्येत यतः यस्मात्कृत्स्नस्य सृष्टिरियं गुणमयभोग
संगप्रवृत्तिः पुराणी पुरातनी प्रसृता उक्तं हि मयैव पूर्वं मम
दैवी ह्येषेति प्रपद्ययतः प्रवृत्तिरिति वा पाठः तमेव चाद्यं पुरुषं प्र
पद्ये शरणमुपगच्छेदिति यतः अज्ञाननिवृत्त्यादेः कृत्स्नस्यैतस्य
साधनभूता पुराणी प्रवृत्तिः प्रसृताः पुरातनानां मुमुक्षूणां प्र
वृत्तिः पुराणी पुरातनानामुमुक्षवो मां शरणमुपगम्य निर्मुक्तबं
धाः संजाता इत्यर्थः ५

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं ४ ॥

परमार्थप्रपा टीका ७

किं कर्तव्यमित्याह तत इति ततस्तस्मात्संसारतरोः परमुत्कृष्टं मू
लभूतं यत्पदं स्थानं प्रागुक्तं विष्णोः परमं परं परब्रह्माख्यं तत्परि
तः सर्वशस्तं मार्गितव्यं सद्गुरुणा विवेकोपलक्षितेन मार्गितव्यं
बोद्धव्यं नकिं पदं यस्मिन्गताः प्रविष्टाः सन्तो भूयो न निवर्तंते पुन
रावृत्तिं न प्राप्नुवंति अथ किमाकारेण प्रविष्टा इत्याह तमेवेति
तमेवाद्यं ज्योतिःस्वरूपं जानन्नस्मत्स्वामिनं प्रपद्ये शरणं व्रजा
मि तं कं यतः पुराणी अनादिप्रवाहरूपा प्रपंचप्रवृत्तिः प्रसृता
विस्तृता तमधिकरणरूपमित्यर्थः अथ क्रमेण श्रवणपश्चात्तत्र

असंगशस्त्रेण दृढेन छित्त्वेत्यत्र अश्वलोपनिषदुक्ता श्रुतिः न कर्मणा
न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः परेण नाकं निहितं गुहायां
विभ्राजदेतद्यतयो विशन्तीति भाष्यं एके योगिनस्त्यागेनैव परेण
त्कृष्टेन वैराग्येण अमृतत्वमानशुः प्रापुः परं तु न कर्मणा
फलाभिसंधिकृतेन न प्रजया नापुत्रस्य लोकोऽस्तीति श्रुतेः न ध
नेन नलापुरुषादिद्रव्ययोगेन अमृतत्वं किं नाम अमृतत्वाय यतयः
संन्यासिनो विशन्ति कथं तादृशा विशन्ति नाकं स्वर्गमलौकिकं गुहा
यां हृदयाकाशे निहितं निधिवद्गोपितमपि विभ्राजते अर्थप्रका
शकत्वेन शोभते ततः पदं तत्पारमार्थिकं न त्वाभिन्य तत्र शान्तमधीश्व
तिः तदप्येते श्लोकाः अग्निः पश्चाद्वितत्य [illegible] माहस्स हानुविशो
यं यैव तेन धीरा अपि यन्ति ब्रह्मविदः उत्क्रम्य स्वर्गलोकमितो विमु
क्ताः तस्मिन् शुक्लमुत नीलमाहुः पिंगलं हरितं लोहितं च एष
पन्था ब्रह्मणा हानुवित्तस्तेनैति ब्रह्मवित्तैजसः पुण्यकृच्चेति मा
ध्यं तत्रार्थः श्लोकाः वदोपनिषद्याः मन्त्रा अपि संतीति यानवत्सलो व
दन्ति तेऽर्थ्यं अणुः सूक्ष्मः सम्बुलो [illegible] पन्थाः मार्गोऽस्ति वि
ततो विशिष्टतरः पुराणो नातिसिद्धः मां स्पृष्टः मया प्राप्तः अनन्तरं
मयैव अनुवित्तः अनुष्ठितः तेन मार्गेण हृत्वा धीरा ध्यानिनो योगिनः
ब्रह्मविदः ऊर्ध्वं क्रम्य स्वर्गलोकं धूममध्यमपि निगच्छन्ति किंभूता इतः
प्रपञ्चाद्विमुक्ताः तस्मिन्नाडीभेदेष्विमाह शुक्लमित्यादि पथप्रयोगी
न केवलं मयैवानुष्ठितः किं तु ब्रह्मणा ध्यानविनानुष्ठितः तेन ब्रह्म
विद्वान्यैव तावत्पुण्यकृदनुष्ठाता तैजसः प्रकाशात्मा एति प्राप्नोति

ततो गुरूपसत्तनतो भाष्यहृत्तार्थं ईदृशं व्यवस्थितेन तदेतत्सर्वं पदं य
यतयः इति पदं स्वरूपं वेदान्तवाक्यैः पारिमार्गिकव्याख्यानवर्णादिनान्वे
षणं यस्मात्वेष्टव्यः स विजिज्ञासितव्य इति श्रुतेः यस्मिन्पदे गताः
साक्षात्कारेण प्रविष्टाः साधर्म्यरूपं सायुज्यं शमाश्रयणं ते निव
र्तन्ति न निवर्तन्ते भूयः पुनः संसारे न पतन्तीत्यर्थः पारिमार्गिकाम

कारमाह तमेव चाद्यं सर्वादौ विद्यमानं पुरुषं येनेदं पूर्णं तं पुरुषं पूरु
षेवाशयानं सर्वान्तर्यामिणं प्रपद्ये शरणं गतोस्मीत्येवं तदेकशर
णतया तदन्वेष्टव्यमित्यर्थः तं कं पुरुषं यतो यस्मात्पुरुषात्प्रवृ
त्तिः संसारस्रष्टत्प्रवृत्तिः पुराणी चिरंतनप्रवाहादि[illegible] सृता तेन जग
त्कारणं पुरुषं प्रपद्य इत्यन्वयः ४

ऊनमवैजयन्ती टीका ४

किं च ततः पदमिति तनोर्विषयासंगाद्धेतोः यद्वा ततः संसारा
श्वत्थाद्धृतमूलात्परिशिष्टं तत्पदं वैष्णवस्थानं वैकुण्ठं परिमा
र्गितव्यं सत्संगलब्धश्रवणकीर्तनादिसाधनैरन्वेष्टव्यं कीदृशं त
त्पदमित्यपेक्षायामाह यस्मिन्निति यस्मिन्विष्णुपदे गताः भक्तिज्ञा
नवैराग्यैः साधनैः प्राप्ताः जना भूयः पुनर्न निवर्तन्ति पुराणं तथा
स्वर्गादिवत्संसारे न पतन्ति नन्वनादिकालप्रवृत्तो गुणमयभो
गसंगस्तन्मूलविपरीततां न चकथं निवर्तन्ते इत्याशंक्यानादित्वेऽपि
तस्य सोपायं वैराग्यमाह तमेवेति यतो यस्मान्निखिलविदचिदात्मक
जगत्स्रष्टुः सर्वेश्वरात्पुरुषाद्भगवतः प्रवृत्तिः पुराणी पुरातनी प्रवृत्तिर्गु
णमयभोगसंगात्मिका प्रसृता विस्तृता भवतीत्यर्थः तथैव प्र
वृत्तिः सूचनेऽस्मिन्गीतावरे अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते मत्तः
परतरं नान्यत्किंचिदस्ति धनंजयेत्यादि श्रुतं तमेव चाद्यं सर्वकारणं
पुरुषं विदचिदंतरात्मानं प्रपद्येत शरणं व्रजेत दैवी ह्येषा गुणम
यी मम माया दुरत्यया मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते इत्यानु
कूल्यं तृणाय मन्निरपेक्षया प्रपद्येव गुणमयभोगसंगोत्तानं च
निवर्तन्ते इत्यर्थः प्रपद्य यतः प्रवृत्तिरिति पाठे तमेव चाद्यं पुरुषं
प्रपद्ये शरणमुपगम्येति यतो ज्ञाननिवृत्त्यादेः कृत्स्नस्यैतस्य सा
धनभूता पुराणी प्रवृत्तिः प्रसृता पुरातनानां मुमुक्षूणां प्रवृत्तिः
पुराणी पुरातनी मुमुक्षवो मां शरणमुपागम्येति मुक्तिं वंथा
[illegible] भवन्त्वित्यर्थः ४

मधुसूदनी टीका ४

ततो गुरुमुपसृत्य ततो यत्नादूर्ध्वमवस्थितं तत्तद्वैष्णवं पदं वेदि

नवाक्यविचारेणपरिमार्गितव्यं[illegible]यंअन्वेष्टव्यंसोन्वेष
व्यः सविज्ञा[illegible]सितव्य इति श्रुतेः तत्पदं श्रवणादिनाज्ञातव्य ननिवर्तन्ति
मित्यर्थः किंतत्पदंयस्मिन्पदेगताः प्रविष्टास्तानेनावर्तंतेभूयः
पुनः संसाराय कथंतत्परिमार्गितव्यमित्याह[illegible]यः पदशब्देनो
क्तः तमेवचाद्यमादौभवंपुरुषंयेनेदंसर्वंपूर्णंतेपुरुषंपुरु पुरुष
षवाशयानंप्रपद्येशरणंगतोस्म्येवंतदेकशरणतयातदन्वेष तं
णमित्यर्थः तंकंपुरुषंयतोयस्मात्पुरुषात्प्रवृत्तिः मायामय
संसारप्रवृत्तिः पुराणीचिरंतनीअनादिरेषाप्रसृतानिः
सृतायेंद्रजालिकादिवमायाहस्त्यादिर्नपुरुषंप्रपद्येइत्यन्व
यः [illegible]

नीलकंठीटीका

तमिममसुरत्वं हित्वा किंकर्तव्यमत आह तत इति न केवलं
निर्विकल्पसमाधिना तदसंगमात्रेण कृतार्थता किं तर्हि ततोऽसं
गानंतरं तत् श्रुतिप्रसिद्धं पदं पदनीयं ब्रह्म परिमार्गितव्यं श्रुतियु
क्तिबलेनाहमेव ब्रह्मास्मीति ज्ञातव्यं यस्मिन्पदे निर्विकल्पे गताः
प्राप्ताः संतो न निवर्तंते भूयः पुनर्न निवर्तंते तमेव चाद्यमानंदमाद्यं पुरु
षं पुरि शरीरे शयानमहमपि प्रपद्ये शरणं गतोऽस्मीति भावयेत्
भगवत एव वा इदं वचनं लोकशिक्षार्थं वर्तत एव च कर्मणीतिव
त्। कोऽसौ पुरुषः यतः पुराणी आद्या प्रवृत्तिः सोऽकामयत बहु
स्यां प्रजायेयेति इत्येवं रूपा प्रसृता अस्मास्वपि प्रवृत्ता यतो वय
मपि इदानीं कामयामहे धनादिना वयं भूयांसः स्याम प्रजया प्र
जायेमहीति चेति येनेयं प्रवृत्तिर्दर्शिता तं तच्छरणमेवमेव मानिवर्ति
ष्यत इत्यर्थः ४

आनंदी टीका

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ततः परं विवेकख्यातेरुत्तरं तत्पदं परिमार्गितव्यम
न्वेषितव्यं यस्मिन्गते न निवर्तंते भूय इति कैवल्यप्राप्त्युपदेशः
तथा चोक्तं योगानुशासने दृष्टानुश्रविकविषयवितृष्णस्य वशी
कारसंज्ञा वैराग्यमिति अस्यार्थः स्त्र्यन्नपानैश्वर्यादिवितृष्णस्य स्व
र्गवैदेह्यप्रकृतिलयत्वाद्यानुश्रविकविषयवितृष्णस्य दिव्यादिव्य
विषयसंप्रयोगेऽपि विषयदोषदर्शिनश्चित्तस्य प्रसंख्यानबलाद

नाभोगात्मिका हेयोपादेयशून्या वशीकारसंज्ञा वैराग्यं ॥ तत्परं पुरुषा
ख्यातेर्गुणवैतृष्ण्यं ॥ अस्यार्थः दृष्टानुश्रविकविषयदोषदर्शी पुरुषो ऽभ्यासा
त्तत्त्वशुद्धिप्रविवेकाप्यायितबुद्धिर्गुणेभ्यो व्यक्ताव्यक्तधर्मेभ्यो विरक्त इ
ति तद्द्वयं वैराग्यं ॥ तत्र यदुत्तरं तज्ज्ञानप्रसादनमात्रं यस्योदये प्रत्युदितख्या
तिरेवं मन्यते प्राप्तं प्रापणीयं क्षीणाः क्षेतव्याः क्लेशाः छिन्नः श्लिष्टपर्वा भवसंक्र
मो यस्याविच्छेदाज्जनित्वा म्रियते मृत्वा च जायते इति ज्ञानस्यैव परा काष्ठा
वैराग्यं एतस्यैव नान्तरीयकं कैवल्यमिति ॥ पुराणीप्रवृत्तिः सर्वोत्पन्नमस
क्रमितीत्यं विवेचितमादिसर्गात्प्रभृति लिंगस्य संसरणं यतो यस्मात्पुरु
षात्प्रसृता विस्तारं प्राप्ता तमेवाद्यं पुरुषं पुरुषोत्तमं परमात्मस्वरूपं महमा
त्मा प्रपद्ये तेन सहैकीभवामीति ॥

रामकंठीटीका

यत्नं यथावत्प्रतिपादितस्वरूपं देवदत्तानां क्लेशनिमित्तकर्मानुरूपपरिपाका
[illegible]वायिकरणभूतभुवनतलातलकमसत्यं नतत्वार्थ्यादृश्यत्वेन निरू
पितमतएव सर्वविश्वफलमूलं तत्कृदार्व्वैनाविविधं कृत्वाहृफलानि प्ररोहंत्या
[illegible]लेशायव मूलानि यस्यं ततादृशमसंगशस्त्रेण [illegible] यद्रूपगा
[illegible]विवेकपाषाणक[illegible]वशाच्छितेनतीक्ष्णेन कर्यारे
[illegible]छित्वा मूलतो [illegible] ततोनन्तरं पुनः पुनः प्रतिपादितस्वरूपप
दनिरुत्तरं यथा ममार्गमन्वेषणीयं कीदृशं यस्मिन्प्राप्तो योगी भूयो न निवर्त
ते पुनः संसारवर्त्मनि नाविर्भवेत् अकृत्रिमस्वभावविश्रान्तिलक्षणं मोक्षम
वाप्नुयात् यस्मादेतस्मिन्नेव परप्रकाशावरणहेतो महति विघ्ने यथोक्तस्व
रूपेण विहते सति योगी यदेतदुक्तं व्यवधानविच्छेदाद्योगी प्राप्नुयात्स एव प
रमः पुरुषः परमकारणं परमात्मा तत्तस्मिन्पदं प्राप्ते परं पुरुषं प्रपद्ये तत्स्व
मापन्नो भवेद्योगीत्यर्थः कं तं परं पुरुषं प्रपद्ये यतो यस्मादेकस्मात्सर्वकार
णभूतात्पुराणी प्रवहमानत्वाच्चिरंतनी प्रवृत्तिर्यथा प्रतिपादितजगत्क्रीड
नकनिर्माणात्मिका क्रिया प्रसृता इत्थमवभासमानत्वात्प्रकर्षेण सृता
गता व्यापिनी संवृत्तेत्यर्थः किमुक्तं भवति यदेव परपदप्राप्तिलक्षणं पर
मात्मस्वभावविश्रान्तिरूपं जायते तदेव तदिच्छामात्रैककारणत्वं जगद्वै
चित्र्याभासस्य योगिनः प्रतिपद्यते तत्पर ॥

लासिकी टीका

गी॰
टी॰
५

ततस्तस्मादीश्वरात्तत्पदं मोक्षरूपं प्रशान्तं पदं परिमार्गितव्यं याचितव्यं
किं तदिति विशेषेणाह यस्मिन्पदे गताः सन्तो न निवर्तन्ति संसारे भूयो ना
वर्तन्ते ननु तं कोनापि अनुपलब्धस्वरूपादीश्वरात्कथमन्याहृत्या वह पदं याच्ञा
उपपन्नेत्यत आह कार्यलिंगेन तमनुमाप्य याचनप्रकारमाह तमेवेति तमे
वाद्यं पुरुषमीश्वररूपं प्रपद्ये शरणं व्रजामि नेकमित्याह यतो यस्मादीश्वरा
त्पुराणी चिरंतनी संसारप्रवृत्तिः प्रसृता निर्गत्य विस्तृतिमापन्ना

पंचोले टीका

ततः पश्चात्तद्वैष्णवं पदं परिमार्गितव्यं ज्ञातव्यं यस्मिन् गताः प्राप्ताः ।
प्रविष्टाः भूयः पुनरपि संसारे न निवर्तन्ते परिमार्गस्य प्रकारमाह
तमेवेति परमात्मवाच्यमाद्यं पुरुषमहं प्रपद्ये तच्छरणागतो भवामि
इति ज्ञेयं यतः संसारवृक्षस्य प्रवृत्तिः पुराणी चिरंतनी प्रसृता निः
सृता ४ ॥

रामवीरसमिश्रदीपिनी॥

तत इति ततो यज्ञवेदाध्ययनाभ्यासाभ्यामनंतरं तत्पदमिति तद्यथा
वर्णाश्रमधर्मनिष्ठ यत्नेन प्रतिष्ठ पदं व्यवसितिमात्मस्थानलक्षणं त्रि
वर्गविषयत्यागपूर्वं मनसा पदं वस्तुस्वरूपमेतद्रूपं परिमार्गितव्यमन्वेष्ट
व्यमतितीव्रेण यत्नेनार्जनीयमिति यावत् तथा च श्रुतिः सोऽन्वे
ष्टव्यः स विजिज्ञासितव्य इति अस्यार्थः स्वस्ववर्णाश्रमोचितो यमे
वेष्टव्यो जैनीयो विजिज्ञासितव्यो विशेषेण संदेहराहित्येन ज्ञातु
मिष्टव्य इति यस्मिन्निति अत्र निमित्तसप्तमी यत्पदं स्वधर्मवस्तु
निमित्तीकृत्य गता गतप्राणाः त्रिविधप्रवीणा भूयः पुनर्न निवर्तन्ते
नावर्तन्ते सम्यक्पालितस्वधर्माणां धन्यवैदायिकादिरणानि कल्म
षवात्परमपदाधिगतो न पुनः संसारावृत्तिर्भवतीत्यर्थः तमेवाद्यं
श्रुतिरप्याह न स पुनरावर्तते इति अतः स्वधर्मे नियतं श्रेय इति एवं

यदुक्तं तदुपपन्नं भवति कथं परिमार्गितव्यमित्यपेक्षायां
भवति तमेवेति आदौ भवमाद्यपुरुषं सर्वस्य यन्त्रवेदस्य वी
जभूतं प्रपद्येत तदनुशिष्टानुष्ठानेन संसेवे भगवतानानावता
रेषु साधवः परित्राता असाधवो नाशिता दुष्टवलिष्ठविपी
ड़ी चातुर्वर्ण्यं पुनर्मर्यादामवापितमित्यस्मान्प्रति च तदेवा
नुशिष्टमतो ऽहमपि तदनुष्ठानेन भगवन्तं संतोष्येइति यन्त्र
वेदबीजभूतत्वमेव विवृणोति यत इति यतो यस्मादाद्य
कथास्तरणी विवस्वन्तमारभ्याद्य यावद्कुकालीनाप्रवृत्ति
र्यन्त्रवेदमयी प्रस्तुतापरंपरोपदेशेन प्रसारंगता अयमत्राभि
प्रायः भगवतास्मान्प्रति यन्त्रवेदस्य रहस्यं स्वर्गापवर्गभोग्य
यानुशिष्टमस्माकं च तदवश्यमनुष्ठेयमित्येवमां प्रपन्नाः न
त्रियप्रवरास्वधर्ममार्गरता योगयुक्ता अश्वर्णकामा अंतराले
एवं यदि विपद्येयुस्ते स्वधर्मनिमित्तीकृत्य विगतभवोन पुनः
संसारायावर्त्तते इति ४ ॥

मधुभाष

४॥

भाषाअनुवादटीका

तदनन्तर संसारके मूल कारण स्वरूप तत्पदसे कहे जाते जिस ईश्वरपद को अन्वेषण करनाउचित हैं सोपद कैसाहै इस अपेक्षापर कहते हैं कि जहां जायकर फेर और संसार आवर्तन कहे आवागमनहोना नहीं और भगवतपद ढूंढने की रीति कहते है कि जिससे इस पुराने संसार की प्रवृत्तिभई है उसी आदिपुरुषके शरणागत होते हैं इसीतरह एकान्त भक्तिके द्वारा ढूंढे ४

चौपई

ताते सोपद लखणो योग। यामेंजाय न हटें फिरलोग
आदिपुरुषकीशरणहूंहोई प्रवृत्तिपुराणीजासें होई ४॥

निर्मानमोहाजितसंगदोषाअध्यात्मनित्याविनि
वृत्तकामाः द्वंद्वैर्विमुक्ताःसुखदुःखसंज्ञैर्गच्छं
त्यमूढाःपदमव्ययंतत ५

शांकरभाष्यटीका १

कथंभूतास्तत पदं गच्छंतीत्युच्यते निर्मानेति निर्मानमोहामान
श्च मोहश्च मानमोहौ तौ निर्गतौयेभ्यस्ते निर्मानमोहाः मान
मोहवर्जिताः जितसङ्गदोषाः सङ्गएव दोषः सङ्गदोषःजितः
सङ्गदोषोयैस्ते जितसङ्गदोषाअध्यात्मनित्याः परमात्मस्वरू
पालोचने नित्यास्तत्पराःविनिवृत्तकामाः विशेषतोनिर्लेपेनवि
निवृत्ताः कामायेषां तेविनिवृत्तकामायतयः संन्यासिनोद्वन्द्वैः प्रि
याप्रियादिभिर्विमुक्ताः सुखदुःखसंज्ञैः परित्यक्ताःगच्छन्त्यमू
ढामोहवर्जिताः पदमव्ययं तत्यथोक्तं ५

आनंदगिरिकृत टीका २

परिमार्गणपूर्वकं वैष्णवं पदंगच्छंतांसत्तांतराण्याकांक्षापूर्व
कं कथयति कथमित्यादिना मानोहङ्कारः मोहस्त्वविवेकः जि
तसङ्गदोषाः शत्रुमित्रसन्निधावपि द्वेषप्रीतिवर्जिताइत्यर्थः त
त्परत्वं श्रवणादिनिष्ठत्वं सन्न्यासिनोवैराग्यद्वारात्यक्तसर्वकर्माण
इत्यर्थः आदिशब्देन तद्धेतुग्रहः मोहवर्जितत्वमस्त्रकाहेतुतः स
ज्ञातसम्यग्धीत्वं ५

स्वामिकृत टीका ३

तत्प्राप्तौसाधनांतराणिदर्शयन्नाह निर्मानेति निर्गतौमानमोहौ
अहंकारमिथ्याभिनिवेशोयेभ्यस्ते जितः पुत्रादिसंगरूपोदोषोयैः
अध्यात्मेआत्मज्ञानेनित्याः प्रतिष्ठिताः विशेषेणनिवृत्तः कामोये
भ्यः सुखदुःखहेतुत्वात्सुखदुःखसंज्ञानि शीतोष्णादीनिद्वंद्वा
नितैर्विमुक्ताअतएवामूढानिवृत्ताविद्याः संतः तदव्ययंपदं
वैष्णवंगच्छंति ५

पिशाचभाष्य टीका ४

कृतं चेतस्तत्तया जितसंगदोषाः जितः संगो विषयसंकल्प एव दो
षः जितः संगो दोषो यैः ते जितसंगदोषाः विषयसंकल्परहिता इत्य
र्थः अध्यात्मनित्या आत्मज्ञाननिरताः विनिवृत्तकामाः त्यक्तका
माः द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैः सुखादिशब्दवाच्यैः गच्छंतिप्रा
प्नुवंति अमूढाः विवेकिनस्तत्तैस्तवं पदं अविनाशि ५

श्रीरामानुजभाष्य टीका ५

निर्मानेति एवं मां शरणमुपगम्य निर्मानमोहाः निर्गतमोहाः अ
नात्मन्यात्माभिमानरहिताः जितसंगदोषाः जितगुणमयभोग
संगाख्यदोषाः अध्यात्मनित्याः [illegible] आत्मनियतज्ञाने
तदध्याने आत्मज्ञाननिरताः विनिवृत्तमदितरकामाः सुखदुः
खसंज्ञैर्द्वंद्वैर्विमुक्ताः अमूढाः आत्मानात्मस्वभावज्ञाः
तदव्ययं पदं गच्छंति अनवच्छिन्नज्ञानाकारमात्मानं यथावस्थितंप्रा
प्नुवंति मां शरणमुपगतानां मत्प्रसादादेव ताः सर्वाः प्रवृत्तयः
सुशकाः सिद्धिपर्यंता भवंतीत्यर्थः ५ मा॰

अभिनवगुप्तकृत टीका ५

अनेन शास्त्रोक्तेन रेषु यत्नः क्रियते अस्यार्थः सर्वैः सपर्वोपासनीयस्मादि तस्य
भगवद्भक्तोपासनानामर्थमित्युच्यते मूले प्रशांते तूर्ध्वपत्रहर्षेहि निवृ
त्तस्यैतदाभिः छंदांसि पर्णानीत्येव यथाहु तत्प्रमानत्वफलत्वस्
रसत्वादयः पर्णैः सूच्यंते एवं तस्य वेदोपलक्षितशाखाद्य
धिकाप्रतीतिरित्याख्यायते गुणैः सत्वादिभिः प्रवृद्धा देवादिरूपाव
रोहतया तस्य शुभाशुभात्मकानि कर्माणि एव तन्मूलानि तैरवि
च्छिन्नविशेषक्रियाभिधीयमानासामर्थ्यादत्र विशेषणपदमुपा
यत्ने हदीश्वेषानत्तूयादिति विधिवत् तेनायोन्नूढानि मूलान्य
स्याच्छिंद्याद्विति तत्पदं प्रशांतं अव्ययं पदं तदेव ५ सर्वतो॰

परमार्थप्रपा टीका ५

अथ परं तो विमुक्ता इति प्रथमं प्रकाश्य चाह निर्मानमोहा इति निर्ग
तौ मानमोहौ अहंकाराभिध्याभिनिवेशौ येभ्यः जितः पुत्रादिसं

गद्दोषो येस्ते अध्यात्मज्ञाने नित्याः परिनिष्ठिताः विशेषेण निवृत्तः
कामो येभ्यस्ते सुखदुःखसंज्ञा निशीतोष्णादीनि तैर्विमुक्ता एवं
विधास्तदव्ययपदं गच्छंति नाम्ने ५

वनमाली टीका ८

परिमार्गणसाधनान्तराण्याह निर्मानेति मानो हंकारो गर्वः मो
हस्त्वविवेको विपर्ययो वा ताभ्यां निर्गता निर्मानमोहाः तैर्निर्ग
तो येभ्यस्ते वा तथा जितसंगदोषाः प्रियाप्रियसंनिधावपि रागद्वे
षवर्जिताः अध्यात्मनित्याः परमात्मस्वरूपालोचनतत्पराः विनि
वृत्तकामा विशेषतो निवृत्ताः कामा भोगाभिलाषा येषां ते द्वंद्वैः
शीतोष्णक्षुत्पिपासादिभिः सुखदुःखसंज्ञैः सुखदुःखहेतुत्वा
त्सुखदुःखनामकैः विमुक्ता इति अमूढाः रजस्तमोमुक्ताः ज्ञान
पूर्णाः वै विस्मरहिता इत्यर्थः एतादृशास्तदव्ययंपदं गच्छंति ५

ऊसम वैजयन्ती टीका ९

ननु येत्वत्पदं प्राप्नुवंति तेत्वत्प्रपन्निमन्तो जनाः किंलक्षणा भवंती
ति चेत्तत्राह निर्मानमोहा इति मानः सत्काररजन्यो गर्वः मोहो मिथ्या
भिनिवेशस्ताभ्यां निर्गताः अनात्मन्यात्माभिमानरहिता इत्यर्थः
जितसंगदोषाः जिता गुणमयभोगसंगाख्याः प्रियमाषादिस्तेहलक्ष
णा वा दोषा यैस्ते तथा निर्मानमोहा जितसंगदोषा इत्येकपदं वा अ
जितस्य श्रीकृष्णस्य संगस्तन्निरूपणलिप्सेदोषाविद्यकामरागा
जितसंगदोषा अतथा निर्गता मानमोहा जितसंगदोषा येभ्य
स्तथा यद्वा मानमोहाभ्यामजितसंगं कृष्णप्रपन्नजनं दृषयंति
तिरस्कुर्वंति निंदंति वेति मानमोहाजितसंगदोषा येभ्यस्ते
तथा इतरदेवोपासकास्तेनिर्गता हरीकृता यैस्ते तथा कृष्णान
न्यभक्ता इत्यर्थः यद्वा अजितसंगसंयोगं ददातीत्यजितसंगदात
इकिस्तामोषन्ति दहंतीति शब्दादि विषयाः मानमोहाभ्यामजि
तसंगदोषाः मानमोहाजितसंगदोषाः निर्गतास्ते येभ्यस्ते तथा
यद्वा निर्गतौ मानमोहौ येभ्यस्ते तथा आसमंता जिताः प्राकृत
गुणविषयसंगापवदोषा यैस्ते तथा ते वनेचरतथा अध्यात्मनि

त्याः आत्मनिपदृष्तानेनतदध्यात्मंतन्नित्यंनित्यानिरतायद्वाअध्यात्मे
स्वपरात्मनिविषयकोविमर्शः सनित्योनित्यकर्मत्वायेषांतेन
त्याविनिवृत्तकामाः विशेषेणनिवृत्ताः आत्मज्ञानेन कामायेभ्यो
वातेतथापकंपदेवाअध्यात्मनित्याश्चतेआसमंताद्विनिवृत्तका
माश्चतेनतथा यद्वाएवासद्देवविशेषेणनिवृत्ताअर्पिताः कामाअ
भिलाषायैस्तेतथाआद्वासदेवाद्विनिवृत्ताः कामायेषांतेतथा
वातेचतेचतथाशीतोष्णादिनिमित्तकैः सुखदुःखःसंज्ञैःसुखत्वाभि
वसंज्ञानामयेषांतेद्वंद्वैर्विमुक्तायद्वासुखदुःखःत्वानांसंज्ञासम्य
क्ज्ञानंयेभ्यस्तेद्वंद्वैःशीतोष्णादिभिर्विमुक्ताः अतएवअमूढाः
मोहशून्याः प्रपंचाभिन्नाइत्यर्थः जनाः अव्ययंजन्ममरणादिष
ड्विकारशून्यंतत्पदंप्रकृतिगुणसंबंधरहितंज्ञानैकाकारंअ
हमात्मस्वरूपंप्राप्यमन्यस्वरूपंगच्छंतिप्राप्नुवंतिमच्चरणप्र
मानोमत्प्रसादादेवमत्प्राप्तिपर्यंताः निर्मानमोहादिलक्ष
णाः सर्वाः प्रवृत्तयः सफलाभवंतीत्यभिप्रायः ५

+परिमार्गणपूर्वकंवेत्तव्यंपदंगच्छंतामत
राएणाह ॥

मधुसूदनी टीका ९

+मानोहंकारोगर्वः मोहस्त्वविवेकोविपर्ययोवाताभ्यांनिष्क्रां
तानिर्मानमोहाः तौनिर्गतौयेभ्यस्तेवातथा अहंकाराविवे
काभ्यांरहिताइतियावत् जितसंगदोषाःप्रियाप्रियसन्निधा
वपिरागद्वेषवर्जिताइतियावत् अध्यात्मनित्याः परमात्मस्वरूपा
लोचनतत्पराः [illegible] द्वंद्वैः शीतोष्णक्षुत्पिपासादिभिः
सुखदुःखसंज्ञैःसुखदुःखहेतुत्वात्सुखदुःखनामकैः सुखदुःख
खसंगैरितिपाठांतरे सुखदुःखाभ्यांसंगः संबंधोयेषांतैः सु
खदुःखसंगैर्द्वंद्वैर्विमुक्ताः [illegible] अमूढाः वेदांतप्रमाणसंजात
सम्यग्ज्ञाननिवारितात्माज्ञानाः तदव्ययंपदंयथोक्तंपदंगच्छंति

[illegible] ५

^विनिवृत्तकामाः विशेषतो निरवशेषेण निवृत्ताः कामा विषयभोगा येषां ते विवेकवैराग्यद्वारा त्यक्तसर्वकर्माण इत्यर्थः [illegible]

^परित्यक्ताः

मदानंदी टीका ११

नीलकंठीटीका

एवमैकांतिकस्यस्वरूपस्याच्छादकेसंसाराश्वत्थेतच्छेदकमसंग-
शास्त्रंचोक्त्वातस्यस्वरूपस्यप्राप्तावधिकारिणंतस्यस्वरूपंचाह द्वाभ्यां
निर्मानेति मानोदर्पः मोहोविपर्ययस्तद्रहिताः निर्मानमोहाः जित
संगःकर्ताहमित्यभिमानःदोषोरागादिश्चयैस्तेजितसंगदोषाः अध्या
त्मन्यात्मनिनित्याःनिष्ठावंतःआत्मध्यानपराइतियावत् विनिवृत्तका
माःत्यक्तसर्वपरिग्रहाः द्वंद्वैःसुखदुःखेत्युपलक्षणंशीतोष्णादीनाम
पि तैर्विमुक्ताःस्तितिक्षावंतइत्यर्थः अमूढाः विद्ययाऽविद्यानाशंकृत
वंतः तत्पदंअव्ययंअपुनरावृत्तिंगच्छंतीति ५

आनंदीटीका

मानोगर्वःमोहोनात्मन्यात्मज्ञानंताभ्यांनिर्गताः अतएवजितःसंगस्य
पुत्रवित्तादावासक्तेर्दोषोयैःअध्यात्मनित्याःसदापरमात्मज्ञानैकनिष्ठाः
विनिवृत्ताज्ञानाभ्यासाद्विच्छिन्नाःकामाविषयस्पृहायेषां अमूढास्स
त्वोद्रेकादभिभूतरजस्तमसःतदव्ययंपदंपरमेश्वरसायुज्यंगच्छंतितत्प
देलक्षयंति ५

रामकंठीटीका

अतएव तदव्ययंनित्यत्वादपक्षयादिरहितंपदंस्वाभाविकात्मलक्षणंध्यानम
मूढाःप्रत्युदितज्ञानशक्तित्वात्प्रबुद्धागच्छंतिप्राप्नुवंति तादात्म्यलभ
तेइत्यर्थः कीदृशाः संतोनिर्मानमोहाः अनात्मादिष्वात्मादिप्रत्ययलक्ष
णाभिमानमयान्मोहान्निष्क्रांतायतोजितसंगदोषाःसंगआसक्तिर-
नात्मादौवस्तुन्यात्माभिमानेनगाढनिमग्नचित्तत्वमेवदोषःसंसार
हेतुत्वान्महदवद्यजितास्तिरस्कृतायैस्तेतथाविधाःकथंभूतैःसजेयइ
तिहेतुगर्भविशेषणमाह अध्यात्मनित्याइति अध्यात्ममात्मनिपार-
मार्थिकेस्वस्वभावेनित्याःसदातदेकनिष्ठाइत्यर्थः कथमध्यात्मनित्य
त्वंस्यादितिपूर्ववद्विशेषणंविनिवृत्तकामाइति काम्यन्तइतिकामा
ऐहिकामुष्मिकाइष्टाःशब्दादयोभोगाविनिवृत्तास्तत्त्वज्ञानाभ्यासा
द्विच्छिन्नास्तेयेषांतेतथाविधाःकामाहिवाह्यविषयान्प्रतिचित्तमाक
र्षयंतोध्यात्मनिष्ठांविघ्नयंत्यतोविनिवृत्तकामाअध्यात्मनित्याइत्यके
विनिवृत्तकामत्वंचकथंस्यादितिपूर्ववद्विशेषणमाह द्वंद्वैर्विमुक्ताः-

सुखदुःखसंज्ञैरिति द्वंद्वैः द्वन्द्वत्वस्य शीतोष्णजरामरणादिभिरु
पेतैः तद्विपरीतैरुत्कृष्टमिष्टाद्यादिभिरनित्यशरीराद्यहंकारनिबंधनैः क्ले
शैः सर्वैरेव सुखदुःखात्मकत्वाद्यभिमानैर्विमुक्ताः परिवर्जितास्ते हि
तथाविधा निवृत्तकामा भवंति तदयमत्र क्रमो विवक्षितो ये भगवद
नुग्रहाविर्भूतविवेकजज्ञानत्वात्प्रबुद्धयोगिनो हेयोपादेयविवेकव
मद्बुद्धयो जायंते ते स्वात्माद्यात्मकत्वेन संवेद्यत्वमापन्नास्सर्वान्सुहृत्ता
भवान्हेयत्वेनात्मतत्त्वं च यथाप्रतिपादितस्वरूपमुपादेयत्वेन निश्चि
न्वन्तो हृत्स्वात्मकत्वेन वर्तमानैः क्लेशैर्विमुच्यंते तेभ्यो निवृत्ताश्च तद्धि
यधर्मिणि सहजनित्यानंदमये स्वात्मन्येव नित्यावहिता भवंति तत
श्च वाह्येषु भावेषु प्रतिपादितोपपत्त्या शास्त्रीयकर्मपरित्यागे सति
स्पृश्यमानेष्वपि शरजलदपटलेष्विव वायवो निःसंगा भवंति ततश्च
निःसंगत्वान्निर्मला विच्छिन्नाविपर्ययप्रत्ययाः संतः परमात्मन्येव प
रमार्थसत्त्वे स्वप्रतिष्ठां हृत्प्रतीतयः परमं पदमाप्नुवंति कीदृशं तत् ५

+न तु तत्पदं केनचित्प्राप्तमपीत्याशंक्याधिकारि
स्वरूपं पूर्वं बहूनां तत्प्राप्तिमार्गं करोति ॥

लासिकी टीका

+मानो देहादिष्वात्मप्रतीतिमोहः स्वस्वरूपापरिज्ञानं ताभ्यां निष्क्रांताः स्व
स्वभावपरिज्ञानेन देहाद्यभिमानरहिताः तथा संगो विषयेष्वासक्तिर्जितः
संगरूपो दोषो यैस्ते तथाध्यात्मनित्या नित्यमात्मनि प्रतिष्ठा तथा विशेषे
ण निवृत्ताभिलाषाः एवमभ्यासतारतम्येन सुखदुःखसंज्ञैर्द्वंद्वै रहिताः
नन्वेवं तेषां जडत्वप्रसक्तिरित्याह अमूढाः प्रबुद्धाः एवंविधा अधिकारि
णस्तत्पदं नाशरहितं गच्छंति

पंचोली टीका

अव्ययपदप्राप्तौ साधनान्युपदिशति निर्मानेति निर्मानमोहाः
मानमोहाभ्यां निर्गताः जितसंगदोषाः संग एव दोषो जितो पु
त्रपौत्रादिसंगदोषो यैस्ते जितसंगदोषाः अध्यात्मनित्याः परमा
त्मस्वरूपालोचनपराः विनिवृत्तकामाः येषां ते द्वंद्वैः सुखदुः
खसंज्ञैः विमुक्ताः अमूढाः ज्ञानिनः तदव्ययं पदं ग
च्छंति ५ ॥

रसवीरसमिद्बोधिनी

सम्यग्धर्मप्राप्तौ साधनान्याह निर्माणेति नमत्सम: कोप्य-
न्योयोहमित्येवमात्मानः श्लाघामानः मोहः स्वधर्मस्य शुद्धादेः ग
रादिभ्रमस्त्यागस्तौ मानमोहौ निर्गतौ येभ्यस्ते निर्मानमोहाः
स्वधर्मभूतोयं शुद्धमार्गो वप्रथममनुष्ठेय इत्यस्य कालमनः श्लाघा
केवल ऽवराराधाः प्रतिवेंधरहेतव इति निश्चयवंतस्तथा जितसं
गदोषाः सज्जते कायवाङ्मनोभिर्येषु इति संगा विषयास्तेष
व दोष इद्देतत्वा दोषा जिताः संगदोषा विषयदोषा यैस्ते जि
तसंगदोषा विषयान्परित्यज्य स्वधर्मतत्परा इत्यर्थः अध्या
त्मनित्या अधिअधिको यः आत्मा आत्मा यत्नो हृत्तिर्बुद्धिवि
नुष्ठानमनायत्नस्तस्मिन्यत्ने नित्या नित्यवर्तिनो धिकयत्नव
त इति यावत् विनिवृत्तकामा विनिवृत्तोस्तमितः कामपेहि
को राज्यभोगादिलक्षणप्रमुखिकः स्वर्गापवर्गलक्षणो ध
र्मप्राप्तिकामनयाधेषां ते विनिवृत्तकामा उभयत्र लक्षणेफ
ले निवृत्तस्पृहा इत्यर्थः तथा सुखदुःखसंज्ञैर्द्वंद्वैर्विमु
क्ता जयेसति सुखंमे भवेदन्यथा तु दुःखमिति संकल्परहि
ता अमूढा मोहरहितास्ते सर्वोत्कं नित्यपदं स्वधर्मवस्तु प्रा
प्नुवंतीति भावः यद्वा न हितस्वधर्मोद्दमानास्तत्पदं स्थानं वै
ष्णवं धामप्राप्नुवंतीत्यर्थः ५॥

मधुभाष्य

निर्मानेति स्वरूपं कथयति ५॥

भाषाअनुवादटीका

सोई परमेश्वर की प्राप्ति के विषय मे दूसरी उपाय देखावते हु
ये कहते हैं कि जिन मनुष्यों केमान अहंकार औ मिथ्या वस्तु
मे रुचि नहीं है अर्थात् मानादि दूर हो गये हैं और जिनके पु
त्र स्त्री धन आदि से आशक्ति रूप दोष निवृत्त भये हैं और जि
न को आत्मज्ञान मे भली प्रकारसे निष्ठा है और जिनको वासना
अक्षीनरह निवृत्त हो गई हैं और सुख दुख के हेतु रूप शीत उ
ष्ण हानि लाभआदि द्वन्द्व से अक्षीनरह छूट गये हैं ऐसे जो नि
वृत्त अविद्य कहे ज्ञानीजन है तेई अव्यय रूप को प्राप्त होते हैं ५

चौपई

मान मोह बिन जित संगदोषा अध्यातम नित विगत अभि
लाषा सुखदुख संज्ञक द्वंद्व विमुक्त पंडित जातहैं जो अ
व्ययपद उक्त ५

नतद्भासयतेसूर्योनशशांकोनपावकः यद्ग
त्वान्ननिवर्त्ततेतद्धामपरमंमम ६

शांकरभाष्य टीका १

तदेव पदं पुनर्विशिष्यते नेति तद्धामेति व्यवहितेन धाम्ना सम्ब
न्धः धाम तेजोरूपं पदं नभासयते सूर्यआदित्यः सर्वावभासनश
क्तिमत्वेपि सति तथा नशशाङ्कश्चन्द्रोन च पावकोनाग्निरपिय
द्धाम वैष्णवं पदं गत्वाप्राप्य ननिवर्त्तंते यच्च सूर्यादिभिर्न भासय
ते तद्धाम पदं परमं विष्णोर्ममं पदं यत गत्वान निवर्त्तंतइत्युक्तं ६

आनंदगिरिकृत टीका २

तत्रैव पदे वेद्यं कर्तुरव्यत कर्मेति हेतावपासनतोऽवेद्यं वेदप्रमत्वना
न् प्रेपितिन त्वाक्षिद्धि रित्या शंकाह तदेति उक्तमनूद्यातिपाति य
द्गत्वेति ६

स्वामिकृत टीका ३

तदेवंगंतव्यपदंविशिनष्टि नतदिति यत्पदंसूर्यादयः सर्वावभा
सकाः नप्रकाशयंति तत्प्राप्ययोगिनोननिवर्त्ततेतद्धामस्वरूपंपर
मंमम सूर्यादिप्रकाशाविषयत्वेनजडशीतोष्णादित्वदोषप्रसं
गोनिरस्तः सर्वावभासकोपिसूर्यस्तद्धामभासयितुंनसमर्थः सू
र्येस्तमायतिनिशिसर्वावभासकप्रदीपेवङ्खोपितद्भासयितुमसम
र्थः द्वयोरभावेनिविडांधकारेसर्वविषयप्रकाशोग्निरपितद्धाम
भासयितुमसमर्थः तद्धामवैष्णवंपदंमत्वाप्राप्यननिवर्त्तंते
पुनः संसारिणोनभवंति ६

पिशाचभाष्य टीका ४

यत्परंधामतन्नसूर्योनभासयते नापिशशांकः नापिपावक
स्तत्गत्वा योगिनोननिवर्त्तंते नहिपुनरागच्छंतीत्यर्थः ६

रामानुजभाष्य टीका ५

नेति तदात्मज्योतिर्नसूर्योभासयतिनशशांकोनपावकश्च यद्ग
त्वापुनः ननिवर्त्तंतेतत्परंधामपरंज्योतिः ममसदीयंआदि

श्री· गी·टी· पं·

30

न्द्रादीनामपिप्रकाशकत्वेनास्यपरमत्वंआदित्यादीनांज्योतीषिन:
तानज्योतिष: प्रकाशकानितानमेवहिसर्वस्यप्रकाशकंवाग्यानि
तज्योतीषियैंद्रियसंबंधविरोधितमोनिरसनद्वारेणोपकारका
णिअस्यचप्रकाशकोयोग: नहिरोधिवानादिकर्मतन्निवर्त्तवोक्तं
भगवत्प्रपत्तिमूलमसंगादियज्ञत्वाधुनैनेनिवर्त्तेनेतद्धामपरम
ज्योतिर्मममहिम्नुनिमुनिम्नतोममांशश्चस्पर्धः ९

अभिनवगुप्तकृत टीका ९

सूर्यादीनांतत्रानवकाश: तेषांकालाद्यवच्छेदात वेद्यत्वात्क
रणोपकारकत्वात तस्यतद्दिक्कालानवच्छेदाद्वेदकत्वात्कार
णप्रवर्त्तकत्वात्तदतीतत्वात ९

परमार्थप्रपा टीका १

अथपदंविशिनष्टिनतदिति नत्पदंपरब्रह्मसूर्य: शशांक: पा
वकोऽग्निर्वानभासयतेनप्रकाशयतितस्यभासासर्वमिदंविभाती
तिश्रुते: सूर्यादीनामपितत्प्रकाशभास्यत्वात यद्गत्वापियोगिनो
ननिवर्त्तंते नपरावर्त्ततेतन्ममपरंधामेतिज्ञेयं ९

वनमाली टीका ८

तदेवपदंविशिनष्टिन तदितियद्वैसर्वंपदंगत्वायोगिनोननि
वर्त्ततेतत्पदंसर्वावभासनशक्तिमानपिसूर्योनभासयतेनश
शांकश्चनपावकोऽग्निर्भासयते कुत: सूर्यादीनांप्रकाशनासाम
र्थ्यंतत्राह तद्धामज्योति: स्वयंप्रकाशमादित्यादि: सकलज्योति:
प्रकाशकंपरमंप्रकृष्टंममवासुदेवस्यस्वरूपात्मकं राहो:शि
रइतिवदभेदेषष्ठी नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतो
भांतिकुतोयमग्नि: तमेवभांतमनुभातिसर्वंतस्यभासासर्वमि
दंविभातीतिश्रुते: ९

कृष्णमैथिलयत्री टीका ९

कीदृशंतत्कृतंधामपदमित्यपेक्षायामाहनतद्भासयतेइतिसूर्यो
विषयेंद्रियसंयोगविरोधितमोनिरसनद्वारेणदिवसेसर्वंचट

पसादिवस्तुप्रकाशकोपितज्ज्योतिर्नभासयते तथाशशांकोपिचंद्रोपि
तोतिरसनद्वारावस्तुप्रकाशकोपितज्ज्योतिर्नभासयते तथा
शशांकोरात्रौतमोनिरसनद्वारावस्तुप्रकाशकोपितन्नभासय
तेतथापावकोभौमदिव्योदर्यादिरूपेणावस्तुप्रकाशकोपित
न्नभासयतेममत्वपन्नायत्प्राप्यपुनर्यतःसकाशान्ननिवर्तं
तेसंसारेनप्रादुर्भवंतीत्यर्थः ममसर्वेश्वरस्यपरमेशागाशक्तिविभू
त्यादिभिःसर्वोत्कृष्टेनद्धाममदीमत्स्वरूपंमदंशभूतत्वादात्म
स्वरूपंवामल्लोकंवाभवतीत्यर्थः सर्वेषांसूर्यादिज्योतिर्गणा
नामहमेवप्रकाशकस्तेनमत्प्रकाशस्यमना अतःप्रकाशकंमां
दीपकंघटपटादयश्चनप्रकाशयंतीत्यभिप्रायः ६

तदेवंयदंगत्वंविशिनष्टि॥

मधुसूदनी टीका ६

यद्गत्वेत्येवपदंगत्वायोगिनोननिवर्तंतेतत्पदंसर्वावभासन
शक्तिमानपिसूर्योनभासते सूर्यास्तमयेपिचंद्रोभासको
दृष्टइत्याशंक्याहनशशांकः सूर्याचंद्रमसोरुभयोरप्यस्तस
मयेग्निःप्रकाशकोदृष्टइत्याशंक्याह नपावकः भासतइत्युभय
त्रापिसंबध्यते कुतःसूर्यादीनांतत्रप्रकाशनासामर्थ्यमित्यत
आह तद्धामज्योतिःस्वप्रकाशमादित्यादिसकलजडज्योतिर
वभासकंपरमंप्रकृष्टंममविष्णोःस्वरूपात्मकंपदं नहियो
यद्भास्यःसस्वभासकंनभासयितुमिष्टेतथाचश्रुतिः नतत्र
सूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः तमे
वभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीतिपद्यते
नतत्पदंवैचमवेयंवा आदित्येवचाभिन्नवेदितत्सापेदत्वेन
हेतापत्तिर्हितीयत्वःपुरुषार्थत्वापत्तिरित्यपास्तं अवेद्यत्वेस
त्यपिस्वयंप्रकाशत्वात् नत्वावेद्यत्वं सूर्याद्यभास्यत्वेनाद्योक्ते
सर्वभासकत्वेनत्स्वयंप्रकाशत्वंयच्चादित्यगतंतेजइत्यत्रव
क्ष्यति एवमभाभ्यांश्लोकाभ्यांत्कनेदेलहृदयंस्याख्यानमिति
हृदयं ननुयद्गत्वाननिवर्ततेइत्युक्तं यदिगच्छंतिनिवर्तं

श्री·
गी·टी·
पं·

37

तएवस्वर्गवत् अपुनरावर्तंते नहिंनगच्छंति तेनगत्वेतिननिवर्तंते
इतिचपरस्परविरुद्धं सर्वेषांतानिचयाः पतनांतः समुच्छ्र
याः संयोगाविप्रयोगांतामरणांतंहिजीवितमितिहिशास्त्रेलो
केचप्रसिद्धं अनात्मप्राप्तिः पुनरावृत्तिपर्यवसानात्वात्मप्रा
प्तिरितिचेत् नसुषुप्तौसतासौम्यतदासंपन्नोभवतीतिश्रुतिप्र
तिपादितायाअप्यात्मप्राप्तेः पुनरावृत्तिपर्यंतत्वदर्शनात् अ
न्यथासुषुप्तस्यमुक्तत्वेपुनरुत्थानंनस्यात् तस्मादात्मप्राप्तौग
त्वेतिनोपपद्यते तस्यौपचारिकत्वेप्यनिवृत्तिर्नोपपद्यतेइत्येवं
प्राप्ते ब्रूमः गंतुर्जीवस्यगंतव्यब्रह्माभिन्नत्वाद्गत्वेत्यौपचारिकं
अज्ञानमात्रव्यवहितस्यतस्यज्ञानमात्रेणैवप्राप्तिव्यपदेशात्
यदिब्रह्मणः प्रतिबिंबोजीवस्तदायथाजलप्रतिबिंबितसूर्य
स्यजलापायेबिंबभूतसूर्यगमनंततोनावृत्तिश्च यदिचबुद्ध्य
वच्छिन्नोब्रह्मभागोजीवस्तदायथाघटाकाशस्यघटापायेमहा
काशप्रतिगमनंततोनावृत्तिश्च तथाजीवस्याप्युपाध्यपाये
निरुपाधिस्वरूपगमनंततोनावृत्तिश्चेत्युपचाराद्भण्यते एक
स्वरूपत्वादेवभ्रमस्योपाधिनिवृत्त्यानिवृत्ते सुषुप्तौत्वज्ञाने
स्वकारणेभावनाकर्मपूर्वप्रज्ञासहितस्यांतःकरणस्यजीवोपा
धेः सूक्ष्मरूपेणावस्थानात्तएवाज्ञानात्पुनस्तदुद्भवः संभवति
ज्ञानादज्ञाननिवृत्तौतुकारणाभावात्कुतः कार्योदयः स्यादज्ञा
नप्रभवत्वादंतःकरणाद्युपाधीनां तस्माज्जीवस्याहंब्रह्मास्मीति
वेदांतवाक्यजन्यसाक्षात्कारादहंनब्रह्मेत्यज्ञाननिवृत्तिर्गत्वेत्यु
च्यते निवृत्तस्याज्ञानस्यपुनरुत्थानाभावेनतत्कार्यसं
साराभावेननिवर्तंतेइत्युच्यतइतिनकोपिविरोधः जीवस्यतु
पारमार्थिकंस्वरूपंब्रह्मैवेत्यसकृदावेदितंतदेतमेवप्रतिपा
द्यतेअनेनार्धेन तत्रजीवस्यब्रह्मरूपत्वादज्ञाननिवृत्त्यातत्स्व
रूपप्राप्तस्यततोनप्रच्युतिरितिप्रतिपाद्यते ममैवांशइतिश्लोका
र्धेन सुषुप्तौतुसर्वकार्यसंस्कारसहिताज्ञानसत्वात्ततः पुनः सं

सारो जीवस्येति मनःषष्ठानींद्रियाणीति श्लोकार्धेन प्रतिपाद्यते तेत
न तस्य वस्तुतो संसारित्वोपि मायया संसारं प्राप्तस्य मंदमतिभिर्दे
हतादात्म्यं प्राप्तिस्य देहाद्व्यतिरेकः प्रतिपाद्यते शरीरमित्या
दिना श्लोकांन श्रोत्रं चक्षुरित्यादिना तत्र यथायथं स्वविषयेष्विंद्रि
याणां प्रवर्तकस्यांतेभ्यो व्यतिरेकः प्रतिपाद्यते एवं देहेंद्रिया
दिविलक्षणमुत्क्रांत्यादिसमये स्वात्मरूपत्वात्किमिति सर्वे
न पश्यंतीत्याशंकां विषयविद्धितविनादर्शनयोग्यमपि तेन प
श्यंतीमतरमुच्यते उत्क्रामंतमित्यादिना श्लोकेन तेनैव च तेषां
पश्यंतीति विद्धते यतंतो योगिन इति श्लोकार्धेन विमूढानानु
पश्यंत्येतद्धि हतेयतंतोपीति श्लोकार्धेनेति पंचानां श्लोकानां
संगतिः [illegible] ९

ॱर्धे ॱतस्य ॱयां

सदानंदी टीका ९

श्लोकार्थः १

आनंदीटीका

अयंपरमात्माहिसूर्यादीनांभासकः नतुतैरयंभास्यतेयथादीपैः
सूर्यादयइत्यर्थः येननिवर्तंतेतांलक्षयति १

रामकंठीटीका

टीद्.मंत तत्पदंसूर्यादयोनभासयंतितेषांहिप्रकाशंकारणान्तरलब्धजा
त्मकेचेतनाचेतनभावाऽभिव्यंजकत्वेनप्रकाशकमनन्यप्रकाशप
संवित्प्रकाशात्मनापरमशब्दप्रतिपादितेनस्वस्वभावेन परमात्मे
च्छामात्रेणाभासयन्प्रकाशयत्यतःसूर्यादीनांकथंतत्पदंप्रकाशयेयुस्ता
दृशंतदेवममयथोक्तस्वरूपस्यपरमकारणस्यपरमेश्वरस्यधामस्था
नं यत्प्राप्ययत्समापद्ययोगिनोननिवर्तंतेनपुनःसंसारभूमिमन्यजी
२८ ववदवतरंति नतुस्वेच्छामात्रेणसर्वभावप्रकाशकेनन्यप्रकाश्यचित्
प्रकाशेकस्वभावेपरमात्मन्येवैकस्मिंस्तत्त्वेपरमार्थसत्त्वेनव्यवस्थिते
प्रतिशरीरंज्ञत्वादिधर्मयोगिनोऽन्योन्यभिन्नाःकइमेजीवानामयथे
च्छमिंद्रियवर्गंस्वस्वविषयेप्रवृत्तिनिवृत्तीलेवयन्तीतिसंशयानांप्रति
जीवविवेकार्थमाह

लासिकी ~~[illegible]~~टीका

+ननुतदितिसर्वनामपदेनप्रसिद्धंवैकुंठादिपदंस्यादित्यतआह ॥

+सूर्यादयस्तत्पदंवैकुंठादिपदवन्नप्रकाशयंति नतुतत्पदंकिंत्वत्स्वरू
पाद्व्यतिरिक्तंयेन तत्पदस्यात्मनश्चभेदोक्तिरुच्यतेइत्याशंक्याह यत्पदंप्रा
प्यननिवर्तंतेपुनःसंसारसरणिंनालम्बंते तन्ममेश्वरस्यपरमंधामोत्कृष्टं
स्वरूपं राहोःशिरइतिवद्वावनिकोऽत्रभेदेनतात्विकः [illegible]
[illegible]
[illegible] १

पंचोलेटीका

तदेवपदंविशेषणैर्दर्शयति नतदिति सर्वावभासकःसूर्यः ।
आदित्यस्तेनतद्धामवैस्वयंतेजोरूपंपदंभासयितुमसमर्थः शशां
कोऽसर्वावभासकः एवंचेदग्निरपितद्धामभासयितुमसमर्थः द्वयोरभावे
निविडांधकारेसर्वविषयप्रकाशकोऽग्निरपितद्धामभासयितुम

समर्थः यद्धामवैसर्वंपदंप्राप्यगत्वाननिवर्तन्तेपुनःसंसारि
णोनभवंतियच्चसूर्यादिभिर्नभासयतेतद्धाममप्रकृष्टंपदंविष्णोः ६

श्रीधरीयसुबोधिनी

तदेवगंतव्यंविशिनष्टि नतदिति सूर्यः सूर्योवभासकस्तत्पदं
स्वयमेवरूपंनावभासयते सूर्यस्यापियतएवदीप्यमानत्वश्र
वणाद्रूमोवभास्यएवसूर्यः तथाशशांकोपिएतस्मादेवंद्योपि
तद्धामैनप्रकाशयति सूर्याचंद्रमसोरुभयोरप्यस्तमयेग्निःप्रका
शकोहपदृत्याशंकाह पावकोनप्रकाशयति तद्धयान्तरवत
स्यस्वयमेवनुष्ठानरूपकर्मणोग्नत्वदर्शनादितिभावः यद्धामैव
जात्युवितं यथागुरुपताशोपदेशमनुष्ठानेनप्राप्यापिगम्यन-
निवर्ततेनपुनःसंसारिणोभवंतिकर्मयोगिनइतिशेषः तद्धा
मैममपरमेश्वरस्यपरमनुत्कृष्टंसूर्यादीनामपि प्रकाशकंधा
मज्योतिःस्वयंप्रकाशंसूर्यादिसकलजज्योतिरवभासकंस्व
रूपात्मकंपदमित्यर्थः तथाचश्रुतिः नतत्रसूर्योभातिनचंद्र
तारकंनेमाविद्युतोभांतिकुतोयमग्निः तमेवभांतमनुभांति
सर्वंतस्यभासासर्वमिदंविभातीत्यस्यार्थः तत्रयमेस्वयंज्योति
षिसूर्योनभाति नचंद्रतारकं चंद्रश्चतारकाश्चतच्चंद्रतारकमि
तिसमाहारद्वंद्वः तदपिनभाति चंद्रनाभकादीनांसूर्यप्रकाशेन
प्रकाशकत्वश्रवणादिति इमाविद्युतोपिनभांति कुतोयमग्निः
तमेवभांतंयमेमनुसर्वंसूर्यादिप्रकाशोभाति तस्यचमेस्यभा
सादीत्यातदाचरणोनेत्यर्थः सर्वमिदंविश्वंविभात्यनुष्ठितस्व
यमेतादृशासमस्यदृशाशोभतेइति ६॥

मधुभाष्य

नतदित्यादिना कर्षतीत्युक्तेजीवस्यस्वातंत्र्यंप्रतीतं तन्निवा
रयति ६॥

भाषाअनुवादटीका

अब उसी अव्यय पद को विशेष रूप से कहते हैं कि उस पद को
सूर्य चन्द्र अग्नि भी प्रकाश नहीं कर शकते हैं और योगी जन जि
स पद को प्राप्त होय फेरि संसार मे आवर्तन कहे गमनागमन
नहीं करते हैं सोई धाम कहे तेज रूप हमारा स्वरूप है जहां
सूर्यादि की गति नहीं तहां इव हृदनइरना कौन प्रसङ्ग है
६

दोहा

नहि तहां भासत सूर्यहिं नहि शशी पावक सोय जहां
जायनहिं फिरतहै परमधाम मम सोय ६॥

40

ममैवांशो जीवलोके जीवभूतः सनातनः मनः
षष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति ७

शांकरभाष्य टीका १

ननु सर्वा हि गतिरागत्यंता संयोगा विप्रयोगांताः इति प्रसिद्धं हि
कथमुच्यते तद्धाम गतानां नास्ति निवृत्तिरिति शृणु तत्र कारणं म
मैवेति ममैव परमात्मनो नारायणस्यांशो भागोऽवयव एकदे
श इत्यनर्थांतरं जीवलोके जीवानां लोके संसारे जीवभूतः भोक्ता
कर्तेति प्रसिद्धः सनातनः पुरातनः यथा जलसूर्यकः सू
र्यांशो जलनिमित्तापाये सूर्यमेव गत्वा न निवर्तते तथा अयमप्यं
शः तेनैवात्मना संगच्छत्येवमेव यथा वा घटाद्युपाधिपरिच्छिन्नो घ
टाद्याकाशः आकाशांशः सन् घटादिनिमित्तापाये आकाशं प्राप्य न
निवर्तत इत्येवमत उपपन्नमुक्तं यद्गत्वा न निवर्तंत इति ननु निरव
यवस्य परमात्मनः कुतोऽवयव एकदेशोंऽश इति सावयवत्वे च वि
नाशप्रसंगोऽवयवविभागान्नैष दोषोऽविद्याकृतोपाधिपरिच्छि
न्न एकदेशोंऽश इव कल्पितो दर्शितश्चायमर्थः क्षेत्राध्याये विस्तर
शः स च जीवो मदंशत्वेन कल्पितः कथं संसरत्युत्क्रामतीति चेदुच्य
ते मनःषष्ठानींद्रियाणि श्रोत्रादीनि प्रकृतिस्थानि स्वस्थाने कर्ण
शष्कुल्यादौ प्रकृतौ स्थितानि कर्षत्याकर्षति ७

आनंदगिरिकृत टीका २

तत्र प्रसिद्धिं प्रमाणयति संयोगा इति गमनस्यागमनांतत्वप्रसिद्धे
रयुक्तं यद्गत्वेत्यादि इत्युपसंहरति कथमिति आक्षेपं परिहरति
शृण्विति भगवत्प्राप्तेर्निवृत्त्यंतत्वाभावः सम्यगर्थः जीवस्य परांश
त्वेपि कथमुक्तदोषसमाधिरित्याशंक्य प्रतिबिंबपक्षमादाय दृष्टां
तेन प्रत्याचष्टे यथेति अवच्छेदपक्षमाश्रित्य दृष्टांतांतरेणोक्तदोषस
माधिं दर्शयति यथा वेति आक्षेपसमाधिमुपसंहरति अत इति प
रस्य निरवयवत्वान्न तदंशत्वं जीवस्य युक्तमिति शंकते नन्विति त
स्य निरवयवत्वं साधयति सावयवत्वे चेति वस्तुतो निरंशस्यापि परस्य

कल्पनया जीवोंशो भविष्यतीति परिहरति नैष दोष इति वस्तुतस्तु
जीवस्य नांशत्वं परमात्मता वस्तुतया दर्शितत्वादित्याह दर्शित
श्चेति यदि परस्यांशत्वेन कल्पितो जीवो वस्तुतस्तदात्मैव न तर्हि
तस्य संसारित्वं उत्क्रान्तिर्वेति शङ्कते कथमिति जीवस्य संसरण
मुत्क्रमणं चोपपादयितुमुपक्रमते उच्यत इति ७

स्वामिकृत टीका ३

ननु च सर्वो हि गतिरागमान्ता कथं त्वदीयं धाम प्राप्ताः सन्तो न निवर्त्त
ते यदि न निवर्त्तन्ते तर्हि सति संपद्य न विदुः सति संपद्यामह इत्यादि श्रु
तेः सुषुप्तिप्रलयसमये तत्स्वामिः सर्वेषामस्तीति को नाम संसारी स्या
दित्याशङ्क्य संसारिणं दर्शयति ममैवेति पञ्चभिः ममैवांशो याय मवि
द्यया प्रतिबिम्बो जीवभूतः सनातनः सर्वदा संसारित्वेन प्रसिद्धः असौ
सुषुप्तिप्रलययोः प्रकृतौ लीनतया स्थितानि मनः षष्ठं येषां तानी
न्द्रियाणि श्रोत्रादीनि पुनर्जीवलोके संसारे भोगार्थमाकर्षति एत
च्च कर्मेन्द्रियाणां प्राणस्य चोपलक्षणार्थं अयं भावः सत्यं सुषुप्तिप्रलय
योरपि मदंशत्वात्सर्वस्यापि जीवमात्रस्य मयि लयादस्त्येव मत्प्राप्तिः
तथाप्यविद्यया सहितस्यैवानुशयस्य सप्रकृतिके मयि लयेन सहेतुसा
वैगतिरागमान्ता न तु केवलस्य अव्यक्तादनुक्रमयः सर्वाः प्रभवन्तीत्यादिना त
तस्य पुनः संसाराय निर्गच्छन्न विद्वान् प्रकृतौ स्थितानि स्वोपाधिभूता
नीन्द्रियाण्याकर्षति विद्वांस्तु शुद्धस्वरूपप्राप्तेर्न निवर्त्तत इति यथा न
लसूर्यः सूर्यांशो जलरूपनिमित्तस्यापाये सूर्यमेव गतस्तेनैव रूपे
ण पुनर्नागच्छति यथा च घटाद्युपाधिपरिच्छिन्नो घटाकाशो महाका
शांशः सन्घटादेर्निमित्तस्यापाये महाकाशं प्राप्य न निवर्त्तते ए
वं लिङ्गशरीरावच्छिन्नो मममांशो मायिकलिङ्गशरीरापाये प
रमात्मानं प्राप्य न निवर्त्तत इत्युक्तम् ७

पिशाचभाष्य टीका ४

ममैवांशः एकदेशो जीवः लोके प्राणिसमूहे जीवभूतः देहवत्त्वस
नातनः मनः षष्ठं येषां तानि षष्ठानीन्द्रियाणि प्रकृतौ कारणे माया
रूपं तिष्ठन्तीति प्रकृतिस्थानि शब्दादिविषयोपलम्भार्थं तदभि

मुखंकर्षतिआकर्षतिश्रोत्रादीनींइंद्रियाणिशब्दादिभिर्विषयैःस्वयो
जयतीत्यर्थः १

रामानुजभाष्य टीका ५

ममेति इत्यमुक्तस्वरूपः सनातनोमदंशपवसनकश्चिदनादिक
र्मरूपाविद्यावेष्टनतिरोहितस्वस्वरूपोजीवभूतोजीवलोकेवर्त
मानोदेवमनुष्यादिप्रकृतिपरिणामविशेषशरीरस्थानिमनः
षष्ठानींद्रियाणिकर्षति कश्चित्त्वीक्तमार्गेणास्यअविद्यायामुक्तः
स्वेनरूपेणावतिष्ठते जीवभूतस्त्वतिसंकुचितज्ञानैश्वर्यः कर्मल
व्यप्रकृतिपरिणामविशेषरूपशरीरस्थानींद्रियाणिमनःषष्ठा
नामीश्वरदत्तानिकर्मानुगुणमितस्ततःकर्षति १

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं ६ १ [illegible] ॥

परमार्थप्रपा टीका ७

ननुसएषमेसर्वेषांब्रह्माणोसप्तांकथंपुनःपराहृतिरित्याशंक्या
ह ममैवेतिपंचभिः ममैवांशोयमविद्ययाचदाहृतोर्कांशव[illegible]
[illegible]गृहेहाहतोजीवभूतःसनातनःसर्वदासंसारित्वेनप्रसिद्धःसमनःप
वषष्ठेयेषांतानिपंचज्ञानेंद्रियाणिसप्रभोकर्षतिआकर्षयति
पुनिरपितानियदाग्रहात्स्यहेनत्वपितिनामतद्देहेनप्रवमाणो
भवतिगृहीनावाक्गृहीतवत्सर्वेहीनद्धःश्रोत्रमित्यादिस्पष्टार्थं किं
भूतानींद्रियाणिप्रकृतिस्थानिप्रकृतौतिष्ठंतितानिस्वोपाधिभूता
नि अयमर्थः अविद्याहतमेलेनसानशपस्यजीवस्यसप्रकृतिक
मपिलयः अतःपुनराहृतिःनिरस्ताविद्यस्यजीवस्यब्रह्मणिलयः
अतोमुक्तिः अयमर्थःव्यक्तप्रसर्वोइत्यादिपूर्वमेवोक्तं ७

वनमाली टीका ८ ति

ननुयदगत्वाननिवर्तंतइत्युक्तं यदिहिगंत्वात्रावर्तनमेवस्वर्गि
वन्न अथनावर्ततेतेनहिनगच्छंत्यतोगत्वैवनिवर्ततेचेतिविरुद्धं स तिन
र्वेषांतानितथाः पतनांताःसमुच्छ्रयाःसंयोगाविप्रयोगांतामर
णांतंहिजीवितमितिशास्त्रेलोकेचप्रसिद्धमितिशंकांनिवारय
ति ममेति जीवलोकेसंसारेविद्यमानोजीवभूतःजीवस्वरूपःप्राण

भर्त्ता कर्मकर्त्ता स्वर्गनरकादिभोक्ता चेतनः ममनित्यनिर्मुक्तस्य सर्व
ज्ञस्य पूर्णानंदस्य नित्याविद्यानेनाकृतशक्तेरेशपवनद्धित्वेसति
तत्सहशत्वेवसतितदधीनत्वेप्रकृतेनदंशत्वं अतएवोक्तंसना
तनइतिमत्सहशस्यजीवस्यप्रागविद्ययाछादितस्यमांप्राप्यम
त्प्रसादेनाविर्भूतपूर्णानंदस्याछादिकायाअविद्यायानिःशेषत
यानाशात्पुनरावृत्तिःनाहशानंदाविर्भावस्तलोकविशेषस्थंवि
ग्रहविशेषविशिष्टंमांप्राप्यैवपरंज्योतिरूपसंपद्यस्वेनरूपेणा
भिनिष्पद्यतइतिश्रुतेः यथोपदेहात्प्राप्याविर्भूतकौतेयत्वंराधे
[illegible]यस्तनीछायुनेनत्रनिवर्ततेतथामांप्राप्याविर्भूतपूर्णानंद
त्वंपुनर्नाछाद्यतेविद्यायानष्टत्वान् नचनिवर्ततेस्वरूपभूतत्वादि
तिभावः ननुसुषुप्तावपिनाडीस्थभगवन्मूर्तिप्राप्तोस्त्येवननुकं
थंपुनरावृत्तिस्तत्राहमनइतिमनः षष्ठंयेषांतानिश्रोत्रत्वक्चक्षू
रसनघ्राणाख्यानिपंचेंद्रियाणि इंद्रियाणिमनोविषयभोगोपलब्धि
करणानियानिलिंगानिजागत्स्वप्नभोगजनककर्मक्षयेः प्रकृतिस्था
निप्रकृतौस्वकारणेसूक्ष्मरूपेणास्थितानिपुनर्जागृद्भोगजनकक
र्मोदयेभोगार्थंकर्षतिविषयग्रहणयोग्यतयाविर्भावयतीत्यर्थः
सर्वोत्तमत्वयोप्येवंकाविछिन्नेप्रेमसंततिरूपभक्त्यानिहनाशेषा
त्प्रशायापेहरिंप्राप्तास्तेषांनपुनरावृत्तिःसुषुप्तौतुसानुशयापव
हरिंमाप्नुवंतीतिपुनरावर्त्तनइतिभावः ७

ममैवेत्यत्र टीका

ननुसजीवःकोयोसौत्वत्प्राप्त्यानंतरं गच्छतीत्यपेक्षायामाह ममै
वांशइति जीवलोकेप्राकृतमंडलेदेवमनुष्यादिकारेणस्थितः
सनातनोनित्योनतत्वटाद्युपाधिवच्छिन्नाकाशवत्कल्पितः जीव
भूतोजीवरूपोममैवांशोनत्वीश्वराभासोनात्रतत्वरूपूर्णानंदानोनेषाम
पिजीवत्वाविशेषात् यथाग्नेरंशोविस्फुलिंगःकिंविशिष्टहप्रका
शादिधर्माश्रयोंतिसूक्ष्मरूपोभवतितथानंततानानंदादिकल्याण
गुणसागरस्यममैवांशःकिंविशिष्टानानंदादिधर्माश्रयोत्तानरूपको
जीवात्माभवतीत्यर्थः जीवभूतोममैवांशःसनातनइत्यादिभिर्वि

ऽेषणैर्घटाकाशवन्महाकाशवद्धाजीवो ब्रह्मणोंशः नष्करणे
नावछेदोनास्मिन्नतिविंवनाद्वाघटनलनाशेननदाकाशस्य शु
द्धाकाशत्ववदंतःकरणनाशे जीवांशस्य शुद्धब्रह्मत्वमितिवदं
तोपदृश्यते छित्वस्यानेसवममांशो पि मनः षष्ठानि मनः षष्ठं
येषां तानींद्रियाणि श्रोत्रादीनि तानि [illegible] इंद्रियाणि कीदृशानि
प्रकृतिस्थानि प्रकृतिकारभूताहंकारकार्याणि कर्षति स्वकर्मा
नुसारेण पादादिशृंखला इवेतत्तनोव हतिमगवत्स्वपमा प्राकृत
करणादिसंबंधनिर्मुक्तो भूत्वा प्राकृते दिव्यदेहकारणादिभि
र्युक्तो भगवंतं सेवते भगवल्लोके निवसतीति भावः ७

^इदानीमन्तराणि व्याख्यास्यामः॥

मधुसूदनी टीका ७

^ममैवपरमात्मनोंशः निरंशस्यापिमायया कल्पितः सूर्यस्येव
जलेनभसइवघटेमठाभेदवानंश इवांशो जीवलोके संसारे
सचप्राणधारणोपाधिना जीवभूतः कर्ताभोक्तासंसारीतिम
थैव प्रसिद्धमुपगतः सनातनो नित्यः उपाधिपरिछेदेपिवस्तु
तः परमार्थस्वरूपत्वात् अतो ज्ञानादज्ञाननिवृत्तौ स्वस्वरूपब्र
ह्मप्राप्य न तेन निवर्तत इत्युक्तं एवंभूतोपि मुख्यमात्कथमा
वर्तत इत्याह मनः षष्ठानीन्द्रियाणि मनः षष्ठं येषां तानि श्रोत्रत्वक्च
क्षूरसनघ्राणाख्यानि पंचेंद्रियाणि स्वात्मनो विषयोपलब्धिक
रणतया लिंगानि जाग्रत्स्वप्नभोगजनककर्मक्षये प्रकृतिस्थानि
प्रकृतावज्ञाने सूक्ष्मरूपेण स्थितानि पुनर्जाग्रद्भोगजनककर्मोद
ये भोगार्थं कर्षति कूर्मोंगानीव प्रकृतेरज्ञानादाकर्षति विषयग्र
हणयोग्यतया विर्भावयतीत्यर्थः अतो ज्ञानादनाहृतानावृत्त
नादाहृतानीनोपपन्नेति भावः [illegible] ७

सदानंदी टीका ८

नीलकंठीटीका

ननु यदि सूर्याद्यभास्यज्योतीरूपत्वं देहवत्त्वं चापि मो विरुद्ध इति·
स्वभावत्वे तत्त्वं दृष्टं तर्हि देहवत्त्वस्य मतस्त्वं घटादिप्रकाशकि
मिति सूर्याद्यपेक्षा दृश्यते नहि स्वयंज्योतीरूपः स्वविषयावभा
सने ज्योतिरंतरमपेक्षते दीपादिष्वदर्शनादित्याशंक्याह त्रिभिः
ममैवेति यत् यस्मादीश्वरो जगतां त्वहा शरीरं यदवाप्नोति स एष इ
ह प्रविष्ट आनखाग्रेभ्यः तत्सृष्ट्वा तदेवानुप्राविशदित्यादिश्रुति
भ्यः ईश्वर एव शरीरधारी तथा च यस्माद्धेतोः अपि शरीरं वधार
णार्थे वः समुच्चयार्थे कस्मिन्नहमुत्क्रांत उत्क्रांतो भविष्यामि·
कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति श्रुतेः प्रा
णधारणेनोपाधिनाईश्वर एव उत्क्रामति ततो हेतुद्वयात् जीव·
लोके संसारे यो जीवभूतः प्राणी स सनातनः सर्वदैकरूपोऽहमेवेति
वक्तव्ये यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवैतस्मादात्मनः स
र्वे प्राणा इत्यात्मनो व्युच्चरंतीति वह्निविस्फुलिंगन्यायेन ममैवांश इ
त्यंशांशिभावोक्तिः यद्यपि वह्नेर्भेदः परिमाणं च स्वगतेन दृश्य
ते तथापि तदुपाधिगतमेव तदुभयं तत्राप्युपचर्यते अयमग्निरस्मा
दग्नेर्भिन्नः अयमस्य स्फुलिंगः अयमस्मादल्प इति एवमस्थूलम
नण्वह्रस्वमदीर्घमिति श्रुतेश्चतद्विधपरिमाणशून्ये ब्रह्मणि ममै
वांश इत्यंशांशिभावेन भेदोऽल्पत्वमहत्त्वे चोपचारादौपाधिके ध्ये
ये तथा च श्रुतिः बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि दृ
ष्ट इति समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभि·
र्लोकैरिति च तथा च विस्फुलिंगो वह्निरेव न तु तदंशः एवं जी
वोऽपि ब्रह्मैव न तु ब्रह्मांशः ब्रह्मदाशा ब्रह्मदासा ब्रह्मैमे कितवा उत

तिदाशादिष्वपिपिंडेषुगोत्वस्येवकार्त्स्न्येनप्रत्येकैकस्मिन्ब्रह्मभावपरिस
माप्तिदर्शनात् निरंशेंऽशांशिकल्पनायाअयोग्यत्वाच्च सएवंजीवभूतइ
श्वरोममैवांशइवांशोरूपभेदोमनःषष्ठंयेषुतानिमनसासहषडिंद्रियाणि
प्रकृतिस्थानिइंद्रियाणांप्रकृतिःस्वभावोविषयप्रावण्यंतत्रस्थितानि
कर्षतिस्वाभिप्रलयसमाधिकालेषुसंकोचयति ७

आनंदी टीका

ममैवांशः यथाग्नेः क्षुद्राविस्फुलिंगाव्युच्चरंतीतिश्रुत्यर्थानुगमादभि
न्नोपिपरमात्मनः भूतेंद्रियादिसंघातोपाधिनाभेदंप्राप्यजीवलोकेजीव-
भूतस्सनातनः सदैकरूपः प्रकृतौदेहेस्थितानिश्रोत्रंतःकरणानिषडिंद्रिया
णिचकर्षतिनिजकर्मफलभोगायदेहाद्देहान्तरंप्रापयतिविषयभोगार्थं
प्रेरयतिच[illegible] ७

रामकंठीटीका

यएषजीवोनामपदार्थः प्रकृतिस्थानिशब्दादिभावेनपरिणतायांयथोक्त
स्वरूपायांप्रकृतौस्थितानितदेकालम्बनत्वात्तदाश्रितानिप्रायाण्याघ्रा
णादिधीन्द्रियविवक्षयापंचेंद्रियाणिमनसासहेतिनिर्दिष्टस्याथन्तर्भूतेना
तःकरणेनषष्ठेनसहितानिकर्षतिउपादेयेषुस्वविषयेषुयोजनोहेयाच्चतो
निवर्त्तयन्नादित्सतिविजिहासतिचसजीवलोकेजगतिममैवांशःसर्वप्रति
पादितस्वरूपस्यपरमकारणस्यांशोभागइवसनातनोनित्योजीवभूतो
मदिच्छावशादन्योन्यभिन्नजीवरूपतांप्राप्तः किमुक्तंभवति जीवपरमात्म
नोर्नास्तिमनागपिवास्तवोभेदः एवकारेणजीवस्यचिन्मात्रस्वरूपाति-
रिक्तवस्त्वन्तरसंपर्कसंभावनाभावोवधारितस्तेनपरमार्थतःपरमकार
णादभिन्नस्यापिप्रतिदेहंविभक्तेन्द्रियवर्गापकर्षत्वादिनानात्वप्रती
तिरचिंत्यमन्मायाशक्तिजनितानास्यवास्तवी साहिमायाशक्तिस्तत्व
ज्ञानावसरविभाव्यनिस्सारस्वरूपा सप्रतिसर्वभावभेदविभ्रमोद्भावनेन
पुंव्यामोहयतीति दैवीह्येषागुणमयीममामायादुरत्ययेत्यादिनाप्राग्
वप्रतिपादिताद्भुतस्वरूपा ततश्चाकाशस्यनित्यनिर्मलनिर्विभागानं
तमहिम्नोपिघटाद्यवच्छेदकवस्तुवशाद्यथांशवत्त्वपरिकल्पना तथा
परमात्मनोपिदेहाद्यवच्छेदकवस्तुवशाज्जीवरूपांशवत्त्वपरिकल्पनेयं
नतुतस्योक्तस्वरूपस्यवस्तुतोभागाःसंभवंति योपिप्रदीप्ताद्धुताशनाद्विशी

गी॰
टी॰
५

स्फुलिंगनिचयोपमानप्रतिपादनव्यवहारः परमात्मजीवात्मनोरा
गमेषुश्रूयते सोऽप्यौपचारिक एव न वास्तवो यतो ब्रह्म विदेकमेव त
त्त्वं परमार्थसद्ब्रह्म सेत्तु यानेकमिव च कात्सीत्या वर्त्तते तथा च कश्चि
दीश्वरो व्याकृतशाणविराट्भूतेंद्रियोर्मिभिर्यः प्रनृत्यन्निवाभाति न
मैव ब्रह्माव्ययेन मह इत्याह [illegible] ।

+ नन्वेवंविधं तवेश्वरस्य परमं धाम गत्वापमन्ता
मीयते जीवलोके इत्यतः सोपाधिकस्वस्वरूप
प्रदर्शनं प्रस्तोतुं सम +
भिः श्लोकैरुपक्रमते॥

लासिकी [illegible]टीका

ममैवेश्वरस्यांश इवांशः ५ हणावयवः सनातनो विनाशी जीवलोके उत्कभूत्या
जीवभूतः तस्येश्वरांशस्यैश्वर्यमाह प्रकृतौ स्वकारणे स्थितानि लीनानि म
नः षष्ठानीन्द्रियाणि कर्षति उपभोगार्थं बहिर्निष्कर्षयति [illegible] ।

पंचोले टीका

ननु सर्वोपि हि गति आगमनं तात् कथं न ह्यागतानां नास्ति निवृत्तिरि
त्यत्र संसारित्वरूपं दर्शयन् कारणमाह ममेति ममैवात्मनोंऽशो
भागः अवयवः एकदेशः जीवलोके संसारे जीवभूतः कर्त्ता भोक्तेति
प्रसिद्धः सनातनः चिरंतनः मनः षष्ठानि श्रोत्रादीनि इंद्रियाणि पंच
प्रकृतिस्थानि कर्णशष्कुल्यादौ प्रकृतौ स्थितानि संसारे व्युत्क्रामन्
कर्षति आकर्षति यथा जलसूर्यकः सूर्यांशो जलस्य निमित्तस्यापा
ये सूर्यमेव गतानंतेनैवरूपेण पुनरागच्छति यथा वा घटाकर्षोपि परि
च्छिन्नो घटाकाशो महाकाशांशः सन् घटनिमित्तस्यापाये महाकाशा
शं प्राप्य न निवर्त्तते एवं मायालिंगशरीरावच्छिन्नपरमात्मनोंऽशः न
यो मायालिंगशरीरं एकादशेंद्रियाणि पंच वायवः बुद्धिरूपं प्राप्य न
निवर्त्तते इति प्रकृतं लिंगशरीरं एकादशेंद्रियाणि पंच वायवः बु
द्धिरहंकारश्च एतावल्लिंगशरीरं पंचतन्मात्रात्मकमपि लिंगशरीरमि
ति केचित् ८

गणवीरसमसिद्धोधिनी॥

इदानीं कर्मस्य प्रतिबंधकमिंद्रियवर्गं वर्णयन्नथमंतनत्वामि
नं जीवं वर्णयति ममैवांश इति मम परमेश्वरस्यैवांशोनितरां
स्यापि मायया कल्पितो जीवलोके जीवानां प्राणधारिणां लो
के जीवभूतः प्राणधारी संहृतः सनातनो नित्यो नित्यस्य ममां
शत्वादतः स्वधर्मानुष्ठानेन जीवस्य मद्भूमप्राप्तिर्न दूरतरेति
भावः मनःषष्ठानीति मनःषष्ठं येषां तानि मनःषष्ठानि पं
चेंद्रियाणि श्रोत्रत्वक्चक्षूरसनाघ्राणाख्यानि प्रकृतिस्थानि
करणं कृतिः प्रकर्षेण करणं प्रकृतिर्व्यवहारस्तत्र स्थितानि
व्यवहारसंपादकानीति तानि आकर्षतीत्यर्थः ७॥

मधुमाष्य

७॥

जो कहैं कि तुमारे धाम को प्राप्त होय फेरि संसार नहीं होना सो सत्य है सकल जीव सत स्वरूप सम्पन्न होके द्वैत दृष्टि नही करते हैं और सुषुप्ति समय मे हम ब्रह्मभाव को प्राप्त होते हैं ऐसे श्रुति विधान करैं हैं और प्रलयकाल मे भी सब जीव तिस धाम को प्राप्त होते हैं तो फेरि संसारी और किस का नाम है इस आशङ्का पर पांच श्लोक से संसारी स्वरूप देखावते हैं कि हमारा अंश जीव अविद्या से सुषुप्ति तथा प्रल य के समय प्रकृति मे लीन होके रहते हैं और मन समेत इन्द्रिय इन छवो को मेरेही अंश सनातन जीव भूत संसार के उपभोगार्थ फेर भी मनुष्य लोक मे खैंचै है यहां यह जानना चाहिये कि इन्द्रिय शब्द से ज्ञान कर्म इन्द्रीय औ पञ्च प्राण लेने हैं इसीसे संसारी होते हैं ७

दोहा

मोहि अंश यह जीव है जीवलोक मे सोय मायिक इंद्रि षष को मन सह षैचैं सोय ७॥

शरीरंयदवाप्नोतियच्चाप्युत्क्रामतीश्वरः गृही
त्वैतानिसंयातिवायुर्गंधानिवाशयात् ८

शांकरभाष्य टीका १

कस्मिन काले शरीरमिति यच्चापि यदा चाप्युत्क्रमितीश्वरो देहादि
संघातस्वामी जीवस्तदा कर्षतीति श्लोकस्य द्वितीयपादस्यार्थवशा
त्प्राथम्येन संबध्यते यदाच पूर्वस्मात शरीरात् शरीरान्तरमाप्नो
ति तदा गृहीत्वैतानि मनःषष्ठानींद्रियाणि संयाति सम्यक् याति
गच्छति किमिवेत्याह वायुः पवनो गन्धानिवाशयात् पुष्पादेः ८

आनंदगिरिकृत टीका २

स्वस्थाने स्थितानामिन्द्रियाणां जीवेनाकर्षणस्य कालं पृच्छति क
स्मिन्निति जीवस्योत्क्रान्तिर्नेश्वरस्येत्याशंक्येश्वरशब्दार्थमाह
देहादीति उत्क्रान्त्यनन्तरभाविनी गतिरित्येतदर्थवशादित्युक्ते
श्च शिष्टानि श्लोकाक्षराणि व्याख्येयदाचेति ८

स्वामिकृत टीका ३

तान्याकृष्य किं करोतीत्यत आह शरीरमिति यद्यदा शरीरांतरं कर्म
वशादवाप्नोति यतश्च शरीरादुत्क्रामति ईश्वरो देहादीनां स्वामी
तदा पूर्वस्माच्छरीरादेतानि गृहीत्वा शरीरांतरं सम्यग्याति शरी
रेसत्येवें द्रियग्रहणे दृष्टान्तः आशयात्स्वस्थानात्कुसुमादेः सका
शात् गंधान् गंधवतः सूक्ष्मानंशान् गृहीत्वा यथा वायुर्गच्छति तद्वत् ८

वी

पिशाचभाष्य टीका ४

शरीरं यदवाप्नोति प्राप्नोति यदापि यदा च प्राप्नोत्क्रामति निर्गच्छ
ति ईश्वरः पुरस्वामी देही तत्र तदा एतानि वक्ष्यमाणानींद्रियाणि गृ
हीत्वा संयाति वायुराशयात् गंधानिवेतानि ८

रामानुजभाष्य टीका ५

शरीरमिति यच्छरीरमवाप्नोति यस्माच्छरीरादुत्क्रामति तत्राय
मिंद्रियाणामीश्वरः एतानींद्रियाणि भूतसूक्ष्मैः सह गृहीत्वा सं
यातिवायुर्गंधानिवाशयात् यथा वायुः स्रक्चंदनकस्तूरिका

द्याशयात्तत्स्थानात्सूक्ष्मावयवैःसहगंधान्गृहीत्वामत्रसंयातित
द्वदित्यर्थः ८

अभिनवगुप्तकृतटीका ८

ब्रह्मणएवायमंशइत्युक्तानधर्मेतयापरिपूर्णस्यासंवेदनाख्येत
नतानिहतेस्मांशत्वमुपचरितं पुनर्वक्ततेशावत्रोपपद्यते भेदे
शेपिब्रह्मणःसार्वज्ञ्यमनतिक्रांतमितिश्रुतेः एषौवचौपचा
रिकतायथावसरंयोजनीयेतिनप्रतिपन्नत्वं अवाप्नोतिस्वह्मा
तिउत्क्रामतित्यजति एतैःसहयथावायुःसर्वगतोविश्रांतिधा
मपार्थिवंआप्यतनोगंधमानीयस्थानांतरेनतत्सहितएवसंक्रा
मति एवंजीवःपुर्यष्टकेनसह एवंस्वहीसंहारेवैतैःसाहित्यम
स्योत्क्रांतिनावपिस्थानासनमननादिरूपायांविषयग्रहण
सिकायांतत्सहितस्यैवास्यव्यापारइतिनिश्चीयते ८

परमार्थप्रपाटीका ८

अथजीवस्यशरीरांतरप्राप्तिंदृष्टांतेनाह शरीरमिति यत्यदापूर्व
स्माच्छरीराउत्क्रामति यदाचशरीरांतरंप्राप्नोतितदाईश्वरइंद्रियपा
लकोंतर्यामीएतानीइंद्रियाणिगृहीत्वैवसम्यक्प्रकारेणयाति
कइव आशयात्पुष्पगंधादिवा आशयाद्गंधाश्रयीभूतात्पुष्पादेः
सकाशाद्गंधानगंधवं तत्सूक्ष्मांशान्गृहीत्वावायुर्यथाया
तितथासत्यपिशरीरेअर्थग्राहकाण्यधान्यरूपाणींद्रियाणिगृ
हीत्वायाति आत्मानमेवज्ञानस्वतत्त्वस्यगमनागमनेनसंभवति
किंतुतदंशीभूतसूक्ष्मभूतेंद्रियप्राणावस्थात्मकंलिंगशरीरमेव
गच्छत्यागच्छतीत्यर्थः ८

वनमाला टीका ८

यत्यदाउत्क्रामतिमरणादौवहिर्निर्गच्छति ईश्वरोदेहेंद्रिया
दिस्वामीजीवः तदायतोदेहाउत्क्रामतिततोमनःषष्ठानीइंद्रिया
णिकर्षतीतिपूर्वेणान्वयः उत्क्रमणोत्तरभावित्वाद्गमनस्य न
केवलंकर्षत्येव किंतुयत्यदापूर्वस्माच्छरीराच्छरीरांतरमवाप्नो
तितदैतानिमनःषष्ठानीइंद्रियाणिगृहीत्वासंयात्यपिसम्यक्पुन

घ्राशयात्तत्स्थानात्सूक्ष्मावयवैः सहगंधान्गृहीत्वामत्र संयातित
द्वदित्यर्थः ८

अभिनवगुप्तकृतटीका ९

ब्राह्मणएवायमीश्वरत्यक्तानधर्मतयापरिपूर्णस्वसंवेदनात्मत
नतानिहतेस्यांशत्वमुपचरितं पुनर्वस्तुतोंशवत्तोपपद्यते भेदे
शेपिब्राह्मणः सार्वज्ञ्यमनतिक्रांत इतिश्रुतेः एषैवचोपचा
रिकतायथावसरंयोजनीयेतिनप्रतिपन्नं यं अवाप्नोति गृह्णा
ति उत्क्रामति त्यजति एतैः सह यथावायुः सर्वगतोपिआस्तिथा
मपार्थिवं प्राप्यततोगंधमानीयस्थानान्तरेतत्सहितएवसंक्रा
मति एवंजीवः पुर्यष्टकेनसह एवंसर्वैःसंहारैर्वैतैः साहित्यम
स्योत्क्रांतिस्थितावपिस्थानासनगमननादिरूपार्थविषयग्रहणा
त्मिकायांतत्सहितस्यैवास्यव्यापार इतिनिश्चीयते ८

परमार्थप्रपा टीका १

अथजीवस्यशरीरांतरप्राप्तिं दृष्टांतेनाह शरीरमिति यत्यदापूर्व
स्माच्छरीरादुत्क्रामति यदाचशरीरांतरं प्राप्नोति तदा ईश्वरः इंद्रियपा
लकांतर्यामीएतानींद्रियाणिगृहीत्वैवसम्यक्प्रकारेणयाति
कइव आशयात्सपुर्गंधानिवा आशयाद्गंधाश्रयीभूतात्पुष्पादेः
सकाशाद्गंधानगंधवत्सूक्ष्मांशानगृहीत्वावायुर्यथाया
तितथास्यापिशरीरेअपूर्व्ययाहकारणध्वानस्वरूपाणींद्रियाणिगृ
हीत्वायाति आत्मानसर्वगतस्यतस्यगमनागमनेनसंभवति
किंतनदंशीभूतसूक्ष्मभूतेंद्रियप्राणावस्थात्मकंलिंगशरीरमेव
गच्छत्यागच्छतीत्यर्थः ८

वनमाला टीका ८

यत् यदा उत्क्रामति मरणादौ बहिर्निर्गच्छति ईश्वरो देहेंद्रिया
दिस्वामीजीवः तदायतो देहादुत्क्रामति ततोमनःषष्ठानींद्रिया
णिकर्षतीतिपूर्वेणान्वयः अनुक्रमणेनरमाविनाजमनस्य न
केवलंकर्षत्येव किंतु यत्यदापूर्वस्माच्छरीराच्छरीरांतरमवाप्नो
ति तदैतानिमनःषष्ठानींद्रियाणिगृहीत्वासंयात्यपिसम्यक्पुन

रागमनराहित्येनगच्छत्यपिशरीरेसत्येवेंद्रियग्रहणेदृष्टांतः आ
शयात्कुसुमादेःस्थानात गंधानगंधात्मकान सूक्ष्मानंशान्
गृहीत्वायथावायुर्यातितद्वत ८

कुसुमवैजयन्ती टीका ९

जीवलोकेजीवेंद्रियाणिकर्षतीतियदुक्तंतत्कर्षणप्रकारंसह
ष्टांतमाहशरीरमितिईश्वरःशरीरेंद्रियादीनांस्वामीजीवोयदा
पूर्वस्माच्छरीरादन्यच्छरीरमाप्नोतिप्राप्नोतिचपुनःअपिवार्थे
यद्यदावास्माच्छरीरादुत्क्रामतितिःसरतितदैतानिभूतसूक्ष्मैःस
हेंद्रियाणिगृहीत्वास्वकर्मानुगुणवासनयाप्रगच्छतिसंयातित
त्रदृष्टांतःआशयात्कर्परकेसरकुसुमकस्तूरिकाचंदनादिस्था
नाद्वायुर्गंधानिवसूक्ष्मावयवैःसहगंधान्गृहीत्वायथासहस
यातितथेत्यर्थः ८

मधुसूदनी टीका ९

^कस्मिन्कालेकर्षतीत्युच्यते ॥
^यत्यदाउत्क्रामतिवहिर्निर्गच्छति ईश्वरोदेहेंद्रियसंघातस्यस्वा
मीजीवःतदायतोदेहादुत्क्रामतितेनोमनःषष्ठानींद्रियाणिक
र्षतीतिद्वितीयपादस्यप्रथममन्वयःउत्क्रमणोत्तरभाविना
गमनस्यनकेवलंकर्षत्येवकिंतयत्यदाचपूर्वस्माच्छरीराच्छ
रीरांतरमवाप्नोतितदैतानिमनःषष्ठानींद्रियाणिगृहीत्वासं
यात्यपिसम्यक्पुनरागमनराहित्येनगच्छत्यपिशरीरेसत्येवेंद्रि
यग्रहणेदृष्टांतःआशयात्कुसुमादेःस्थानात गंधानगंधात्म
कान्सूक्ष्मानंशान्गृहीत्वायथावायुर्यातितद्वत [illegible]
[illegible] ८

सदानंदी टीका ९

कदाकर्षतिजीवोय[illegible]मिंद्रियाणीतिवेक्षणदेहेंद्रियादिसंघातस्वा
मीजीवोयदावहिः१निर्गच्छतिमदादेहायस्मादुत्क्रमतीत्यतः
मनःषष्ठानींद्रियाणिकर्षतीत्यन्वयोस्तिहि२उत्क्रांत्युत्तरभाविना
गमनस्ययतस्ततःनकेवलंकर्षत्येवकिंतुपूर्वशरीरतः१यदाप्ये

श्री॰ गी॰ टी॰ पं॰

स परं देहं तदैतानींद्रियाणि सः गृहीत्वा मनसा सार्द्धं गच्छत्यागम
नोज्झितः ४ शरीरे सति दृष्टांत इंद्रियग्रहणोस्य पुष्पादेः स्थान
तः सूक्ष्मानेशानाध्यात्मकान्यथा ५ गृहीत्वा पवनो याति तद्वज्जी
वोपि तान्यतः ८

नीलकंठी टीका १२

[illegible] मनः षष्ठानि तानि गृहीत्वा यां संविदं करोति तत्राह
येत्येति [illegible] वंति कृत्वा विषयान् शब्दादीन् ग
से [illegible] यति यथा दीपः स्वप्रहतिलाभाय तैलवर्त्याद्यपे
क्षमाणोपि स्वविषयावभासने स्वयमेव समर्थः एवं जीवोपि स्व
कार्यस्वलाभाय मनः षष्ठानींद्रियाणि सूर्यादींश्चापेक्षमाणोपि
यत्प्रवभासे स्वयमेव करोति तेन ताणि इंद्रियसूर्यादीनि स्वभा
स्वत्वात् तैलवर्त्यादिवत् तथैतान्येव आशयात् स्वलयस्थानात् गृ
हीत्वा संयाति विषयदेशं प्रतिगच्छति प्रबोधसर्गयुत्थान
कालेषु तत्र दृष्टांतः वायुर्गंधानिवाशयात् गंधाश्रयात् पुष्पात् ८

आनंदी टीका १३

एतदेव प्रतिपादयति

आशयात् पुष्पादेरधिष्ठानात् ईश्वरः बाह्याभ्यंतरकरणाकर्षण
समर्थः विस्तरस्तु शास्त्रादवगंतव्यः करणान्यवदर्शयति
८॥

+ननु ततस्ततः शरीरोपात्तशुभाशुभकर्मणा पवित्रवासनाधिवासितएवजीवः शरीरांतरं प्रतिपद्यमानः संसारपरंपरा
परिवर्तनमनुभवन् कथं नवस्तुतोन्यो भिन्नो भवेदिति
भेदभ्रांतिमपाकर्तुमाह॥

रामकंठी टीका १४

+एवं मदंशत्वाद्वस्तुतो मदभिन्नो जीवपदार्थो यच्छरीरमवाप्नोति
केनचिन्नवेन शरीरेण संबध्यमानत्वाज्जातव्यपदेशं लभते ई
श्वरः तथा यच्चाप्युत्क्रामति तत्कर्मविपाकप्रत्ययकेन चिच्छ
रीरेण वियुज्यमानत्वात् उत्क्रामंतव्यपदेशं लभते तदायमीश्व
रः स्वतंत्रस्वरूपमात्रप्रतिष्ठः परमात्मैव सन्नेतानि सूक्ष्मरूपा
णींद्रियाणि गृहीत्वाधिष्ठेयत्वेन स्वीकृत्य संयाति देहाद्देहांत
रगमनलक्षणव्यपदेशभाग्भवति न पुनर्निरवनिर्विभागव्यापक
चिन्मात्रैकस्वरूपस्यास्य देहाद्देहांतरगमनलक्षणं संयानं जन्म

मरणशब्दवाच्यं वस्तुतः संभवतीति इदमत्र तात्पर्यं पारमार्थिकस्वरू
पप्रत्यवमर्शाभावमात्रात्मकजन्मनो निजमायाशक्त्याज्ञाविनावच्छेदरू
त्वविविधशरीरसंबंधाज्जीवनानात्वमिवावभासयत्ययमीश्वरस्तेनय
थाघटकुंभस्थलगृहाद्यवच्छेदकवस्तुसंबंधादेकमेव निर्विभागमाकाश
घटाकाशं कुंभस्थलाकाशमित्यादिभेदव्यपदेशमतत्त्वविदः प्रतिपद्यंते
तथैवायमीश्वरः स्वरूपप्रतिरूपवस्त्वङ्गीकृतकार्यकारणसंबंधान्ना
नात्वमिव प्रतिपद्यते न तत्संबंधेऽपि सति यथैव विशुद्धसंविन्मयस्वरूप
मात्रप्रतिरूपवत्तयोपमानेन प्रकटयति उत किंचिदाशयात्कमला
करादेर्यथा स्पर्शमात्रस्वभावो वायुर्गंधानुकूलवर्ण्यदिमकरन्दामो
दान् सूक्ष्मरूपान् स्वीकृत्य कुसुमादिकमाशयान्तरं संयाति तथैवा
यमिंद्रियादीनि गृहीत्वा देहाद्देहान्तरं चिन्मात्रस्वरूपप्रतिरूपवत्संया
ति ~~किमनेनोक्तं भवति~~ किमनेनोक्तं भवति यथा तत्तदाशयगतं ग
धपरमाणुपरिग्रहेऽपि स्पर्शमात्रगुणात्स्वरूपादप्रच्यवमानो गंध
वत्तां नावपद्यते पवनो यच्च तत्संबंधात्कमलसुरभिः कुसुममकरन्द
घ्रा॰ सुगंधिरिति भिन्नव्यपदेशं तु वस्तुनोऽस्य भेदः संभवति चायमुपमा
नोपमेयभावो विवक्षितो यह तत्त्व नरसंबंधेऽपि स्वरूपाप्रच्युतिरस्येति
[illegible]
[illegible]
[illegible]
[illegible] ॥ ८ ॥

लासिकी भगवद्गीताटीका ५५

किंच अयं जीव ईश्वरांशत्वादीश्वर इति व्यपदेशार्हः शरीरं यद्यदा स्वकर्म
वशादवाप्नोति यतश्च शरीरादुत्क्रामति एतानि प्रकृतिस्थानि म
नः षष्ठानींद्रियाणि पूर्वस्माच्छरीराद्गृहीत्वा संयाति शरीरान्तरं ग
च्छति शरीरे सत्येवेंद्रियग्रहणेहेतोः आश्रयान्तरस्थानात्कुसु
मादेः सकाशाद्गंधान्गंधवतान्सूक्ष्मानंशान् गृहीत्वा यथा गच्छति
तद्वत [illegible]

[illegible] ॥८॥

पंचोले टीका

कदाआकर्षतिआकृष्यचकिंकरोतिइत्यत्राह शरीरमिति ई
श्वरोदेहादिसंघातस्वामीजीवः यच्चापियदाशरीराउत्क्रामतियत्
यदापूर्वस्मात्शरीरांतरंप्राप्नोतितदएतानिमनःषष्ठानिइंद्रिया
णिगृहीत्वासम्यग्यातिगच्छतितत्रदृष्टांतः वायुर्गंधानाशयात्पुष्पादेर्गं
धानिव ८

रणवीरसमिद्धोधिनी॥

तान्याकृष्यकिंकरोतीत्याह शरीरमिति यद्यदा ईश्वरो दे
हेंद्रियसंघातस्वामीजीवोदेहादुत्क्रामति निर्गच्छति तदाम
नःषष्ठानींद्रियाणिकर्षतीत्यन्वयः यदाचपूर्वस्माच्छरीरा
च्छरीरांतरमवाप्नोति तदैतानिमनःषष्ठानींद्रियाणिगृहीत्वा
संयाति सम्यक्पुनरागमनरहितत्वेनगच्छति इंद्रियग्रहणेदृ
ष्टांतमाह वायुरिति आशयात्कुसुमादेःस्थानात् गंधात्गं
धात्मकान्सूक्ष्मानंशान्गृहीत्वायथावायुर्याति तद्वदिति
तस्मादैंद्रियिकपुष्परागादिस्नेहवशागोभूत्वास्वयमभूतंपु
हंमात्यादत्तीतिभावः ८॥

मधुभाष्य

शरीरमित्यादिना यत् यदाशरीरमवाप्नोति उत्क्रामति
जीवः तदेतत्सर्वपतानिगृहीत्वासंयाति यत्रयत्रचसंयुक्तो
यातागमेषुनःपुनः तत्रतत्रैववसतितथयत्सर्वयमिच्छती
तिदिमोत्तयर्थं भावाभावावपित्वानन्तारीयोजानामि
प्रेयोनवतत्करोमि आत्माहदन्याहहृदास्रुकृवंन्यथा
नियुक्तोस्मितथाचरामीतिच हवाजित्वापिमयवन्यः क

श्वित्तुरूषायते अकर्तातेवभवतिकर्तातेवकरोतितदिति
व तथयाहानःस्तस्माद्दितमुत्सृजेयाया देवमेवायंपरी
वेश्राह्मा प्रत्तोनात्मनात्वानूफ उत्सृजेयातीतिवश्रुतिः वा
ङ्मनसि संपद्यतेमनःप्राणे प्राणस्तेजसितेजःपरस्यां देव
तायामितिव गंधातिचहून्नातिभोगोस्यसाधितः शुक्ता
न्न इंद्रियहृगादिसोपिभुंक्ते तथइमे वीणायांगायंतिपतं
तेगायंतीतिवश्रुतिः उत्तान्वितमेवंभुंक्ते नहवैदेवान्यापं
गच्छतीतिश्रुतेः नहिकिंचितिनदमयत अत्यतश्राद ८

ओर सोई इन्द्रियोंको आकर्षण करिके जीव क्या करते हैं जो यह शङ्का करो तो सुनो कि जब ईश्वर नाम देह आदि का स्वामी स्वरूप व्यावहारिक जीव कर्म्मवशने इशरी शरीर को प्राप्त होता है अथवा जब शरीर को छोडि के गमन करते हैं तब पूर्व शरीर से इन्द्रियादिकों को ग्रहण करिके गमन करें है इस मे दृष्टान्त यह कि जैसे वायु फूलो के स्थान से सुगन्ध रूप सूक्ष्म अंश परमाणु ग्रह करके गमन करै है तैसे ही यह भी इसको भी जानो ८

दोहा

ईश्वर देह हुं त्याग जबसो ओर देहमें जात ग्रहकर
इंद्रिय तिनहिको कुसुमगंधि जिम वात ८॥

श्रोत्रंचक्षुःस्पर्शनंचरसनंघ्राणमेवच अधि
ष्ठायमनश्चायंविषयानुपसेवते ९

शांकरभाष्य टीका १

कानिपुनस्तानीति श्रोत्रमिति श्रोत्रं चक्षुःस्पर्शनन्त्वगिन्द्रियं
रसनं जिह्वा घ्राणमेवच मनश्च षष्ठं प्रत्येकं इन्द्रियेण सहाधिष्ठा
य देहस्थो विषयान् शब्दादीनुपसेवते ९

आनंदगिरिकृत टीका २

मनःषष्ठानीन्द्रियाण्येव प्रश्नद्वारा विशेषतो दर्शयति कानीति ९

स्वामिकृत टीका ३

तान्येवेंद्रियाणि दर्शयन् यदर्थं गृहीत्वा गच्छति तदाह श्रोत्रमि
ति श्रोत्रादीनि बाह्येन्द्रियाणि मनश्चान्तःकरणमधिष्ठायाश्रि
त्य शब्दादीन्विषयानयंजीव उपभुंक्ते ९

पैशाचभाष्य टीका ४

अधिष्ठायाश्रित्य मनश्चायं देवत्तः विषयान् शब्दादीनुपसेवते
उपलभते ९

रामानुजभाष्य टीका ५

श्रोत्रमिति एतानि मनःषष्ठानीन्द्रियाणि अधिष्ठाय स्वस्वविषय
वृत्त्युन्मुखानि कृत्वा तान् शब्दादीन् विषयानुपसेवते उपभुंक्ते ९

अभिनवगुप्तकृत टीका ६ एकादशो ऽकार्थम् ४

स्पष्टार्थं ९ ॥

परमार्थप्रपा टीका ७

अथ शरीरान्तर्वर्तमानदशायामात्मनो विषयोपभोगप्रकार
माह श्रोत्रमिति अयमात्मा मन अधिष्ठाय स्वाश्रयमात्रेण प्रव
र्तनं तद्वारकोपलब्धितो शब्दादीन्विषयानुपग्रहकाराण्यामे
नसेवते श्रुतिरपि अन्यत्रमना अभूवन्नादर्शमन्यत्रमना अभू
वं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोतीत्यादि स्पष्टार्थं
९

वनमाली टीका ८

तान्येवेन्द्रियाणि दर्शयन् यदर्थं गृहीत्वा गच्छति तदाह श्रोत्रमिति
श्रोत्रादीनि तानीन्द्रियाणि पञ्च चकारात्कर्मेन्द्रियाणि प्राणांश्च मन

श्री॰
गी॰ टी॰
पं॰

52

श्चषष्ठमधिष्ठायैवाश्रित्यैवविषयानशब्दादीनयंजीवउपसेवतेभुंक्ते ९

ऊसमवैजयन्ती टीका ९

किमर्थंतानिगृहीत्वायातीत्यपेक्षायांविषयभोगार्थमित्याह श्रोत्रमिति श्रोत्रंचक्षुःस्पर्शनंरसनंघ्राणंवपंचैतानिज्ञानेंद्रियाणिचकारात्वाक्पाणिपादपायूपस्थानिपंचकर्मेंद्रियाणिवपुनः मनः एवकाराद्बुद्धिचित्ताहंकाराणांग्रहणंएतानिसर्वाण्यधिष्ठायाश्रित्यस्वस्वविषयग्रहणगुणानिकृत्वाविषयानशब्दस्पर्शरूपरसगंधान्वचनादानविहरणोत्सर्गानंदानयंजीवात्माउपसेवतेउपभुंक्तेएतदर्थमेवतद्ग्रहणमित्यर्थः ९

+तान्येवेंद्रियाणिदर्शयन्नुपदर्थंगृहीत्वागच्छतितदाह॥

मधुसूदनी टीका ९

+श्रोत्रंचक्षुःस्पर्शनंरसनंघ्राणमेवच चकारात्कर्मेंद्रियाणिप्राणंचमनश्चषष्ठमधिष्ठायैवाश्रित्यैवविषयानशब्दादीन्अयंजीवउपसेवतेभुंक्ते [illegible]
९

सदानंदी टीका ९

तान्येवदर्शयन्नाहयदर्थंयातितत्तथा श्रोत्रादिपंचकंचेनप्राणंकर्मेंद्रियाण्यपि षष्ठंचमनआश्रित्यशब्दस्पर्शादिगोचरानयंदेहेंद्रियस्वामीभुंक्तेध्यानिवशायतः १ देहेंद्रियादिषुस्वात्माध्यासादेवात्मनोमत्याऽसुखदुःखादिभोक्तृत्वंनतत्वस्यपरमार्थतः ९

नीलकंठी टीका ९

कानितानिमनःषष्ठानि तानिगृहीत्वागत्वावायंकिंकरोतीत्यतआह श्रोत्रमिति अधिष्ठायव्यापारवंतिकृत्वाविषयान्शब्दादीनउपसेवतेप्रकाशयति यथादीपःस्वस्यवृत्तिलाभायतैलवर्त्याद्यपेक्षमाणोपिस्वविषयावभासनेस्वयमेवप्रभुः एवंजीवोपिचटाकारवृत्तिलाभायमनःषष्ठानींद्रियाणिस्वर्पादीन्यपेक्षतेनतथापिघटावभासंस्वयमेवकरोतिनेन्द्रियाणीइंद्रियस्थादीनिस्वभासयन्त्यातैलवर्त्यादिवदित्याशयः ९

+ त्वात्यायुर्भोगलक्षणविपाकाभिव्यंजकजन्ममरणधर्मयोगशरीरादिसंबंधेपि वास्तवीस्वरूपमात्र प्रतिष्ठतामस्यात्मनः प्रतिपाद्येदानीं तदन्तरालवर्तिभोगलक्षणविपाकाभिव्यंजकदशासं बंधेप्यस्पर्शतां प्रतिपादयितुमाह ॥

आनंदीटीका १३

अयं देहस्थः श्रोत्रादिद्वारेण शब्दादीन्भुंक्ते इत्यर्थः ९ ॥

रामकंटीका १४

+ क्षेत्रज्ञंचापि मां विद्धि सर्वक्षेत्रेष्वित्यादिना प्रदर्शितन्यायेनाय मेक एवात्मा नानाक्षेत्रवर्ति विभिन्नविषयाधिष्ठातृत्वमात्रेण नानात्वमिव प्रतिपद्यमानो विषयाञ्छब्दादीन्स्रग्वादिहेतूनुप सेवते तेन तदुपलब्धृत्वमात्रैकस्वभावाव्यभिचारादेक एव सन् भजते भोक्तृतावस्थायामपि तैरनाहतस्वरूप एवास्ताविमृ र्थः । ९ ॥

+ एवं तत्त्वतोसंहारेवेतैः साहित्यमस्योक्ताधि तावधिष्ठानासनादिरूपायां विषयग्रहणा त्मिकायां च तत्साहित्यस्य वास्यव्यापारइत्याह ॥

लासिकी [illegible]टीका १५

+ मनोन्तःकरणं विषयाञ्छब्दादीन्भुंक्ते [illegible]

[illegible]

आह ॥ ९ ॥

पंचोलेटीका

पूर्वोक्तानि इंद्रियाणि भेदेन दर्शयन् यदर्थं गृहीत्वा याति जीवः तदपि दर्शयति श्रोत्रमिति अयं जीवो देहस्थः श्रोत्रं च चक्षुः स्पर्शनं च पुनः रसनं घ्राणं एतानि पंच श्रोत्रादीनींद्रियाणि मनसा सह षट् प्रत्येकं इंद्रियमधिष्ठाय विषयान् शब्दादीन् उपसेवते भुंक्ते ९

शरणवीरसंनिद्योयिनी

श्रोत्रमिति श्रोत्रादीनि ज्ञानेंद्रियाणि च कारात्कर्मेंद्रियाणि मनश्चाधिष्ठायाश्रित्य शब्दादीन्विषयानयं जीव उपसेवते इति ९॥

मधुभाष्य

९॥

53

इन्द्रियों के समाचार कह के अब जिस जिस लिये इन इन्द्रियों को ग्रहण करि के गमन करते हैं सो कहते हैं कि ये जीव श्रोत्र चक्षु स्पर्श जिह्वा और घ्राण ये बाह्य इन्द्रिय और अन्तःकरणको आश्रय करि के शब्द आदि विषयों को उपभोग करैं है ९

दोहा

श्रवण नेत्र त्वच रसन हि और नासिका जोय मनसंग इन में विषय को स्थित होय सेवत सोय ९॥

उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितं विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः १०

शांकरभाष्य टीका १

एवं देहगतं देहात् उत्क्रामन्तमिति उत्क्रामंतं परित्यजंतं देहं पूर्वोपात्तं स्थितं वा देहे तिष्ठंतं भुंजानं वा शब्दादींश्चोपलभमानं गुणान्वितं सुखदुःखमोहाद्यैः गुणैरन्वितमनुगतं संयुक्तमित्यर्थः एवंभूतमप्यत्यंतं दर्शनगोचरप्राप्तं विमूढा दृष्टादृष्टविषयभोगबलाकृष्टचेतस्तयाऽनेकधा मूढा नानुपश्यंति अहो कष्टं वर्तत इत्यनुक्रोशति च भगवान् ये तु पुनः प्रमाणजनितज्ञानचक्षुषस्त एनं पश्यंति ज्ञानचक्षुषो विविक्तदृष्टय इत्यर्थः १०

आनंदगिरिकृत टीका २

शरीरमित्यादिश्लोके देहाद्यतिरेकमुक्त्वा श्रोत्रं चक्षुरित्यादौ स्वाभिलषिते विषये यथायथं करणानां प्रवर्तकत्वात् तेभ्योऽतिरिक्तस्यात्मनो मुक्तं तर्हि तमुत्क्रान्त्यादि कुर्वंतं स्वरूपत्वात् किमिति सर्वे न पश्यंतीत्याशंक्याह एवमिति सन्निहितत्वेन दर्शनयोग्यमपि विषयपरवशात्मानं सर्वे न पश्यंतीति भगवतोनुक्रोशं दर्शयति एवंभूतमिति तर्हि केषामात्मदर्शनं तदाह ये तु पुनरिति १०

स्वामिकृत टीका ३

ननु चैवं कार्यकारणसंघातव्यतिरेकेणैवंभूतमात्मानं सर्वेऽपि किं न पश्यंतीति तत्राह उत्क्रामंतमिति उत्क्रामंतं देहाद्देहांतरं गच्छंतं तस्मिन्नेव देहे स्थितं वा विषयान् भुंजानं वा गुणान्वितं इंद्रियादियुक्तं जीवं विमूढा नानुपश्यंति नावलोकयंति ज्ञानमेव चक्षुर्येषां ते विवेकिनः पश्यंति १०

पैशाचभाष्य टीका ४

उत्क्रामंतं शरीरादुत्क्रामंतं वापि शरीरे भुंजानं वा विषयानुपलभमानं गुणान्वितं गुणैः सत्त्वरजस्तमोभिः बुध्याद्याकारप

रिणतैः अन्वितमतिमूढाः कार्यकारणसंघाते आत्मत्वदर्शिनः
नानुपश्यंतिनोपलभ्यंतेज्ञानेवचक्षुर्येषांतेज्ञानचक्षुषः ज्ञान
चक्षुषोभूत्वाकिंनपश्यंतीत्यर्थः १

रामानंदभाष्य टीका ५

तदिति यएनंगुणान्वितं सत्वादिगुणमयप्रकृतिपरिणाम
विशेषमनुष्यत्वादिसंस्थानपिंडसंसृष्टंपिंडविशेषादुत्क्राम
तंपिंडविशेषेवस्थितंवागुणमयानविषयानभुंजानंवाकदावि
दपिप्रकृतिपरिणामविशेषमनुष्यत्वादिपिंडाद्विलक्षणं
ज्ञानैकाकारंविमूढानानुपश्यंति विमूढाः मनुष्यत्वादि
पिंडाकारात्माभिमानिनः ज्ञानचक्षुषस्तुपिंडात्मविवेकवि
षयज्ञानवंतः सर्वावस्थमप्येनंविविक्ताकारमेवपश्यंति १

अभिनवगुप्तकृत टीका ९ एकादशे श्लोके उक्तार्थम् १

व्याहार्थं १

परमार्थप्रपा टीका २

अथैनदेवप्रकटयन्नाह उत्क्रामंतमिति विमूढात्मपरमात्मानंप्राणे
नसहमिवममंनेवाशरीरस्थंवाउत्क्रामंतमितोदेहाद्गच्छंतमन्वेते
नइंके इहदेहमाकाशमात्रस्यविनाशेदेहनाशतः अर्थभूता
निशोचंतिनष्टआत्मेतिशंकयंति तथादेहाकारेणस्थितंभुंजा
नंगुणान्वितंवाअनवेलंपश्यंति अथज्ञानरूपंचक्षुर्येषांतेतत्वद
र्शिनः स्वगृहादन्यगृहंप्रतिनीयमानस्यघटस्यतदाकृताका
शवल्लिंगदेहावृतमात्मानमुत्क्रामंतमनवेलंपश्यंति तथाभ्रम
त्कुलालचक्रकीलकवत्स्थितंपश्यंति तथाप्रतिमारूपदेवतादि
शितंनैवेद्यवज्ञानंपश्यंति तथाकाश्मीरोदरप्रतिफलितजपा
कुसुमारुणंयोगवत्सत्वादिगुणान्वितंपश्यंति तथाचोक्तंता
वात्मनोव्यापकत्वाद्गमनागमनेनसंभवतिकिंतलिंगदेहाधि
ष्ठितंमनएवगच्छतीतिपूर्वंव्याख्यानमेवं श्रुतिरपि यत्नेयमेवे
वस्वतंमनोजगामदूरकं तत्त आवर्तयामसीहक्षयायजीवसे

इति भाष्यं तत्र पूर्वसनातिनाम्नो राज्ञश्चत्वारः सर्वध्वादयः सहोद
राः पुरोहिता आसन् तेषु सर्वध्वः कैश्चित् दूषिभिर्विषेणाभिचारि
केणाहतस्तं पुनर्जीवयितुं त्रयो वंधवः प्रयत्नं सूक्तं तथा इमम
त्रं पठंति [illegible] यत इति भोस्सर्वंधोयन्नेमनः दूरकं दूरं यथाभव
ति तथा वैवस्वतं विवस्वतः सूर्यस्य पुत्रं यमं प्रतिजगाम तत्तेमनः
इहस्थे शरीरे आवर्तयामसि पुनरावर्तयिष्यामि कस्मै प्रयोज
नाय तत्राय पुनरिह वसतये तथा जीवसे चिरकालं जीवनाय ९

वनमाली टीका ९

उत्क्रामंतं देहांतरं गच्छंतं पूर्वस्मात् स्थितं वापि तस्मिन्नेव देहे भुं
जानं वा शब्दादीन् विषयान् गुणान्वितं सत्वरजस्तमोहात्मकैः
सत्वादिगुणकार्यैरन्वितं एवं सर्वास्ववस्थासु दर्शनयोग्यं स
न्निहितं दर्शने विमूढाः देहात्मभोगवासनाकृष्टचेतसः यात्मत
त्वविवेकायोग्यानानुपश्यंति ये ज्ञानचक्षुषो विवेकिनस्ते पश्यं
त्येव ९

श्रीमद्वैजयन्ती टीका ९

ननु पदियः शरीरस्थः सर्वेंद्रियैः सर्वविषयान् भुंक्ते तर्हि सर्वैर्जनैः
सकृत्तोनुज्ञायत इत्याशंक्याविवेकिभिरेव ज्ञायते न त्वविवेकिभि
रित्याह उत्क्रामंतमिति गुणान्वितं प्रकृतिपरिणामसत्वादिगुणम
यमनुष्यादिसंस्थानशरीरसंस्पृष्टं यद्वा सत्वरजः तमोहंद्र्यादिभिर
न्वितं युक्तं गुणमयाच्छरीरादुत्क्रामंतं निस्सरंतं तस्मिन् शरीरे स्थितं वा
गुणमयान्विषयान् भुंजानं वा एवंभूतमनुभवाहंममेत्यात्मानं विमू
ढामनुष्यत्वादिशरीराभिमानिनश्चिरंतनवासनाकृष्टचित्ततया
विवेकज्ञानहीनानानुपश्यंति कदाचिदपि प्रकृतिपरिणामवि
शेषमनुष्यत्वादिपिशाचादिलक्षणे ज्ञानैकाकारमात्मानं नानुभ
वंति स्पर्शः ज्ञानचक्षुषो विवेकज्ञानेनात्मानं पश्यंति
शरीराद्विविक्तमनुभवंति ९

मधुसूदनी टीका ९

^ एवं देहगतं दर्शनयोग्यमपि देहात् ॥

^ उत्क्रामंतं पूर्वस्माद्देहाद्देहांतरं गच्छंतं स्थितं वापि तस्मिन्नेव देहे
भुंजानं वा शब्दादीन्विषयान् गुणान्वितं सत्वरजस्तमोहात्मकैः

गुणैरन्वितं एवंसर्वास्ववस्थास्वदर्शनयोग्यमप्येनं विमूढा दृष्टादृ
ष्टविषयभोगवासनाकृष्टचेतस्तयात्मानात्मविवेकायोग्यानना
नुपश्यंति अहोकष्टंवर्त्तत इत्यज्ञान[illegible]नक्रोशतिभगवान् येन
प्रमाणजनितज्ञानचक्षुषाविवेकिनस्तएवपश्यंति [illegible]
[illegible] १०

सदानंदी टीका ११

एवंदेहगतंजीवंदर्शनार्हमपिस्फुटं देहांतरंचगच्छंतंपूर्वस्मा
द्देहतस्तथा १ तस्मिन्नेवस्थितंवापिदेहेभुंजानमादरात् शब्दादी
न्विषयान्युक्तंसत्वाद्यैःस्वादिभिर्गुणैः एवंसर्वास्ववस्थासुदर्शना
र्हंहिसात्त्विकांविषयाकृष्टचित्तत्वाद्देहाद्यध्यासनोजडाः २ मोहा
ज्ञानान्नपश्यंतिस्वात्मानंनहिलक्षणं अहोकष्टंकिलेत्यज्ञानान्विक्रो
शतिमाधवः ३ येनप्रमाणज्ञानवच्चक्षुष्मन्तेविवेकिनःपश्यंती
तिपुराणाव्याख्यातेतिश्रीहरिरूनमान १०

नीलकंठी टीका १२

तमेवंभूतंमनःषष्ठानींद्रियाणिप्राणांश्चाधिष्ठायतेषामुत्क्रमणेनो
त्क्रामंतंतेषांस्थित्यास्थितंतेषांभोगेनभुंजानंतेषांसत्वरजस्तमोगु
णप्रकृतत्वेनगुणान्वितंचघटस्थंयमिवघटाकाशमिवचाघटगमना
दिमंतंस्वतस्तत्क्रमणादिशून्यमपिविमूढास्तत्ताविकरूपेनानानुप
श्यंति ज्ञानचक्षुषस्तुपश्यंति उपाधेरेवोत्क्रमणादिकंनतूपहित
स्यात्मनइतिजानंत्येवेत्यर्थः १०

आनंदीटीका १३

निष्क्रान्तमस्मिन्नेवशरीरेवर्त्तमानमुत्क्रमन्तमिदंशरीरंत्य ९
क्त्वाशरीरान्तरंगच्छन्तम् गुणान्वितंगुणानांसत्वादीनामन्वितं
कार्यकारणत्वेनसमवेतंफलदुःखमोहात्मकमिहपरत्रचभुं
जानंविमूढास्तमसान्धानानुपश्यंतिज्ञानचक्षुषःपश्यंतियाव
त्तायंविमुच्यतेतावदेषदेहेत्वज्ञः यथातृणजलायुकातृणस्था ९
स्थितःपूर्वस्यान्तंगत्वातृणान्तरमाश्रयतितथायस्मिन्देहेविषयानुप
भुंजानोवसिष्टकर्मफलभोगार्थंदेहान्तरमाश्रयतीतिसादात्रकृ

वंति अत्रोपायमाह ९ ॥

रामकंठीटीका १४

तिष्ठंतं लब्धव्यपदेशात्मानं कस्मिंश्चिच्छरीरे तेन तेन जात्यादिना व्यप
देशेनावच्छिन्नतया स्थितिमनुभवंतं तथोत्क्रामंतं तस्मात् देह
शरीराच्छरीरांतरमाश्रयणायोत्क्रामंतं जन्ममरणयोगित्वव्य
पदेशभजंतं तथा तदंतराले गुणान्वितं सत्वादिगुणसंपृक्तं शब्दा
दिविषयजं सुखदुःखात्मकं भोगमनुभुंजानं वेदकत्वमात्रेण तद्भोक्
तृव्यपदेशभाजमिति जन्ममरणस्थित्यवस्थास्वप्यनस्मिन्नेव स्वा
भाविके सर्वदेहाधिष्ठातरि स्वरूपेणागृह्यमाणेन वर्तमानं विमू
ढा मायाशक्तिमहिम्ना मनागपि स्वरूपप्रत्यवमर्शानुन्मेषलक्ष
णेन विशेषेण मूढा विवेचनसंसम्यग्ज्ञानरहितास्तां नानुपश्यंति
परमार्थिकरूपेण स्थितमपि तथा प्रत्यवमर्शाभावान्न साक्षात्कु
र्वंति के तर्हि तं पश्यन्तीत्याह ज्ञानचक्षुषः ज्ञानं यथावस्थितव
स्तुसंवेदनमेव चक्षुर्लोचनं येषां ते पश्यंत्यात्मतया साक्षात्कुर्वन्ति
न ह्यसौ रूपात्मकविषयसाधनभूतेन चक्षुरात्मनेंद्रियेण दृश्यते
तद्दर्शने सम्यग्ज्ञानमेव साधनमतस्तत्र चक्षुष्ट्वेन निरूपितं किं
च ९ ॥

लासिकी [illegible]टीका १५

+ नन्वेवं सोपाधिकत्वेनास्य जीवस्य स्थूलतया सर्वेषां दृश्यतो गोचरत्वप्रसक्तिरित्यत आह ॥

+ एवं जीवमुत्क्रामंतं देहान्निःसरंतं वा स्थितं वापि देहे स्थितिं गच्छंतं
वा गुणान्वितं गुणविकारैरिंद्रियादिभिः सहितं शब्दादीन्विषयान्
भुंजानं वा विमूढा देहाहंभाविनो नानुपश्यंति न साक्षात्कुर्वंति किंतु
ज्ञानचक्षुषः प्रत्यभिज्ञालक्षणज्ञानेनेत्र युक्ताः एवं जीवमेतावव
स्थासु पश्यंत्येव [illegible] ९ ॥

पंचोले टीका

ननु देहेंद्रियादिसंघातव्यतिरेकेणाप्येवंभूतमात्मानं सर्वे किं न प
श्यंति तत्राह उत्क्रामंतमिति एवं देहगतं जीवं एवं देहादुत्क्रामंतमपि ५३
वा स्थितं तस्मिन्देहे वर्तमानं वा शब्दादीन्विषयान्भुंजानमनुपल

भुमानं गुणान्वितं गुणकार्यैः सुखदुःखमोहाद्यैः अन्वितं सर्वं एवं
भूतमप्येनं दर्शनगोचरप्राप्तमपि विमूढाः दृष्टादृष्टविषयभोगब
लादाकृष्टचित्ततया अनेकधा मूढा नानुपश्यंति अहो कष्टमि
त्याक्रोशति भगवान् ये तु प्रमाणजनितज्ञानचक्षुषो विविक्तदृ
ष्टयः ते एवैनं पश्यंति ९

रगावीरसमिद्धोधिनी॥

देहगतत्वाद्धृदयं जीवो दृश्यः किं न भवतीत्याहोत्क्रामंतमिति
पूर्वस्माद्देहाद्देहांतरं गच्छंतं स्थितं वापि तस्मिन्देहेऽज्ञाने
वाचाहारीन्विषयान्भुंजानं वा गुणान्वितं सुखदुःखमोहा
त्मकैर्गुणैरन्वितमेवं सर्वास्ववस्थासु दर्शनयोग्यमप्येनं वि
मूढा भार्यापुत्रादिभोगरागदार्ढ्यात्तमोदितास्ततः करणपटुतानानु
पश्यंति ये तु ज्ञानचक्षुषः ज्ञानस्वरूपमात्मज्ञानविषयो निश्च
यः स एव चक्षुर्येषां ते ज्ञानचक्षुषस्ते तु सम्यगनुष्ठितस्व
धर्मत्वाद्विविक्तमपापमेनं पश्यंतीत्यर्थः १०॥

मधुभाष्य

उत्क्रामंतमित्यादिना यतंतोऽज्ञानं प्राप्य प्रकृतात्मानोऽ
शुद्धबुद्धयः पूर्वोक्तमेव ज्ञानं प्रपंचयति १०॥

भाषाअनुवादटीका

जो कहो कि ऐसे आत्मा को कार्य कारण समूह से भिन्न रूप स
व कोई क्यों नही देखते इस पर कहते हैं कि देहान्तरगामी अ
थवा उसी देह मे स्थित या विषयभोगी किम्बा इन्द्रियादियु
क्त जीव को विशेष मूढबुद्धि सब नही देखते हैं परन्तु ज्ञान
ही जिस के चक्षु हैं ऐसे विवेकी मनुष्य ही देखते हैं १०

दोहा

जातहि अथवा स्थितहि को भोगत गुणसंग कोय मूढ
लखें नहि ताहि को ज्ञाननयन लखसोय १०

58

यतंतोयोगिनश्चैनंपश्यंत्यात्मन्यवस्थितं य
तंतोप्यकृतात्मानोनैनंपश्यंत्यचेतसः ॥

शांकरभाष्य टीका १

केचित्तु यतंतः प्रयत्नं कुर्वंतो योगिनश्च समाहितचित्ता एनं प्रकृ
तमात्मानं पश्यंत्ययमहमस्मीति उपलभंते आत्मनि स्वस्यां बुद्धा
ववस्थितं यतंतोपि शास्त्रादिप्रमाणैरकृतात्मानोऽसंस्कृतात्मा
नः तपसेंद्रियजयेन च दुश्चरितादनुपरता अशांतदर्पाः प्रय
त्नं कुर्वंतोनैनं पश्यंत्यचेतसोऽविवेकिनः ॥

आनंदगिरिकृत टीका २

ज्ञानचक्षुः शब्देन न्यायानुगृहीतं शास्त्रं ज्ञानसाधनमुक्तं तत्कि
मिदानीं शास्त्रमात्रेण न्यायानुगृहीतेनात्मानं पश्यंति नेत्याह के
चित्त्विति प्रयत्नः श्रवणमननात्मकः शास्त्रादिप्रमाणैर्यतंतोपी
ति संबंधः असंस्कृतात्मत्वं प्रकटयति तपसेति दुश्चरितादवि
रतिफलं कथयति अशांतेति अशुद्धबुद्धीनामविवेकिनां सद
पि श्रवणादि न फलवदिति मत्वाह प्रयत्नमिति ॥

स्वामिकृत टीका ३

दुर्ज्ञेयश्चायं यतो विवेकिष्वपि केचिदेव पश्यंति केचिन्न पश्यंती
त्याह यतंत इति यतंतो ध्यानादिभिः प्रयतमाना योगिनः केचि
दात्मानमेनमात्मनि देहेऽवस्थितं विविक्तं पश्यंति शास्त्राभ्यासादि
भिः यत्नं कुर्वाणा अपि अकृतात्मानः अविशुद्धचित्ताः अतएवाचे
तसो मंदमतयः एनं न पश्यंति ॥

पैशाचभाष्य टीका ४

यतंतः यमनियमादियोगानुष्ठानेन प्रयत्नं कुर्वाणाः यतमाना यो
गिनः योगः सम्यग्ज्ञानं तत्र प्रवृत्ताः एनमात्मानं पश्यंति उपलभंते
आत्मनि शरीरे यतंतो योगानुष्ठाने प्रयतमाना अप्यकृतात्मानः
अभ्यासवैराग्याभ्या[illegible]मसंस्कृतांतःकरणाः नैनं पश्यंत्यचेत
सः अविवेकिनः ॥

रामानुजभाष्य टीका ५

श्री·
गी·टी·
पं·

59

यतंतश्चेति मत्प्रपत्तिपूर्वकं कर्मयोगादिषु यतमानास्तैर्निर्मलांतःक
रणा योगिनो योगाख्येन चक्षुषात्मनि शरीरे वस्थितमपि शरीरा
द्विविक्तं स्वेन रूपेणावस्थितमेनं पश्यंति यतमाना अप्यकृतात्मा
नो मत्प्रपत्तिविरहिणस्तत एवासंस्कृतमनसः तत एवाचेतसः
आत्मावलोकनसमर्थचेतोरहिताः नैनं पश्यंति एवं विविक्तादी
नामिंद्रियसन्निकर्षविशेषसंततमसन्निरसनमुक्त्वेनेंद्रियानुग्रा
हकतया प्रकाशकानां ज्योतिषामपि प्रकाशकं ज्ञानं ज्योति
रात्मा मुक्तावस्थो जीवावस्थश्च भगवद्विभूतिरित्युक्त तद्धाम परं
मम ममैवांशो जीवलोके जीवभूतः सनातनः इति [illegible]
[illegible]
[illegible] ॥

अभिनवगुप्तकृतटीका ९

मनः इत्यनेनांतःकरणमुपलक्ष्यते अतएव शरीरस्थितियोगाति ह१
ष्ठते शरीरांतरग्रहणाय उत्क्रामंतं विषयान्वा भुंजानं मूढा न प
श्यंति प्रबुद्धत्वात् प्रबुद्धास्तु सर्वं चैव बोधरूपमनुसंदधाना ज्ञा
नेनैव वेत्त्यलमसमाधियत्नेषां यत्नपरत्वात् अकृतात्मनो तु यत्ना
पिन फलायापरिपक्वकषायत्वात् नहि शारदसलिलादिसाम
ग्रीसंमर्देपि धान्यबीजान्युप्यमानानि फलसंपदे अलं अतएव सा
मग्रेव साम्यं न भवति अस्यदेव किल मधुमासंसम्भृतजलध
रपटलीप्रेरितमेमः कावदेव वसाप्यः यस्यां शिशिरविवशीकृता
पार विकारस्पर्शो नैव कांतिः एवमकृतात्मनां यत्नो न सकलाग
परिपूर्णकत्वमायाति अतएव प्राप्याप्युपायं पारमेश्वरं दीक्षा
दि येन त्याविध क्रोधमोहादि ग्रंथिसंदर्भगर्भीकृतेनांतर्हृदेशोले
पूपाय एव साकल्येन भजतीति मंतव्यं तदुक्तं क्रोधादिहोहशप
मानेष्वितिनोपिन मुक्तिभागिति ॥

परमार्थप्रपा टीका १

अथ ज्ञानचक्षुषोपि हेयाश्रनुभवितः शास्त्रज्ञानवंतस्येति दर्श
यति यतंतश्चेति स्वरूपप्राप्त्यर्थं यतंतः प्रयत्नं कुर्वंतो योगिनस्ता
नमात्मानं स्वात्मनि देहांतर्हृदयाकाशे व्यवस्थितं पश्यंति यथात्र

कृतात्मानोऽनधिगततत्त्वार्था अत एवाचेतसोऽल्पबुद्धयः शास्त्रप
ठनादिभिरुपायैर्यतंतोप्येनं न पश्यंति ॥

वनमाली टीका ८

तदेव विवृणोति आत्मनि देहेवस्थितं ज्ञानानंदघनं योगिन ए
काग्रचित्ताः यतंतो विषयेभ्यः इंद्रियप्रत्याहारं कुर्वंतः पश्यंत्ये
नं जीवस्वरूपं अकृतात्मनोऽशोधितांतःकरणाः अत एवाचेतसो
विवेकशून्या नैनं पश्यंति महांतस्तु शरीरं यदवाप्नोति यस्मारभ्य
यतंतोप्यकृतात्मानश्चैनमीश्वरपरतया व्यावृतते तत्समयोगे
वात्ते यत्त्वस्य मुख्यत्वस्य भगवत्येव संभवात् परंतु यदवाप्नोत्
क्रामतीत्यादौ सर्वत्रोत्तरभावित्वमित्यर्थो बोध्यः जीवशरीरमा
पद्यत्क्रमयतीत्यादि ॥

अथ वैजयंती टीका ९

येमत्स्वरूपत्तिपूर्वककर्मयोगेन शुद्धान्तःकरणास्त एव ज्ञाननेत्रेणैनं
पश्यंति ये तु मत्स्वरूपत्तिविरहिणस्ते यतमाना अपि न पश्यंतीत्यय
मात्माविदुर्ज्ञेय इत्याह यतन्त इति केचिद्योगिनो यतंतो मत्स्मृतिपू
र्वकेशफलानुसंधानरहितश्रवणादिमत्कर्मयोगादिषु यतमानाः
शुद्धांतःकरणा ज्ञानयोगाख्येन चक्षुषा आत्मनि स्वशरीरेऽवस्थितं
शरीरादिभिन्नस्वरूपेणावस्थितमेनमात्मानं पश्यंति केचित्तु योगि
नो यतंतोपि कर्मयोगादिषु यतमाना अपि मत्स्मृतिविरहिता म
लिनांतःकरणा अकृतात्मानोऽसंस्कृतमनसोत एवाचेतसः स्वस्व
रूपावलोकनासमर्थचित्ताः यतंतः शरीरस्थमप्यात्मानं न पश्यंती
त्यात्मतत्त्वं दुर्ज्ञेयमिति भावः ॥

^पश्यंति ज्ञानचक्षुष इत्येतद्विवृणोति ॥

मधुसूदनी टीका १०

^आत्मनि स्वबुद्धाववस्थितं प्रतिफलितमेनमात्मानं यतंतो ध्याना
दिभिः प्रयतमाना योगिन एव पश्यंति चो वधारणे यतमाना अप्यकृ
तात्मानः यत्नादिभिरशोधितांतःकरणाः अत एवाचेतसो विवे
कशून्या नैनं पश्यंतीति मूढा नानुपश्यंतीत्येतद्विवरणं इदानी
यत्पदं सर्वावभासनक्षमा अप्यादित्यादयोपि भासयितुं न क्षमंते
यत्प्राप्ता मुमुक्षवः पुनः संसाराय नावर्तंते यस्त्वपदस्योपाधिभे

दमनुविधीयमानानीवाः घटाकाशादयइवाकाशस्यकल्पितांशा
स्तथैवसंसारमनुभवति तस्यपदस्यसर्वात्मत्वसर्वव्यवहारास्पदत्व
प्रदर्शनेन ब्रह्मणोहिप्रतिष्ठाहमितिप्रागुक्तंविवरीतुंचतुर्भिः
श्लोकैरात्मनोविभूतिसंक्षेपमाह ॥११

सदानंदी टीका ॥११

विहण्णेतिनदेवेशोविभागेनयथायथं ध्यानाद्येर्यतमानायेप
श्यंतिस्पादिणि यतोविवेकशून्यास्तेमोहाक्रांताः स्वरागिणः ॥११

नीलकंठी टीका ॥१२

यतंतोयत्नशीलायोगिनश्चएनंआत्मनिबुद्धौअवस्थितंविभुम्
कांत्यादिहीनंअसंगंपश्यंति यतंतोपिअकृतात्मानः येयज्ञादि
भिरशोधितचित्ताः एनंनपश्यंति यतः अचेतसः अविर्जितचि
त्ताः पाषाणतुल्याइत्यर्थः ॥११

आनंदीटीका ॥१३

योगिनोयोगाभ्यासेनसमाहितचेतसः यतंतः श्रवणादियत्नपराः
येनमात्मानमात्मनिहृदयेवस्थितंपश्यंतिअकृतात्मानः अनात्म
ज्ञाः यतंतोपियत्नपराअपिअचेतसः असमाहितचित्तानपश्यं
तिनतज्ज्ञासयनेस्हर्घइतियकंकैलन्तयति ॥११

रामकंठीटीका ॥१४

येपिज्ञानचक्षुषोयोगिनः समाहितास्तेध्यानेनपरमात्मानंयथेक्र
क्रमेणयतमानाः नित्याविलज्ञोत्साहनयायत्नपराः संतआत्म
न्यवस्थितंसदास्वभावतएवापरोक्षतयावर्तमानमेवपश्यंतियथा
वत्स्वभिजानंतीत्यर्थः अकृतात्मानस्तुयतमानाअपिएनंनपश्य
तीतिकिमुक्तंभवति परमेश्वरानुग्रहंविनानुग्रहविहितसम्यग्
ज्ञानत्वादकृतस्तद्दर्शनायासंपादितआत्मान्तःकरणायेस्तेताद्द
शाअसत्संगभाजोयतमानाअपिनैनंकैश्चित्प्रकारेणायु
क्ताअपिनैवपश्यंतिसम्यग्ज्ञानलक्षणस्यमुख्यस्यतद्दर्शनसाधन
स्याभावात् यस्मादयमेवमद्भुतशक्तिः परमात्मासोहमेवेत्यात्मनि
ष्ठत्वेनतस्यस्वरूपंप्रतिपादयितुमाह ॥११॥

ह योगिनो बुद्धियोगाद्यभ्यासमयोगयुक्ता यतंतः ध्यानादिभिः प्रयत्नं कुर्वं
माना: एनंजीवमात्मन्यवस्थितमात्मत्वेन स्थितं पश्यंति साक्षात्कुर्वं
ति ननु स्वतो व्यतिरेकेण अन्येषां दर्शनाभावमाह येचेतसोविवेक
शून्याः अकृतात्मानोयंजीवो न कृतं आत्मार्थं येस्ते एनंजीवंभेदेन विमर्शं
न इत्यर्थः ते यतंतोपि ध्यानादिना एनं न पश्यंति न साक्षात्कुर्वंति [illegible]
[illegible]
[illegible] ११ ॥

पंचोले टीका

अतिदुर्विज्ञेयत्वादात्मनो विविक्तं अपि केचिदेव सुकृतिनः पश्यं
ति न सर्वे इत्याह यतंत इति च एनः योगिनः समाहितचित्ताः य
तंतो यत्नं कुर्वंतः एनं प्रकृतिस्थमात्मानं स्वात्मनि स्वस्यां बुद्धौ अ
वस्थितं पश्यंति अनुभवंति अकृतात्मानः अजितेंद्रियाः अशांतदर्पा
अचेतसः अविवेकिनः शास्त्रादिप्रमाणैरात्मविचारमकुर्वंतो एनमा
त्मानं स्वबुद्धिस्थितमपि न पश्यंति ११

रणवीरसमिद्धोधिनी ॥

एतदेव विवृणोति यतंत इति एनं जीवं द्रष्टुं योगिनः कर्मयो
गिनो यतंते स्वधर्मानुष्ठानेनेति तथा ते आत्मनि देहे स्थित
मेनं न पश्यंति अकृतात्मान इति न कृतः शोधितः स्वधर्मा
चरणेनात्मा बुद्धिर्यैस्ते अकृतात्मानो दुष्टबुद्धय इत्यर्थः एनं
द्रष्टुं यतंतोपि कृतप्रयत्ना अपि अचेतस इति न चेतो येषामि
ति नभूमासेन नञ्याहः कृतत्वा चाकृतसाधनामपि नञ्समासेयह
चुके तच्चावायमर्थः न कृतितं स्वधर्मस्याकरणात्सकल्मषं
चेतो येषां ते अचेतसो दुष्टमानसा इत्यर्थः अत एव मलिनम
नोबुद्धित्वान्निषेधसमर्था मूढाः कथमेनं पश्यंतीति भावः ११

और यहं आत्मा दुर्विज्ञेय है क्यों कि विवेकियों के बीच भी कोई देखते और कोई नहीं देख सकते है सोई कहते हैं कि ध्यान आदि के द्वारा यत्नकारी योगी जन अपनी शरीर मे इस आत्मा को पृथक रूप से देखते हैं और शास्त्र अभ्यास से यत्न करके भी अकृतात्मा अर्थात अशुद्धचित्त मन्दमति लोग इस आत्मा को नहीं देखते हैं ११

दोहा

यत्न करत योगी इहै देखत अपने मेहूं यत्न करत भी
मूढ इहै लषत अचेतन तेहूं ११

यदादित्यगतंतेजोजगद्भासयतेखिलं यच्चं
द्रमसियच्चाग्नौतत्तेजोविद्धिमामकं १२

शांकरभाष्य टीका १

यत् पदं सर्वस्यावभासकमप्यग्न्यादित्यादिकं ज्योतिर्नावभासयते
यत्प्राप्ताश्च मुमुक्षवः पुनः संसाराभिमुखा न निवर्तन्ते यस्य च प
दस्योपाधिभेदमनुविधीयमाना जीवा घटाकाशादय इवाकाशस्यां
शास्तस्यपदस्य सर्वात्मत्वं सर्वव्यवहारास्पदत्वञ्च विवक्षुश्चतुर्भिः
श्लोकैः विभूतिसंक्षेपमाह भगवान् यदेति यदादित्यगतमादित्या
श्रयं किं तत् तेजोदीप्तिः प्रकाशोजगद्भासयते प्रकाशयत्यखिलं
समस्तं यच्चन्द्रमसि यच्छशभृति तत्तेजोऽवभासकं वर्तते यच्चा
ग्नौ हुतवहे तत्तेजोविद्धि विजानीहि मामकं मदीयं मम विष्णोस्तत्
ज्योतिः अथवा यदादित्यगतं तेजश्चैतन्यात्मकं ज्योतिश्चन्द्रमसि य
च्चाग्नौ तत्तेजोविद्धि मामकं मदीयं मम विष्णोस्तत्ज्योतिरित्यादि
ननु स्थावरेषु जङ्गमेषु च तत्समानं चैतन्यात्मकं ज्योतिस्तत्र कथ
मिदं विशेषणं यदादित्यगतमित्यादि नैषदोषः सत्वाधिक्यादावि
स्तरत्वोपपत्तेरादित्यादिषु हि सत्वमत्यन्तप्रकाशमत्यन्तभास्वरमतस्त
त्रैवाविस्तरं ज्योतिरिति तद्विशिष्यते न तु तत्रैव तदधिकमिति
यथाहि लोके तुल्येपि मुखसंस्थाने न काष्ठकुड्यादौ मुखमाविर्भ
वति आदर्शादौ तु स्वच्छे स्वच्छतरे तारतम्येनाविर्भवति तद्वत् १

आनंदगिरिकृत टीका २

अनन्तरश्लोकचतुष्टयस्य वृत्तानुवादद्वारा तात्पर्यार्थमाह तत्प
दमिति जीवात्मत्वेन चिद्रूपत्वमुक्तं तदीयचैतन्येनादित्यादीनाम
वभासकत्वाच्च ब्रह्मणश्चिद्रूपत्वमित्याह यदादित्येति चिद्रूपस्यैव
ब्रह्मणः सर्वात्मकत्वप्रतिपादकत्वेन श्लोकं व्याचष्टे यदित्यादिना आ
दित्यादौ तत्र तत्र स्थितं ब्रह्मचैतन्यज्योतिः सर्वावभासकमित्यर्थः
ब्रह्मणः सर्वत्वेन चिद्रूपत्वमेव विवक्षितमिति व्याख्यान्तरमाह
अथवेति चैतन्यज्योतिषः सर्वत्राविशेषादादित्यादिगतं विशेषण
मयुक्तमिति शङ्कते नन्विति सर्वत्र सत्वेपि क्वचिदेवाभिव्यक्तिविशे

श्री॰
गी॰ टी॰
पं॰

67

षादिशेषणमिति परिहरति नैषदोष इति तदेव प्रपञ्चयति आदि-
त्यादिष्विति सर्वत्र चैतन्यज्योतिषस्त्वे ऽपि क्वचिदेवाभिव्यक्त्या
विशेषणोपपत्तिं दृष्टान्तेन स्पष्टयति यथाहीति ॥ ल्प

स्वामिकृत टीका ३

तदेवं नतद्भासयते सूर्य इत्यनेन पारमेश्वरं परं धामोक्तं तत्प्राप्तानां
चापुनरावृत्तिरुक्ता तत्र संसारिणोभावमशंक्य संसारिस्वरूपं दे-
हाद्यतिरिक्तं दर्शितं इदानीं पारमेश्वरं रूपमनन्तशक्तित्वेन निरू-
पयति यदादित्येति चतुर्भिः आदित्यादिषु स्थितं यत्तेजो अनेकप्रका-
रेण तेजो विश्वं प्रकाशयति तत्सर्वं तेजो मदीयमेव जानीहि ॥

पिशाचभाष्य टीका ४

अतोयतमानाअकृतात्मानचेतसोनैवपश्यंत्यपिअहमात्मा अनेक-
यत्नात्मसंस्कारसाध्यत्वात् दुर्विज्ञेयस्तत्रापि सकललोकप्रसि-
द्धोहमित्याह यदादित्यगतं तेजः प्रकाशः अखिलं जगद्भासय-
ते यच्चन्द्रमसि तेजः यच्चाग्नौ तत्तेजो विद्धि मामकं तथा चश्रु-
तिः येन सूर्यस्तपति तेजसेद्धस्तदहं ज्योतिरीति ॥

रामानुजभाष्य टीका ५

यदिति अखिलस्य जगतोभासकं तेषामादित्यादीनां यत्तेजस्तन्मदीयं
तेजस्तैराराधितेन मया तेभ्यो दत्तमिति विद्धि [illegible]
[illegible]

अभिनवगुप्तकृत टीका ६ + चन्द्रदर्शी अज्ञाधिम् ॥

+ इदानीमचिन्त्यपरिणामविशेषमादित्यादीनां
ज्योतिष्मतां ज्योतिरपि भगवद्विभूतिरित्याह ॥

स्पष्टार्थं ॥

॥

परमार्थप्रपा टीका ७

अथ न तद्भासयते सूर्य इत्यादिना सूर्यादीनां भक्तीनामपि प्रमाणां-
तरागोचरस्यात्मनो दर्शकत्वमनभिमतं किं पुनः शास्त्राभ्यासप्र-
यत्नस्येति स च यन्न सूर्येन्दुनां स्वप्रकाशयत्वं स्वदत्तसामर्थ्यांवत्वं च
निरूपयन्नाह यदिति दिवा त्रैलोक्यप्रकाशकमादित्यगतं यत्तेज-
स्तथा रात्रौ चन्द्रस्य ज्योत्स्नारूपं अग्नेर्दीपरूपं यत्तेजस्तन्मामकं मदी-
यं विद्धि जानीहि योसावादित्ये पुरुषः सोसावहमिति श्रुतेः नैत्तिरी-
यकेपि यास्ते अग्ने सूर्ये रुचः उद्यतो दिवमातन्वन्ति रश्मिभिः ताभिः

सर्वाभिर्न्नेवजनतापनस्फुरपि भाष्यं आभोग्यमिसर्वे स्वरूपयतः
सद्दीदितस्यनेनतवपात्रचोदीमपः सूर्येवर्तमानाः संयोगरश्मि
भिः किरणैर्दिवस्वर्गं आनन्दंतिद्याम्भवतिनाभिः सर्वाभिम्न
र्भिर्नां सूर्यजनतापत्रचेदीमयेकुरु नद्धास्मलोपि शुष्काहवेवार्स्येयआदित्येनसमाजगामेति
भाष्ये सूर्यः शोषणशक्तिमांस्तेजोरूपयाविभूत्वा
वार्ष्येयः स्पस्यादित्येनसमाजगामेतिस्पष्टं १२ ॥

वनमाली टीका ८

उक्तं तु ते यत्स्वरूपज्ञानमुक्तं हरिभक्तिनो भवति सा तन्मा
हात्म्यज्ञानादेव भवतीति स्वमाहात्म्यमाह यदिति त्रिभिः य
दादि... त्येगतं स्थितं यच्चन्द्रमसि यच्चाग्नौ स्थितमनेकप्रकारं
भास्वरं रूपं परप्रकाशकं तेजो विश्वं प्रकाशयति तत्सर्वं माम
कं मदीयं विद्धि अहमेवादित्यादिषु सर्वं प्रकाशयामीत्यर्थः
यद्वादित्यादिषु परप्रकाशनरूपं तेजस्तन्मदीयं मद्रूपं मद
धीनं च विद्धीत्यर्थः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वं
विभातीति श्रुतेः १२

ऊसमवैजयन्ती टीका ९

एवं चेतनानां सूर्यवह्न्यनलादिज्योतिभिः प्रकाशनहेतुत्वेन
प्रकाशकत्वेन भगवदंशत्वेन च भगवद्विभूतित्वमुक्त्वाधुना
सूर्यादिषु यः प्रकाशकादिरूपो वेनन भागः सोपि भगवद्विभू
तिरिति दर्शयन् ... संसारसक्तानां मुमुक्षूणां च जीवानां ...
... भक्तिमुक्तिसाधनरूपो भगवानहमेवेति भावेनाह त्रि
भिः यदादित्यगतमिति यदखिलं सर्वं जगद्भासयते प्रकाश
यति आदित्यगतं सूर्ये स्थितं तेजो ज्योतिः यच्च चन्द्रमसि तेजो य
च्चाग्नौ तेजस्तत्सर्वं मामकं मदीयं विद्धि तैः ... सूर्यादिभिरा
राधितेन मया तेभ्यो दत्तमिति त्वं जानीहि उदितेन सूर्येण
ज्वलितेन वह्निना च दृष्टादृष्टभोगसाधनानि कर्माणि निष्पा
द्यन्ते तिमिरजाड्यनाशादयश्च सुखवहेन वो भवति उदितेन च
चन्द्रेण चौषधिपोषणं तापशान्तिर्ज्योत्स्नाविहारादिसुखामृतं च
भवति इति तेषां तत्साधकं तेजो महिभूतं भवतीत्यभिप्रा
यः १२

मधुसूदनी टीका १०

न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निरिति
श्रुत्यर्थं प्राग्व्याख्याने न तद्भासयते सूर्य इत्यादिना तमेव भांतमनुभा
ति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुत्यर्थं मनेन व्याख्याय
ते यदादित्यगतं तेजः चैतन्यात्मकं ज्योतिः यच्चंद्रमसि यच्चाग्नौ स्थि
तं तेजो जगदखिलमवभासयते तत्तेजो मामकं मदीयं विद्धि त्व
मीति हि यद्यपि स्थावरजंगमेषु सर्वेषु समानं चैतन्यात्मकं ज्योतिः
तथापि सत्त्वोत्कर्षेणादित्यादीनामुत्कर्षात्तत्रैव विस्तरं चैतन्य
ज्योतिरिति तैर्विशिष्यते यदादित्यगतमित्यादि यथा तुल्येपि मु
खसन्निधाने काष्ठ[illegible]दौ न मुखमाविर्भवति आदर्शादौ तु स
त्त्वे स्वच्छतमे च तारतम्येनाविर्भवति तद्वत् यदादित्यगतं तेज
इत्यत्र का पुनस्तत्तेजो विद्धि मामकमिति तेजोग्रहणात् यदादि
त्यगतं तेजः प्रकाशः परप्रकाशसमर्थो सितभास्वररूपं ज
गदखिलं रूपवद्वस्त्ववभासयते एवं यच्चंद्रमसि यच्चाग्नौ ज
गदवभासकं तेजस्तन्मामकं विद्धीति विभूतिकथनाय हि तृती
योऽध्यायो द्रष्टव्यः अन्यथा तन्मामकं विद्धीति पुनरावदूयात् ते
जोग्रहणमनर्थकं वेति भाव[illegible] १२

सदानंदी टीका ११

समस्तस्यापि सूर्याद्याः तमाः संतोवभासने यत्पदं न क्षमंते ज्ञाते
ऽपि भासयितुमनाक् १ यत्पदं विमलं प्राप्यानावर्तंते मुमुक्षवः
यत्पदज्ञानादमी जीवाः संसरंति भवांबुधौ २ तस्येदानीं पदस्यै
व सर्वात्मत्वविभूतिभिः सर्वस्य व्यवहारस्याप्यास्पदत्वं समा
श्रिते ३ विवरीतुं च तद्भिन्नं विभूतिं प्राह मापतिः यदादित्याश्रि
तं ज्योतिश्चैतन्यात्मकमुज्वलं ४ यच्चंद्रे यत्स्थितं चाग्नौ तेजो भास
यतेऽखिलं तत्तेजो वै सर्वं विद्धि मदीयं सर्वभासकं ५ तच्चैतन्या
त्मकं ज्योतिर्जंगमस्थावरेषु च समं यद्यपि सर्वेषु तथाप्यर्का
दितेजसा ६ सत्त्वोत्कर्षेण तत्रैवाविस्तरं ज्योतिरीश्वरं यथा तु
ल्येऽपि मुखादेः सन्निधाने मुखस्य च ७ नाविर्भवति वक्त्रं न हि पि
ण्यादौ तु निर्मले स्वच्छत्वतारतम्येनाविर्भवत्येवमेव तत् ८

यदादित्यादिगंतेजः स्थितभास्वरमेववा समस्तंरूपवहस्तस्फु
टंभासयतेजगत् ॥ मदीयंवैस्वतंत्त्वंविद्धिध्येयंमुमुक्षुभिः
विभूतिकथनायैवमर्थोभगवतोमतः १२

नीलकंठी टीका १२

कथंतर्हिसूर्यादीनामपिभासकत्वंलोकेदृश्यतेतेनतदपिमहा
वैष्णादेवेत्याह यदादित्येति अत्रादित्यादिपदैःकरणाधि
ष्ठात्र्योदेवतास्तदधिष्ठेयानिकरणानिचतंत्रेणोच्यंतेतेनय
दादित्यादिषुचक्षुरादिकरणाधिष्ठातृषुतत्तदधिष्ठेयेषुचक्षुरादिकर
णेषुचगतंविद्यमानंतेजोविषयप्रकाशनसामर्थ्यंसर्वंजग
द्भासयतेतत्तेजोमामकंमदीयंविद्धि येनसूर्यस्तपतितेजसेद्धः
येनचक्षुःपश्यतीत्यादिश्रुतिभ्यः एवमनध्येडमसोर्यदंत
रस्यंचप्रकाशनसामर्थ्यंतदपिमामकमेव तथायदाग
मेऽरव्याकृतादिविषयप्रकाशनसामर्थ्यंतदपिमामकमेवे
त्यर्थः अक्षरयोजनास्पष्टा १२

आनंदीटीका १२

आदित्यगतंतेजःयज्जगतोभासकंवृष्ट्यादिनाधारकंचचंद्रग
तंतेजोभासकमाप्यायकंच अग्निगतंतेजःप्रकाशनदहन
शोषणस्वेदनपाचनात्मकंचयत्तदेतेषामतेजोनुगमादि
त्यर्थः [illegible] १२ ॥

रामकंठीटीका १४

यदेतदादित्यांतर्गतंसूर्यसंनिविष्टंतेजोज्योतिःसमस्तंभुव
नमभिव्यंजकतयाप्रकाशयति यच्चेदमस्मिन्सोमेसततंविष
मखिलंजगदाप्याययति यच्चाग्नौजातवेदसिस्थितंपाका
दिस्वकार्यंनिवर्तयतितत्त्रिधावभासमानमपिममैवैकस्यसं
वेद्यैकमेवप्रकारंसंविदात्मकंजानीहि नह्यसंविदात्मकत्वेक
स्यचित्स्वकार्यस्यसंपादनपर्यवसायितोपपद्यते संविदेके
व एकस्यपारमार्थिकस्यसंवेदितृर्ममैवासाधारणोधर्मः।

+एवमीश्वरस्यसोपाधिकंरूपमुपवर्ण्य इदानींतदेवपारमेश्वरंरूपमनंतशक्तित्वेननिरूपयतित्रिभिः ॥

ततोहमेवसर्वमित्येतत्परमंतदत एवाह १२ ॥

लासिकी ब[illegible]टीका १५

+यदेतद्विश्वप्रकाशकमादित्यसन्निविष्टंतेजः यच्चविश्वा
प्यायकंचंद्रस्थितंतेजः यच्चाग्नौस्थितंपाकादिनिवर्तकंतेज
स्तत्सर्वमदीयमेवविद्धिजानीहि [illegible] १२ ॥

पंचोले टीका

तत्रसंसारिणां स्वभावमाशंक्यसंसारिस्वरूपंदेहादिव्यति
रिक्तंदर्शितमिदानींतदेवपरमेश्वरस्वरूपंयत्सर्वस्यावभासकं
यत्तुकेनचिदवभास्यतेयस्मात्सानानिवर्ततेतदनंतशक्ति
त्वेनसर्वात्मत्वेननिरूपयति यदादित्येति चतुर्भिः यदादित्य
गतंतेजअखिलंसमस्तंजगद्भासयते यच्चंद्रमसियच्चाग्नौत
त्तेजोविद्धिमामकंमदीयंवैसर्वंविद्धिजानीहि अथवायदादि
त्यादिगतंतेजःचैतन्यस्वरूपंयेनचैतन्येनादित्यादयोभासयंतेअ
थवायेनचैतन्येनसूर्यादयःसर्वमनुभवंति तच्चैतन्य[illegible]म
दीयंममविस्मोविद्धिजानीहि १२

रणवीरसमिद्धायिनी ॥

इदानींतद्भासयतेसूर्यइत्यनेनयद्गत्वापरमेश्वरपदमुक्तंत
स्यैवयमस्यसर्वात्मकत्वंसर्वव्यवहारास्पदत्वंचदर्शयि
तुमात्मनोविभूतिसंक्षेपमाह यदेति स्पष्टार्थइति १२

मधुभाष्य ॥

यदादित्यगतमित्यादिनागोभूमिवेदनिर्णयात्मिकामीमां
सावेदांतः तथासामवेदेभाल्लवेयशालश्रुतिः सर्वेदांतक
सकालकइति सप्रेवशुक्तिसूरकस्मकालकइतीति तत्र
भूतानिब्रह्मादीनिकूटस्थःप्रकृतिः तथाचपाकेतव्य
श्रुतिः प्रजापतिःप्रमुखाःसर्वेजीवाःसरावरःपुरुषोवैप्रधानं
तदुत्तमंचान्यमुदाहरंतिज्ञात्वातानातमाततविधानमेकमिति १२

इससे न तद्भासयते सूर्य इत्यादि इसी अध्याय के सप्तम आदि श्लो
के द्वारा परमेश्वर का जो परम धाम सो कहा गया है और तद्धा
म प्राप्त जीवों की अपुनर आवृत्ति कही गई है और तद्विषयक
संसारी के अभाव आशङ्कापर देहसे भिन्न संसारी स्वरूप को भी
देखाय है अब सोई परमेश्वर सम्बन्धी रूप इहां से ले कर चार
श्लोक से अनन्त शक्ति क्रमसे निरूपण करते हैं कि सूर्यादि मे
स्थित अनेक प्रकार तेज जो विश्व को प्रकाश करैं हैं ऐसे ही च
न्द्र मे स्थित जो तेज अखिल संसार को प्रकाश करते हैं तैसे ही
अग्निस्थ तेज ब्रह्माण्ड दीप्त करै हैं सो सब तेज हमार ही है यह
जानो १२

दोहा

जोही तेज आदित्य में जगत प्रकाशें जोय जोही चंद्रमे
अग्निमे जान तेज मम सोय १२॥

गामाविश्य च भूतानि धारयाम्यहमोजसा पुष्णा
मि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥१३॥

शांकरभाष्य टीका १

किञ्च गामिति गां पृथिवीमाविश्य प्रविश्य धारयामि भूतानि ज
गदहमोजसा बलेन यद्बलं कामरागविवर्जितमैश्वरं जगद्विधा
रणाय पृथिव्यां प्रविष्टं येन गुर्वी पृथिवी नाधः पतति न विशीर्य
ते तथा च मन्त्रवर्णः येन द्यौरुग्रा पृथिवी च दृढेति स दाधार पृथि
वीमित्यादिश्चातो गामाविश्य भूतानि चराचराणि धारयामीति यु
क्तमुक्तं किञ्च पृथिव्यां जाता ओषधीः सर्वा व्रीहियवाद्याः पु
ष्णामि पुष्टिमतीरसस्वादुमतीश्च करोमि सोमो भूत्वा रसात्म
कः सोमः सन् रसात्मको रसस्वभावः सर्वरसानामाकरः सोमः
स हि सर्वा ओषधीः स्वात्मरसानुप्रवेशेन पुष्णाति ॥१३॥

आनंदगिरिकृत टीका २

एतस्य सर्वात्मत्वे प्रकृतपदस्य युक्तमित्याह किञ्चेति ईश्वरो
हि पृथिवीदेवतारूपेण पृथिवीं प्रविश्य भूतशक्तिं जगदै
श्वरेणैव बलेन बिभर्ति ततो गुर्व्यपि पृथिवी विदीर्य नाधः प
ततीत्यत्र प्रमाणमाह तथा चेति परस्यैव हिरण्यगर्भात्मनावस्थानं
मन्त्रवर्णयोरन्यपरतेति भावः देवतात्मना द्यावापृथिव्योरुग्र
त्वमुद्धरणत्वसामर्थ्यं तथापीश्वरायत्तमेव स्वरूपधारणं तद
पेतस्य दुर्बलत्वादिति द्रष्टव्यं ईश्वरस्य सर्वात्मत्वे हेत्वन्तरमाह
किञ्चेति रसात्मकसोमरूपतापन्नावपि कथमोषधीरीश्वरः
सर्वाः पुष्णातीत्याशंक्याह सर्वा इति ॥१३॥

स्वामिकृत टीका ३

किं च गामाविश्येति गां पृथ्वीमोजसा बलेनाधिष्ठायाहमेव च
राचराणि भूतानि धारयामि अहमेव रसमयः सोमो भूत्वा व्री
ह्याद्योषधीः संवर्धयामि ॥१३॥

पिशाचभाष्य टीका ४

किंचाप्यत गां पृथिवीमाविश्य भूतानि स्थावरजंगमात्मकानि धा

श्री· गी· टी· पं·

रयामि विभर्मि अहमात्मा ओजसा बलेन किंचाप्यत्र पुष्णामि सरसाः
करोमि रसात्मकः रसाधारभूतः १३

रामानुजभाष्य टीका ५

+ पृथिव्याश्च भूतधारिण्याः धारकत्वशक्तिर्मदीयेत्याह॥ +

गामिति अहं पृथिवीमाविश्य सर्वाणि भूतान्योजसा मम प्रतिदेह
सामर्थ्येन धारयामि पुष्णामीति तथाहममृतरसमयः सोमो
भूत्वा सर्वौषधीः पुष्णामि १३

67

अभिनवगुप्त टीका ६ वत्नदीपोक्तार्थमु
स्वार्थं १३
॥

परमार्थप्रपा टीका ७

[illegible]
[illegible]
[illegible] अथ च वेदान्तमोदनाद्वादस्वरूपेण स्व
दत्तसामर्थ्यमनुवदन्त्याः सामवेदश्रुतेः तात्पर्यमाह गामावि
श्येति द्वाभ्यां अहं रसात्मकः रसरूप याविभूत्वा सोमो भूत्वा गां
पृथिवीं चाविश्य सर्वा ओषधीर्धान्यफलवन्तः पुष्णामि वर्द्धया
मि तत ओजसा त्वादिसामर्थ्येन भूतानि धारयामि पोषयामि
ओषधिभ्यो त्वमन्नाम्रुतवदिति श्रुतेः १३

वनमाली टीका ८

गां भूमिमोजसाचिन्त्यशक्त्याविश्य प्रविश्य चराचरभूतानि धारया
मि भुवि पतनादिधारणसामर्थ्येन मदीयमित्यर्थः अमृतमयद्र
वः सोमो भूत्वा तत्र स्थित्वा व्रीह्याद्यौषधीः पुष्णामि वर्द्धयामि चे
ष्टयदौषधीपोषणसामर्थ्यं तन्मदीयमित्यर्थः १३

जमसवैजयन्ती टीका ९

भूतधारिण्याः पृथिव्या धारकत्वरूपा शक्तिरपि ममैवेत्याह
गामविश्येति गां पृथिवीमोजसाऽप्रतिहतसामर्थ्यरूपया स्वश
क्त्याऽऽविश्य पांसुमुष्टिवद्दृढीकृत्य येन द्यौरुग्रा पृथिवी च दृढे
ति मन्त्रवर्णात अहं भूतानि स्थावरजङ्गमानि धारयामि अन्यथा
सौसिकतामुष्टिवद्विशीर्येत जले निमज्जेदेत्यभिप्रायः तथा र
सात्मकोऽमृतरसरूपः सोमश्चन्द्रो भूत्वाऽहं सर्वाः ओषधीर्निखिलो

डी

खि

द्विजन्मनीः पुष्णामि विविधविचित्रस्वादुरसपूर्णाः करोमि पृथिव्यां विविधविचित्रहर्म्याट्टालमन्दिरप्रासादयोः पुरवापीकूपतडागवाटिकादीनि नानाक्रीडास्थानानि निर्मायनानाभोगान्भुञ्जानस्य जीवस्यैतद्भोगसाधनरूपोहमेवेत्याशयः १२

मधुसूदनी टीका १

किंच गां पृथिवीं पृथिवीदेवतारूपेण आविश्य ओजसा निजेन बलेन पृथिवीं धूलिमुष्टिवत्संहतीकृत्य भूतानि पृथिव्याधेयानि वस्तून्यहमेव धारयामि अन्यथा पृथिवी सिकतामुष्टिवद्विशीर्येत अधो निमज्जेद्वा येन द्यौरुग्रा पृथिवी दृढा येन स्वः स्तभितं येन नाकः इति मन्त्रवर्णात् सदाधार पृथिवीमिति च हिरण्यगर्भभावापन्नं भगवन्तमेवाह किंच रसात्मकः सर्वरसस्वभावः सोमो भूत्वा ओषधीः सर्वा व्रीहियवाद्याः पृथिव्यां जाता अहमेव पुष्णामि पुष्टिमतीः रसस्वादुमतीश्च करोमि १२

सदानंदी टीका ११

अहं गामाविश्य तेजसाऽखिलं धारयामि धूलिमुष्टिसमां पृथ्वीं दृढीकृत्याहमीश्वरः १ पृथ्व्याधेयानि वस्तूनि धारयामि समन्ततः अन्यथा सिकतामुष्टिवद्विशीर्येत भूरियं २ अतो महत्त्वमाविश्य पृथिव्यां येन भूरियं गुर्वी योनपतत्येव न विशीर्येत खण्डशः ३ अतो महीं प्रविश्यैव भगवान्देवतात्मना बिभर्ति त्वमाब्रह्म सदाधारेति च श्रुतिः यवाद्या ओषधीः सर्वा महीजाता नानाविधाः अहं हरिः रसस्वभाववान्सोमो भूत्वा पीयूषमण्डलः ५ रसस्वादुमतीस्ताश्च करोम्यखिलपालकः ६

नीलकंठी टीका १२

न केवलमादित्यादिरूपेण प्रकाशनसामर्थ्यं मामकं अपि तु पृथिव्यादिगतं भूतधारणाप्यायनसामर्थ्यं मामकमित्याह गामिति गां पृथिवीमाविश्य तां पृथिवीं दृढां कृत्वा भूतानि अहमेव धारयामि ओजसा बलेन अन्यथा पृथिवी सिकतामुष्टिवद्विशीर्येत तथा च मन्त्रवर्णः येन द्यौरुग्रा पृथिवी च दृढेति स दाधार पृथिवीमिति च तथाहमेव सोमो रसात्मको जलात्मकः रसो जलं रसो हर्षे रसने काव्यमञ्जरी जलमयो भूत्वा सर्वा ओषधीः पुष्णामि च रसवतीः पुष्टाश्च करोमि सोमो हि स्वात्मरसानुप्रवेशेन सर्वा ओषधीः पुष्णातीति प्रसिद्धं १२

^एतदेव प्रकाशयति ॥

आनंदटीका १२

66

गां भूमिं च शब्दाद्दिवं च सूर्यो भूत्वाहमाविश्य ओजसा भूतानि दिव्यानि
भौमानि च हरिद्वारेण धारयामि विरक्तं नैव नश्यतीये धायेयन्त प्रसत्ता
वेदेवानुभावयतानेनेत्यस्यैवं प्रवर्त्तितं चक्रमित्युक्तम् तथैवाहं रसा
त्मकः सोमो भूत्वा सर्वा ओषधीः प्राणिप्राणधारिकाः पुष्णामि तथै
व प्राणिनां देहमास्थितो वैश्वानरो जठराग्निर्भूत्वा प्राणापानसखो
जठराग्निर्भूत्वा चतुर्विधमन्नमदनीयं भोज्यं भक्ष्यं चोष्यं लेह्यं च पचामि प
रिपाकं परिणामं नयति ॥ १३ ।

रामकवीटीका १४

गां पृथिवीमाविश्य स्वशक्त्या व्याप्य भूतानि चराचराणि तेनाहमोज
सा स्वबलेन धारयामि बिभर्मि पृथिवीगताधारणशक्तिर्ममैव स्वाभा
विकं बलमित्यर्थः तथा रसात्मकोमृतमयः सोमो भूत्वा चंद्रात्मत
यात्मानमेवावभास्य सर्वा ओषधीः समस्ताः प्राणिप्राणनहेतुभू
ता व्रीह्यवाद्या अहमेव पुष्णामि पुष्टिमापादयामि आप्यायनरू
पाममैव शक्तिरित्यर्थः तथैव वैश्वानरो जातवेदा भूत्वा तदात्म
कः सन्नहं प्राणभृतां शरीरमाविष्टः प्राणापानाभ्यां बहिःस्थू
न्नभावेन व्यवस्थिताभ्यां स्वशक्तिभेदाभ्यां समायुक्तः सहितः
भक्ष्यादिभेदाच्चतुर्विधमन्नमभ्यवहार्यं द्रव्यं पचामि परिणामं प्रा
पयामि जाठरस्याग्नेः सकलशरीरविभक्तात्मनया वर्त्तमानस्य
समस्तान्नरसप्रापिका सर्वप्राणिजीवनहेतुर्याशक्तिः सा ममै
वैकस्य शक्तिः ततः संवेयुनीतिसममाध्याय पुरुषान्यायेन स
निपादितात्मैवाभवामि : किं च बहुना १३ ॥

लालिकी [illegible]टीका १५

किंच— गां पृथ्वीं भूतलिमस्थिवं वहि शरण स्वभावामाविश्य स्वशक्त्या व्या
प्य भूतानि चराचराणि ओजसा बलेनाहमीश्वरो धारयामि
बिभर्मि । पृथ्व्याधारणशक्तिर्ममैव बलमित्यर्थः ॥

अन्यथा पृथ्वी सिकतामुष्टिवद्विशीर्येताधो निमज्जेत् अहमेवेश्व
रोऽमृतरसमयः सोमो भूत्वा व्रीह्याद्यौषधीः संवर्धयामि चंद्र
मसाप्यायनरूपा शक्तिर्ममैवेत्यर्थः [illegible] १३ ।

पंचोले टीका

किंच गामाविश्य चेति वचनः अहं गां पृथ्वीमाविश्य ओजसा ओजो
बलं कामरागविवर्जितमैश्वर्यं यज्जगद्धारणाय पृथिव्यामाविष्टं
येन गुर्वी पृथ्वी नाधः पतति न विशीर्यते तेन ओजसा बलेन ऐश्वर्य
लक्षणेन च भूतानि चराचराणि धारयामि किंच रसात्मकः रसस्व
भावः सर्वरसानामाकरः सोमं सन् पृथिव्यां जाताः सर्वाश्चौषधीः
व्रीहि यवाद्याः पुष्णामि पुष्टिमतीः रसस्वादुमतीश्च करोमि स्वात्मर
सानुप्रवेशेन १३

रामानुजसिद्धान्तदीपिनी

किंच गामिति अहं परमेश्वर एव गां पृथिवीमाविश्य भू
तानि चराचरात्मकान्योजसा बीजबलेन धारयामि तथा
हमेव रसात्मकः सर्वरसस्वभावः सोमो भूत्वा सर्वा ओष
धीर्व्रीह्याद्याः पृथिव्युद्भूताः पुष्णामि रसपुष्टाः करोमीत्यर्थः

१३॥

मधुभाष्य

१३॥

और पृथिवी को अपने बलके द्वारा स्थित करके मै चराचरा
त्मक सकल भूतों को धारण करता हौ और अमृतात्मक च
न्द्रस्वरूप होके हत आदि सम्पूर्ण शस्य को भी वढावता हूं
१८

दोहा

पृथिवी स्थितहोय भूतकों धारत हौं बलसोंहि पुष्टकर
त हौं ओषधी सोमहोय रससोंहि १३॥

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः प्रा
णापानसमायुक्तः पचाम्यन्नं चतुर्विधं १४

शांकरभाष्य टीका १

किञ्च अहमिति अहमेव वैश्वानर उदरस्थोऽग्निर्भूत्वा अयमग्नि
र्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते इत्यादिश्रुतेर्वैश्वा
नरः सन् प्राणिनां प्राणवतां देहमाश्रितः प्रविष्टः प्राणापान
समायुक्तः प्राणापानाभ्यां समायुक्तः संयुक्तः पचामि पक्तिं क
रोमि अन्नं चतुर्विधं चतुःप्रकारमन्नमशनं भोज्यञ्च भक्ष्यञ्चो
ष्यं लेह्यञ्च भोक्ता वैश्वानरोऽग्निर्भोज्यमन्नं सोमस्तदेतदुभयमग्नी
षोमौ सर्वमिति पश्यतोऽन्नदोषलेपो न भवति १४

आनंदगिरिकृत टीका २

भगवतः सर्वात्मत्वे हेत्वन्तरमाह किञ्चेति अहमेवेत्यहंशब्देन
परो लक्ष्यते भूत्वा पचामीति सम्बन्धः परस्यैव जाठरात्मना स्थितौ
श्रुतिं प्रमाणयति अयमिति वाह्यं भौमाग्निं व्यावर्तयति योऽयमि
ति देहान्तरारम्भकत्वनीयं भूतेष्ववच्छिनत्ति येनेति जाठरात्मना
परः स्थितश्चेत्तस्य देहाश्रितत्वं सिद्धमिति न इत्याशङ्क्याह स यथा
वाक्य पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेदेति श्रुतिमाश्रित्याह प्रवि
ष्ट इति परस्य जाठरात्मनोऽन्नपाके सहकारिकारणमाह प्राणेति स ५८
युक्तत्वं संयुक्तत्वं अन्नस्य चातुर्विध्यं प्रकटयति भोज्यमिति भो
क्तारि वैश्वानरमिति दृष्टिर्भोज्ये सोमदृष्टिरेवं भोक्तृभोज्यरूपं स
र्वं जगदग्नीषोमात्मना भुक्तिकाले ध्यायतो भोक्तुरन्नकृतो दोषो
नेति प्रासंगिके सफले ध्याने दर्शयति भोक्तेति १४

स्वामिकृत टीका ३

किञ्चाहमिति वैश्वानरो जाठराग्निर्भूत्वा प्राणिनां देहस्यान्तः प्रवि
श्य प्राणापानाभ्यां तद्दीपकाभ्यां सहितः प्राणिनां भुक्तं भक्ष्यं भो
ज्यं लेह्यं चोष्यं चेति चतुर्विधमन्नं पचामि तत्र यद्दन्तैरवखण्ड्य भक्ष्य
ते पूपादि तद्भक्ष्यं यत्तु केवलं जिह्वया विलोड्य निगीर्यते पायसा
दि तद्भोज्यं यत्तु जिह्वायां निक्षिप्य रसास्वादेन निगीर्यते यद्द्रवीभू

श्री॰
गी॰ टी॰
पं॰

तेशुक्लादिनञ्चस्वयन्तदेष्टाभिर्निर्णीअसारांशेनिगीर्यावशिष्टंत्यज्यते
यदित्वंदेशादित्तबोध्यमितिभेदः १४

पिशाचभाष्य टीका ४

किंच वैश्वानरोभूत्वाऔदर्योग्निर्भूत्वाप्राणापानाभ्यामपानस्यप्राणापानौ
ताभ्यांसमायुक्तः संधुक्षितः चतुर्विधमशितंखादितंपीतंलीढं
१४

रामानुजभाष्य टीका ५

अहमिति अहंवैश्वानरोजाठरानलोभूत्वासर्वेषांप्राणिनांदेहमा
श्रितः तैर्भुक्तमाहारमाप्यलेह्यपेयात्मकंचतुर्विधंअन्नप्राणापान
व्यक्तिभेदसमायुक्तः पचामि अत्रपरमपुरुषविभूतिभूतोसो
मवैश्वानरोअहंसोमोभूत्वावैश्वानरोभूत्वेतितत्सामानाधिकर
णेननिर्दिष्टौ [illegible]

अभिनवगुप्तकृत टीका ६

अर्कादितेजस्त्वयरूपतयादशमाध्यायस्थविनष्टशिष्यतिसंहा
रप्रकटीकरणेश्रीगुरुवः प्राहुः भूतपंचकस्यसमस्तस्यलतया
यल्लोकधारकत्वंतद्भगवतएवमाहेस्म्यर्यमित्यनेनदनेन न
त्याहि रवितेजसः प्रकाशकत्वेधारकत्वंचतेजोधरात्वयतादा
त्म्यात्तदेतदुक्तंयदादित्यगतमितिगामाविश्यचभूतानीतिवा
र्थद्वयेनचांद्रंतेजः प्रकाशकंपोषकंचज्वलनतेजोयोगात् तदुक्तं
यंद्धहमसीत्येनेनभागेनपुष्णामीतिचार्धश्लोकेन वाह्नंतेजः
प्रकाशनपोषणदहनस्वेदनपचनात्मकंपृथिव्यांतेजोवायु
योगात्तदेतदिहोक्तंयथास्थानाविभ्यनेनअहंवैश्वानरइतिश्लोके
नच नवस्तुबोधावकाशरूपतयासर्वगतमेवं [illegible]

परमार्थप्रपा टीका ७

अथोश्रोदनंसामर्थ्यमाह अहमिति प्राणिनांसर्वदेहिनांदेहमा

श्रितो जाठरो वैश्वानरोऽग्निर्भूत्वा प्राणापानाभ्यां मरुद्भ्यां वायुभ्यामिव
समायुक्तो दीपीकृतः सन् चतुर्विधमन्नं भक्ष्यपेयचोष्यमह्यादि
कं पचामि पाकं नयामि श्रुतिरपि सामवेदे हाउ ३ अहमन्नं ३ अ
हमन्नादः ३ अहं विधारयः ३ इत्यादि भाष्यं तत्र हाउ स्तोभाक्षरं न
उक्तं ओहो ईति च संबुद्धौ विकल्पे हाउ कीर्तितमिति अत्र मनुष्य
देवात्मविभागेनान्नत्रयमन्नादत्रयमस्तीति त्रिराहसाविकल्पा
थीं निरूपितः विधारयो धर्ता अथैतदर्थं तापिकाशाने पर्यायश्रु
तिरपि अथ यत्किं चेदमार्द्रं तद्रेतसोऽसृजत तदु सोम एतावद्वा इदं
सर्वमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नाद इति भाष्यं स्पष्टीकम
कथयन्ननेन रेयः किं चेदं सर्वमार्द्रं रूपशोणितोद्भवप्राणिजातं
तद्रेतसः शुक्रादसृजत सृष्टवान् अथ रेतसः स्वरूपमाह तद्धेति
तदु तदेतावत्सर्वं रेतः सोम एवैतेन एवं रेतसः कारणमन्नमन्नाद
श्च भवति तथाच सोम एवान्नमग्निरन्नादश्चेत्यनेनैतिरीयकेऽपि यः
कामयेतान्नवानन्नादः स्यामिति स अग्निनैवान्नमवरुन्धे सोमेनान्नाद्य मन्न
वानेवान्नादो भवतीति भाष्यं यः पुरुषः अहमन्नवानन्नादश्च स्या
मिति कामयेत स अग्निनाध्यक्षपासनया अन्नं अवरुन्धे यश्चाकाम
तिसमानपतिः सोमेन च अन्नाद्यं प्राप्नोति स्वमन्नवानेवान्नादो भ
वतीत्यर्थः तथाऽऽरण्यवसामापि अथैतत्साम गायन्नास्ते ह्येन
त्सर्वं श्रुतिरहस्यं भगवतैव प्रकटीकृतं ॥ १४ ॥

वनमाली टीका ॥

जठराग्नौ वैश्वानररूपेण स्थित्वा प्राणिनां देहमाश्रितः अग्निरू
पकाभ्यां प्राणापानाभ्यां तन्नामकरूपाभ्यां प्रसिद्धाभ्यां वा सहितः
प्राणिभिर्भुक्तं भक्ष्यं भोज्यं लेह्यं चोष्यं चेति चतुर्विधं भुज्यमानं च
तुर्विधं पक्त्वा च देहादुपचयकारणं करोतीत्यर्थः यद्दन्तैरवखण्ड्य भक्ष्य
ते अपूपादि तद्भक्ष्यं यत्केवलं जिह्वया विलोड्य निगीर्यते तत्पायसा
दि तद्भोज्यं यज्जिह्वया विनिर्दिश्य रसास्वादनेन निगीर्यते तत्पाकं
गादि लेह्यं यद्दन्ताभिनिष्पीड्य सारांशं निगीर्यावशिष्टं त्यज्य
ते यथेक्षुदण्डादि तच्चोष्यमिति भेदः ॥ १४ ॥

श्री· गी· टी· पं·

हनुमद्वैजयन्त्री टीका ९

भुक्तानामन्नादीनां पाकहेतुरयमहमेवेत्याह अहं वैश्वानर इति अहं सर्वान्तरात्मा सर्वेश्वरो वैश्वानरो जठरानलस्तच्छरीरको भूत्वा प्राणिनां सर्वेषां ब्रह्मादिपिपीलिकान्तानां प्राणवतां देहमुदरमाश्रितः सन् प्राणापानसमायुक्तस्तदुद्दीपकाभ्यां प्राणापानरूपाभ्यां वायुभ्यां समायुक्तः सन् तैः प्राणिभिर्भुक्तं चतुर्विधं भक्ष्यभोज्यलेह्यचोष्यात्मकं तत्र लड्डुकलड्डुकापूपादि भक्ष्यं च भक्ष्यं पायसौदनसूपादि भोज्यं गुडमध्वादि लेह्यं पक्वाम्रादि चोष्यं एवं चतुःप्रकारकमन्नं पचामि परिपाकं नयामि श्रुतिरप्येवमेवाह अहमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते इत्यादि नासौ मद्वैश्वानरयोः सर्वव्यापकत्वात्स्वामीपत्वाद्वस्वामे देवोक्तिः सम्भवत्येवेत्याशयः १४

मधुसूदनी टीका ९

किंच अहमीश्वर एव वैश्वानरो जाठरोऽग्निर्भूत्वा अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते इत्यादिश्रुतिप्रतिपादितः सन् प्राणिनां सर्वेषां देहमाश्रितः अन्तः प्रविष्टः प्राणापानाभ्यां तदुद्दीपकाभ्यां समायुक्तः संधुक्षितः सन् पचामि पक्तिं नयामि प्राणिभिर्भुक्तमन्नं चतुर्विधं भक्ष्यं भोज्यं लेह्यं चोष्यं चेति तत्र यद्दन्तैरवखण्ड्य भक्ष्यते पूपादि तद्भक्ष्यमिति उच्यते यत्तु केवलं जिह्वया विलोड्य निगीर्यते सूपौदनादि तद्भोज्यं यत्तु जिह्वायां निक्षिप्य रसास्वादेन निगीर्यते किंचिद्द्रवीभूतं गुडरसालाशिखरिण्यादि तल्लेह्यं यत्तु दन्तैर्निष्पीड्य रसांशं निगीर्य अवशिष्टं त्यज्यते यथेक्षुदण्डादि तच्चोष्यमिति भेदः भोक्ता यः सोऽग्निर्वैश्वानरो यदन्नं भोज्यं स सोमः तदेतदुभयमग्नीषोमौ सर्वमिति ध्यायतो अन्नदोषलेपो न भवतीत्यपि द्रष्टव्यं १४

सदानंदीटीका ११

जाठरोऽग्निरहं भूत्वा सर्वेषां प्राणधारिणां देहमन्तः प्रविश्य तदुद्दीपकभावतः १ प्राणापानाख्यवायुभ्यां संयुक्तः सन् चतुर्विधं भुक्तं प्राणिभिरन्नं नानाकं सम्यक् पचाम्यहं २ यद्दन्तैरवखंड्यान्नं भक्ष्यते

पत्र्न

भक्ष्यं वतन् केवलं जिह्वयान्नं विलोड्यान्नं निगीर्यते स्तपोदनादिनङ्को
ज्यं यत्तु निर्लिप्य जिह्वया निगीर्यते द्रवीभूतं रसास्वादेन खाड्व
थ तल्लेह्यं शिखरिण्यादि रसालादि न थ्वेवव यत्तु दंतैः खनिष्ठी
स्तरसांशं विनिगीर्यते च ४ यन्तेनेषु वशिष्टेन चोष्यं चेति चतुर्वि
धं भोक्ता वैश्वानरो वह्निर्भोज्यमन्नं च चंद्रमाः ९ अग्निषोमात्म
ङ्मयं सर्वमित्येवं शाहतन्ःप्रायतोन्नगतैर्दोषैर्लेपो भवती न्न
त्यपि १ श्रीमद्भगवतो वाक्याद्दृष्टव्यमिति मंगलं १४

नीलकंठी टीका १२

अहं वैश्वानरः सन्नुदरस्थोऽग्निर्भूत्वा प्राणिनां सर्वेषां देहमाश्रितः
सन् प्राणापानाभ्यां वायुभ्यां समायुक्तः सम्यग्दीपितस्सन् चतुर्विध
मन्नमदनीयं भक्ष्यं दंतव्यापारापेक्षमपूपादि भोज्यं तदनपेक्षं
पायसादि लेह्यं गुडशर्करादि चोष्यं निष्पीड्यमानमिक्षुद
ण्डादि पतेन सर्वत्र सर्वा शक्तिर्याहृश्यते सा मदीयैवेति भावः त
देवं भोक्ता वैश्वानरोऽग्निर्भोज्यमन्नं सोमस्तदेवमुभयमग्नीषो
मौ सर्वमिति पश्यतोन्नदोषलेपो न भवतीत्यपि द्रष्टव्यं १४

आनंदीटीका १९

स्पष्टार्थं १४ ॥

रामकंठीटीका १४

गां पृथिवीमाविश्य स्वशक्त्या भूतानि चराचराणि नेह
हं सोज्जस्तास्वबलेन धारयामि बिभर्मि पृथिवी गतिधारण
शक्तिर्ममैव स्वात्माविर्भावरूपिणी न तु पृथक् नयाः त्वामकोमृ
तमयः सोमो भूत्वा वंद्रात्मतया नाम्नानमेवावभास्य सर्वा ओष
धीः त्वन्नत्पाणिमाणेन हेतुभूता द्रव्यजातीरहमेव पुष्णा
मि पचिताः संपाद्यास्वाद्यायन रूपाममेव शक्तिरिति अर्थः
तथैव वैश्वानरो जातवेदो भूत्वानलात्मकः सन्नहं प्राणभृतां
शरीरमाविष्टः प्राणापानाभ्यां वह्निः सूर्येणानुभावेन व्यवस्थिता
भ्यां स्वशक्तिभेदाभ्यां समायुक्तः सहितः भक्ष्यादिभेदाच्चतुर्वि

यमत्रमभ्यवहार्यद्रव्यंपचामिपरिणामंप्रापयामि जाठरस्याग्नेः
सकलशरीरविभक्तात्मतयावर्तमानस्यसमस्तात्ररसपाचि
कासर्वप्राणिजीवनहेतुर्याशक्तिःसामामैवैकस्यशक्तिमतःसं
र्वथिनीतिसमस्तमाध्यायपुक्तन्यायेनप्रतिपादितात्रैवोपपत्तिः
किंच बहुना १४ ॥

लातिकी [illegible]टीका १५

किंच अहमीश्वरएववैश्वानरोजाठरोऽग्निर्भूत्वा प्राणिनांदेहमाश्रितों
तःप्रविष्टःप्राणापानाभ्यांतदुद्दीपकाभ्यांसहितःसंयुक्तः
प्राणिभिर्भुक्तंभक्ष्यंभोज्यंलेह्यंचोष्यंचेतिचतुर्विधमन्नंपचामि
परिणामंप्राप्नुयामि तत्रयद्दन्तैरवखंड्य भक्ष्यतेऽपूपादितद्भ
क्ष्यंचर्वमितिचोच्यते यत्तुकेवलंजिह्वयाविलोड्यनिगीर्यते
पायसादितद्भोज्यम् यत्तुजिह्वयांनिक्षिप्यरसास्वादेननिगी
र्यतेद्रवीभूतंगुडादितल्लेह्यंयत्तुदंष्ट्राभिर्निष्पीड्यसारांशंनि
गीर्यावशिष्टंत्यज्यते यथेक्षुदण्डादितच्चोष्यमितिभेदः [illegible]
[illegible]
[illegible] १४ ॥

पंचोलेटीका

किंचअहमिति अहमेववैश्वानरोउदरस्थोऽग्निर्भूत्वाप्राणिनांप्रा
णवतांदेहमाश्रितःसन्प्राणापानाभ्यांयुक्तःचतुर्विधमन्नंभो
ज्यंलेह्यंचोष्यंभक्ष्यंचेतिचतुर्विधंपचामितस्यपाकंकरोमि । १४

रणवीरसमिद्धोधिनी ॥

किंचाहमिति अहमेववैश्वानरोजाठराग्निर्भूत्वा सर्वेषांप्राणि
नांदेहमाश्रितोंतःप्रविष्टःप्राणापानाभ्यां तदुद्दीपकाभ्यांस
मायुक्तःसन्चतुर्विधमन्नं भक्ष्यभोज्यलेह्यंचोष्यंचपचामिपरिण
नयामीति तत्रभक्ष्यमोदकादि भोज्यमोदनादिलेह्यंमध्वाज्यादि
चोष्यमिक्ष्वादिइतिचतुर्विधमन्नमहमेवजीर्णीकरोमीत्यर्थः १४ ॥

और मैं ही वैश्वानर नाम जठराग्नि स्वरूप होके प्राणियों की
शरीर के मध्य मे प्रवेश कर के प्राण अपान वायु के साथ हो
य जीवों का भक्ष जो भक्ष्य भोज्य लेह्य चोष्य चतुर्विध अन्न ति
स को परिपाक करता हूं भक्ष्य वह है जो दांतों से पीस कर
खाया जाय दाल भात चर्बन वगैरः और भोज्य जो जिह्वा के
सहारे से निगला जाय खीर हलुआ आदि और लेह्य वह है
द्रव रूप आस्वादन पूर्वक पान किया जाय सहत दूध आद
औ चोष्य कहे जो चूस कर थूंक लिया जाये ऊख वगैरः को जा
नो १४

दोहा

मैंहिं अग्निहोय जीवकी देहमांहि स्थित होय अन्नप-
चों मैं चारविध प्राण अपानयुत सोय १४

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानम
पोहनं च वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वे
दविदेव चाहं १५

शांकरभाष्य टीका १

किंच सर्वेति सर्वस्य प्राणिजातस्याहमात्मा सन् हृदि बुद्धौ सन्निवि
ष्टो तो मत्तः सर्वप्राणिनां स्मृतिर्ज्ञानं तदपोहनं च येषां पुण्यकर्मि
णां च पुण्यकर्मानुरोधेन ज्ञानस्मृती भवतस्तथा पापकर्मिणां
पापकर्मानुरूपेण स्मृतिज्ञानयोरपोहनं च अपायनमपगमनं
च वेदैश्च सर्वैरहमेव परमात्मा वेद्यो वेदितव्यः वेदान्तकृत्
[illegible] वेदान्तार्थसम्प्रदायकृदित्यर्थः वेदविदेवार्थविदेव चाहं
१५

आत्मनः च

आनंदगिरिकृत टीका २

इतश्च सर्वात्मत्वेन सर्वव्यवहारास्पदत्वमीश्वरस्येत्याह किंचेति
प्राणिजातं ब्रह्मादिपुत्तिकान्तमात्मतया बुद्धौ सन्निविष्टत्वे तद्गुण
दोषाणामशेषेण द्रष्टत्वमतो बुद्धिमध्यस्थगुणदोषद्रष्टृत्वादिति
यावत् मत्तः सर्वकर्माध्यक्षाज्जगद्दयन्तृत्वाधारादित्यर्थः प्राणिनां
स्मृतिज्ञानयोस्तदपायस्य च भगवदधीनत्वे भगवतो वैषम्यं स्या
दित्याशंक्याह येषामिति स्मृतिर्जन्मान्तरादावनुभूतस्य परामर्शः
देशकालस्वभावविप्रकृष्टस्यापि ज्ञानमनुभवः धर्माधर्माभ्यां वि
चित्रं कार्यं कुर्वतो नेश्वरस्य वैषम्यमिति भावः वेदवेद्यं परं ब्रह्म भ
गवतो भवतीति शङ्कां वारयति वेदैरिति वेदात्मनो पौरुषेयत्वं परि
हरति वेदेति वेदान्तेति तदर्थसम्प्रदायप्रवर्तकत्वात् तदर्थयाथा
त्म्यज्ञानवत्त्वमाह वेदार्थेति १५

स्वामिकृत टीका ३

किंच सर्वस्येति सर्वप्राणिजातस्य हृदि सम्यगन्तर्यामिरूपेण प्र
विष्टोऽहं अत एव मत्त एव हेतोः प्राणिमात्रस्य पूर्वानुभूतार्थविषय
स्मृतिर्भवति ज्ञानं च विषयेन्द्रियसंयोगजं भवति अपोहनं च न
योः प्रमोषो भवति वेदैश्च सर्वैस्तत्तद्देवतादिरूपेणाहमेव वेद्यः वेदा
न्तकृत् तत्संप्रदायप्रवर्तकश्च ज्ञानदो गुरुरहमित्यर्थः वेदार्थ

श्री·
गी·टी·
पं·

75

५

विदहमेव १५

पिशाचभाष्य टीका ४

किंविशिष्टाभिधीयते सर्वस्य प्राणिजातस्य हृदि हृत्पुंडरीके सन्नि
विष्टः अपोहनं हेयबुद्धिः तस्योपलक्षणार्थत्वेनोपादेयबुद्धिश्च
वेदांतकृद्विश्वकृत्तथा च श्रुतिः यो ब्रह्माणं विदधाति पूर्वं यो वै वेदां
श्च प्रहिणोति तस्मै इति प्राहिणोति ददाति उपदिशतीत्यर्थः वे
दवेत्तीति वेदविन्न वेदार्थविदित्यर्थस्तस्मादहं सर्वलोकप्रसिद्धः

+तयोश्च सर्वस्य भूतजातस्य च
परमपुरुषसामानाधिकरण्ये
निर्देशे हेतुमाह ॥

रामानुजभाष्य टीका ५

+सर्वस्येति तयोः सोमवैश्वानरयोः सर्वस्य भूतजातस्य च सकलप्र
वृत्तिमूलज्ञानोपदेशे हृदि सर्वमनःसंकल्पेन नियच्छन् अहमात्म
तया सन्निविष्टः तथाह श्रुतिः अन्तः प्रविष्टः शास्ता जनानां सर्वा
त्मा यः पृथिव्यां तिष्ठन् आत्मनि तिष्ठन्नित्यादयः अतो मत्तः सर्वेषां
स्मृतिर्जायते स्मृतिः पूर्वानुभूतविषयानुभवसंस्कारमात्रजं ज्ञानं
ज्ञानं इंद्रियलिंगागमयोगजो वस्तुनिश्चयः सोपि मत्तः अपोहनं
ज्ञाननिवृत्तिः अपोहनमूहनं वा ऊहनमूहः ऊहो नाम अस्मिन् प्रमा
णमित्थं प्रवर्तितुमर्हतीति प्रमाणप्रवृत्त्यर्हताविषयसामर्थ्यादि
निरूपणजन्यं प्रमाणानुग्राहकं ज्ञानं तच्च मत्त एव वेदैश्च सर्वैरह
मेव वेद्यः अतोऽग्निवाय्वसर्वेषामिंद्रादीनामंतर्यामिकत्वेन मदा
त्मकत्वात्तत्प्रतिपादनपरैरपि सर्वैर्वेदैरहमेव वेद्यः देवमनुष्या
दिशब्देनैव मामेव वेदांतकृत् वेदानामिंद्रं यजेत वरुणं यजेतेत्ये
वमादीनामुक्तफलं फलेहि ते सर्वे वेदाः पर्यवस्यंति अन्तकृत् फ
लकृत् वेदोदितफलस्य प्रदाता चाहमेवेत्यर्थः तदुक्तं पूर्वमेव
यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छतीत्यारभ्य लभते च ततः
कामान्मयैव विहितान्हितानिति अहं हि सर्वयज्ञानां भोक्ता च प्रभुरे
व चेति वेदविदेव चाहं वेदविज्ञाहमेव एवमभि[illegible]हितेन वेदेश्च
हमेव वेदं इतोऽन्यथा यो वेदार्थं व्रतेन स वेदविद्विहित्यभिप्रायः १५

अभिनवरामकृत टीका ६

+सर्वस्य वेद्यस्य परं तत्त्वमस्मादहं रणस्वतंत्रबोधस्वभावं तत्राहमि

+अत एव बोधरूपता उक्तात्बोधस्वरूपपरपतितस्वांतं अबोधस्वभावमात्मानं परस्वभावं
परमेश्वरस्वरूपं सर्वज्ञानस्वतंत्रं सर्वकर्तारं दर्शयितुमाह ॥

त्रियोविमर्शस्ततएवापूर्वाभासनामयंज्ञानंविश्वमहाहृद्रूपम
येच्चटपवेतिसर्वात्मकभावखंडनासारंविकल्पनज्ञानात्मक
मपोहनंपाशवस्थितिरूपमायामयप्रमातृविनंस्मरणंवस
स्कारशेषतानीतस्यसंहृतस्यपुनरवभासनात्मकमितीयता
समस्तज्ञानानिसंहृतानीतिसर्वंततापूर्वकंस्वात्मरूपंकर्तृ
त्वमुक्तं सर्वैरितिसंभूयकिलसर्वशास्त्राणांपरमेशतत्त्वमेव
निरूप्य वेदवेदांतकर्तृत्वेनकर्मफलतत्संबंधादिद्वारतया
शेषविश्वनिर्माणेनउन्मीलनेनपुनःस्वरूपप्रतिष्ठापनेभगव
तएवस्वातंत्र्यमितिविश्वकर्तृत्वमुक्तं अमेवपोहनमन्येनाहं
नेनेदंभवतीतिव्यतिरेकबुद्धिःवेदांतंकरोतीमात्मसाक्षात्त्वेन
एवंवेदम् १५ परमार्थप्रपा टीका ०
अथनकेवलमन्तर्यामित्वादिविभूतिरूपेणदेहमात्रेतिष्ठामिकिंतु
साक्षादपीत्याह सर्वस्येति अहंसर्वस्यप्राणिजातस्यहृदयाकाशे
सन्निविष्टःअंतर्यामित्वेनप्रविष्टः कुतोज्ञातमित्याह मत्तइति य
तोमत्तस्काशात्स्मृतिरनुभूतार्थविषयास्मृतिर्भवतिततोज्ञानंवि
षयेंद्रियसंयोगजंवर्तमानमपोहनंच तयोःप्रमोषःअथोप
समीपेऊहस्समेतत्सर्वंयत्सर्वंहृदयमासीत देवेदंभविष्यतीत्या
कारेणतदपोहनं तदुक्तंस्मृतिरतीतविषयामतिरागामिगो
वराह··· कालिकी···· अथैतदनुभवरूपज्ञानाभावेऽप्य
नुपायमाह वेदैरिति सर्ववेदैःसंहिताब्राह्मणारण्यकरूपैरह
मेवानव्याहृत्यावेत्त्योगपोवेद्योस्मि परंतनसाक्षात्कर्ते एवकारे
णतुइदेवतान्तरव्यासःअथतदेवाह वेदांतकृदिति यद्वा अहमे
ववेदविदतवेदोमांवेत्तियेनेदंसर्वंविजानातितंकेनविजानीया
दितिश्रुतेः वेदांतानुपनिषदःकरोतीतिवेदांतकृत उपसमीपे
अर्वागेव निषीदंतियस्यांवस्यांतीत्युपनिषदस्तादेवकथयंति
नेतिनेतिनत्वाज्ञात्परमस्तीत्यादिवाक्येनयाववेदांतेष्वहमेव
निमित्तभूतइत्यर्थः अथैतदहंवाक्यांतपरमरहस्योपदेश
परमगहहमेवास्मीत्याह वेदविदिति संग्रहश्लोकस्य यात्मावा

श्री॰
गी॰टी॰
पं॰

ऽंभस्त्वाश्वत्थानि वड्शः छंदांसि शाखाः पिवासंगत्यागन्नतितानि शिष्य
निवहेषु ध्यापयन्नादरात पत्ताहश्यपि धारणास्यणेत्तनरे विनेष्य
वायुकयो वा देत्नस्य विथौ वतत्हि सकलं सामर्थ्यम दत्मनाश्यति १४

वनमाली टीका ८

सर्वोत्तमाधिकारिभिर्ज्ञेयं निरतिशयमाहात्म्यमाह सर्वस्येति स
र्वस्य चतुर्विधप्राणिसमूहस्य हृदि नियामकत्वेन स्थितः सर्वान्तर्या
मीत्यर्थः तत्र मत्त एव हेतोः स्मृतिः एतज्जन्मनि पूर्वानुभूतार्थ
विषयका हृत्ति र्योगिनां च जन्मान्तरानुभूतार्थविषयकापि तथा
ज्ञानं विषयेन्द्रियसंयोगजं भवति योगिनां च देशकालविप्रकृष्ट
विषयकमपि एवं कामक्रोधशोकादिव्याकुलत्वेन सामपोहनं
स्मृतिज्ञानयोरपायश्च मत्त एव भवति कार्यमात्रजनकत्वात्सर्वा
न्तर्यामित्वाच्चाहमेव सर्वोत्तमः त्रस्तकाः सर्ववेदवेद्योप्यहमेवेत्या
ह वेदैश्च सर्वैरिंद्रवरुणादिप्रतिपत्तया प्रतीयमानेरहमेव वेद्यः
सकलप्रवृत्तिनिमित्तानां परमे स्वर्गादीनामपि सत्त्वात् वेदान्तकृ
त् वेदान्तः फलेनत्कृत फलदाता व्यासरूपेण वेदान्तार्थमहर्नि
र्णयकत्वस्वमीमांसाप्रातृकर्ताप्यहमेवेति वा वेदविच्चाहमेव
श्रमपरतयावमतीयमानोपि यो वेदः सम्मुखेहस्मात्सामेव वदती
ति निगूढं वेदार्थमहमेव जानामि मत्प्रसादादन्योपि जानातीत्यर्थः
१५

ऊहमवैजयन्ती टीका ९

सर्वप्राणिनां ज्ञानाज्ञानयोः कारणमप्यहमेवेत्याह सर्वस्येति स
र्वस्य निखिलप्राणिसमूहस्य च कारात्सोमवैश्वानरयोरपि हृदि
सर्वप्रवृत्तिहेतुज्ञानोदयहेशे सन्निविष्टस्तन्निपामकतयाहम
व प्रविष्टस्तच्छ्रुतेः प्रविष्टः शास्ता जनानां सर्वात्मायः पृथिव्यां तिष्ठ
न्पृथिवीमन्तरो यमयति य आत्मनि तिष्ठन्नात्मानमन्तरो यमयती
त्यादाः श्रुतयोप्यात्र श्रतो हेतोः मत्तः सकाशादेव सर्वेषां स्मृतिः
पूर्वानुभूतवस्तुविषया तत्संधिः वस्तुनः ज्ञानं विषयेन्द्रियसंनिक
र्षजन्यं वस्तुनिश्चयात्मकं जायते तथा तयोरपोहनं प्रमोषश्च
मत्त एव भवति तत्वज्ञानं हि जीवानां प्रमोषस्तु त्रशक्तितः इति

स्मृतेः यद्वा ऊहनं इदं प्रमाणमित्थं प्रवर्तितुमर्हतीति प्रमाणग्रहस्य ता-
विषयसामर्थ्यादिनिरूपणं तच्च प्रमाणानुग्राहकं ज्ञानं अपगमोह-
नमपोहनं [illegible] तेषां ज्ञाननिवृत्तिः यद्वा अपोहनं मोहनं ऊहनं मू-
ह एव चेति स्मृतेः एवं स्वस्य सांसारिकभोगसाधनत्वमुक्त्वाधुना मो-
क्षसाधनत्वमाह वेदैश्च सर्वैरहमेव वेद्यः इंद्रवरुणाग्निवायुसू-
र्यसोमादीनां मदंतर्यामिकत्वेन मदात्मकत्वादिंद्रं यजेत वरुणं
यजेत इत्येवमिंद्रादिदेवप्रतिपादनपरैरपि सर्वैर्निखिलैर्वेदैर-
हमेव सर्वेश्वरेश्वरः सर्वांतर्यामी सर्वशक्तिमान् सर्वकारणत्व-
स्सारथिः कूटस्थ एव वेद्यो वेदितव्यो ध्येयोऽनंतमभिन्नत्वेनेंद्रादिदेवरू-
पमवधारणेन स्तूयते योऽसौ सर्वैर्वेदैर्गीयत इति श्रुतेः कर्मज्ञानोपा-
सनभेदेन वेदास्तावत् त्रिकाण्डकास्तत्र कर्मकाण्डेन परंपरया ज्ञा-
नोपासनाभ्यां साक्षाद्वेद्य इत्यर्थः ननु वेदवेद्यत्वमसीति केन प्रका-
रेण जानीयामिति चेत्तत्राह वेदांतकृत् वेदानामंत्यमर्थनिर्णयं करो-
तीति तथा यद्वा वेदानामंतं शिरोभागं करोतीति तथा द्वैपायनरू-
पेण वेदार्थनिर्णयमुपनिषदं चाहमेव करोमीत्यर्थः नन्वन्यैरपि
वेदार्थनिर्णयः कृतस्तथैव कृत[illegible]र इति कथं ज्ञायत इति
चेत्तत्राह वेदविदेव चाहमिति वेदविदहमेव द्वैपायनरूपस्त्वहं
वे यमर्थं नि[illegible]र्णीयः स एव वेदार्थस्ततोऽन्यथा न भ्रान्तिविजृंभितमेवा-
तो वेदार्थावबोधनान्मोक्षदोऽहमेव मोक्षसाधनरूप इत्यभिप्रायः १५

मधुसूदनी टीका १

किंच- सर्वस्य ब्रह्मादिस्थावरान्तस्य प्राणिजातस्याहमात्मा सन् हृदि बुद्धौ
संनिविष्टः स एष इह प्रविष्ट इति श्रुतेः अनेन जीवात्मनानुप्रवि-
श्य नामरूपे व्याकरवाणीति च श्रुतेः मत्त आत्मन एव हेतोः प्राणिजात-
स्य यथानुरूपं स्मृतिः एतज्जन्मनि पूर्वानुभूतार्थविषया हि योगि-
नां च जन्मांतरानुभूतार्थविषयापि तथा मत्त एव ज्ञानं विषयेंद्रि-
यसंयोगजं भवति योगिनां च देशकालविप्रकृष्टविषयमपि ए-
वं कामक्रोधशोकादिव्याकुलचेतसां अपोहनं च स्मृतिज्ञानयोर-
पायश्च मत्त एव भवति एवं स्वस्य जीवरूपतामुक्त्वा ब्रह्मरूपतामाह

वेदैरित्यादि वेदैश्च सर्वैरिंद्रादिदेवताप्रकाशकैरपि अहमेव वेद्यः
सर्वात्मत्वात् इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरु
त्मान् एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुरिति मंत्रव
र्णनात् एष उ ह्येव सर्वे देवा इति श्रुतेः वेदांतकृत् वेदार्थसंप्र
दायप्रवर्तको वेदव्यासादिरूपेण न केवलमेतावदेव वेदवि
च्चाहं कर्मकांडोपासनाकांडज्ञानकांडमंत्रब्राह्मणरूपसर्ववे
दार्थविच्चाहमेव अतः साधूक्तं ब्रह्मणो हि प्रतिष्ठाहमिति
[illegible]
[illegible]
[illegible] १५

सदानंदी टीका ११

ब्रह्मादिस्थावरांतस्य प्राणिजातस्य सर्वतः आत्मैव सन्नविशेषोऽहं बु
द्धौ सर्वावभासकः १ मत्त आत्मन एवात् प्राणिजातस्य च स्मृतिः प
नः जन्मनि पूर्वानुभूतार्थविषया च सा २ जन्मांतरानुभूतार्थविष
या ध्यानियोगिनां विषयेंद्रियसंयोगजन्यं ज्ञानं तथात्मनः दिक्काल
विप्रकृष्टैकविषयं वापि योगिनां मत्त एव तयोः कामक्रोधाद्याकुल
चेतसां ४ पापकर्मानुरोधेन विनाशः स्मृतिबोधयोः उक्त्वैवं जीवभा
वेन प्रविष्टः सर्वमानसे ५ आत्मानं ब्रह्मरूपेण दर्शयत्यधुना हरिः वे
दैः सर्वैरपींद्रादिदेवताभासकैरपि ६ अहमेवाखिलात्मत्वाद्वेद्यः
सर्वेश्वरेश्वरः एष उ ह्येव सर्वे वै देवा इत्यादि वेद वेदव्यासादिरूपे
ण वेदांतार्थप्रवर्तकः संप्रदायात्मना तद्वद्वेत्ताहमेव च ८ कां
डत्रयात्मकवेदस्य रहस्यस्य समंत्रकं अर्थतः सर्ववित्त्वाच्च सम्यग्वेत्ता
हमेव च ९ ब्रह्मणो हि प्रतिष्ठाहमित्यादीनः समीरितं १५

नीलकंठी टीका ११

किंच सर्वस्य प्राणिजातस्याहं हृदि सन्निविष्ट आत्मेत्यर्थः अतो मत्त
आत्मनस्तेषां स्मृतिर्ज्ञानं च पुण्यवतां पापिनां तु तयोरपोहनं विस्म
रणमज्ञानं च भवति तथा च सर्वैर्वेदैः कर्मोपास्तिज्ञानकांडात्मके
रहमेव परमात्मा वेद्यो वेदांतकृत् वेदांतोक्तविद्यासंप्रदायकृत्

वेदविन्वेदार्थविच्चाहमेव एतेनवेदांतविद्वेदविच्चस्वविभू
तिरिमुक्ता भवति १५

आनंदीटीका १६

सर्वस्ययस्यकस्यापिप्राणिनः हृदिचेतनाधिकरणेदेशेहंपरमेश्व
रएवांतर्यामितयाजीवात्मतयासंस्थितः देहद्वयोपिपरमेश्वरप्रति
तएवततत्कार्यकर्त्तामत्तोमदधिष्ठानादेवस्मृतिः पूर्वानुभूतार्थः
स्मरणम् योगिनांजन्मांतरानुभूतार्थस्मरणमपिज्ञानंविषयेंद्रि
यसंयोगादिजंप्रत्यक्षादिज्ञानम् योगिनांदेशकालव्यवहित
मपिअपोहनमस्यव्याहतिर्गीर्वाणस्यादीनामिव सुरासारविवेकः
आत्मानात्मविचारश्चवेदैश्चसर्वैरहमेववेद्यः सर्वेवेदामद्वेदना
र्थाएवेत्यर्थः वेदांतकृत् वेदः ज्ञानकर्मकांडप्रतिपादकस्त
स्याशिरस्त्वस्यांतः ब्रह्मैवेदंसर्वमित्यादिनिष्ठाउपनिषद्भागः
तस्यकर्त्तावेदविदेवचाहमादिविद्वानितिलक्षणलक्ष्यवेद
रूपेणतदर्थज्ञानानुष्ठानकर्मानुष्ठानाच्चप्रकृतिपुरुषेश्वराणा
मन्योन्यवैलक्षण्यंलक्षयतियावदध्यायसमाप्तिम् १५ ॥

रामकंठीटीका १४

सर्वस्यकस्यचित्प्राणभृतोहमेकः परमात्माहृदिसर्ववस्तुसंवे
दनाधिकरणभूतेशरीरैकदेशेसन्निविष्टः सर्वार्थसंवेदित्व
याकृतस्थितिरतोमत्तएवात्मनः अनस्तित्वसर्वदेहज्ञा
नांस्मृतिज्ञानसमोहनलक्षणःशक्तिप्रसरः किमनेनोक्तंभ
वति इहसर्वदेहज्ञानांदेहविषयादिविभागविभक्तभावसंवे
दकस्वभावानांसंवेदनशक्तिस्तत्तदर्थभावाभावपरिच्छेद
कत्वाद्द्विधाप्रवर्तते तथाहि कस्यचित्कदाचिदपोहनरूप
तयाप्रसरति भावकत्वेनचप्रसरोद्विप्रकारोज्ञानात्मकः स्म
रणात्मकश्च यदभूतपूर्वस्यप्रकाशनंतज्ज्ञानंयदनुभूतपूर्वस्य
प्रत्यवमर्शनंसास्मृतिरुभयथापिप्रकाशनाभावस्त्वपोहन
मितित्रिप्रकारोयंदेहवतःशक्तिप्रसरः संवेदकात्मनात्परमा

श्री॰
गी॰टी॰
पं

र्थसंवेदितैरेकस्मान्मत्तएवप्रसरन्मायावशाज्ज्ञानादेर्ज्ञत्वसंबंधत
याप्रतीयतइत्यर्थः यथाचैवंप्रसरोमत्तःप्रसरति तथासकलज
गत्क्रियाप्रपंचप्रथनप्रथमकारणभूतःपरापरतत्वरूपःशाब्दरा
शिरपिमत्तएव तेनचानन्तप्रपंचप्रसृतेनाप्यहमेवैकोवेद्यइत्याह
वेदैश्चसर्वैरित्यादि वेदोवर्णाश्रमविभागव्यवस्थितिविविधक्रि
यानियामकः शाब्दराशिस्तस्यांतोनिष्ठावेदांतश्चात्मैवपरमेश्वरप्
कृतत्वमित्यादिज्ञानव्यवस्थापकोवचनप्रपंचस्तस्योभयरूपस्याप्य
हमेवैकःकर्तात्मनेनवेदवेदांतात्मकशाब्दस्यस्वतःसिद्धत्वंद्वैतवादि
व्यवस्थापितेश्वरप्रणीतत्वंचपराकर्तुमभिप्रेतं यतोयमत्राशयः
इहाद्य यश्चित्प्रकाशस्वभावप्रकः पदार्थः परमार्थसन्नित्याद्यस्य
यंतावत्सिद्धोनोव्यवस्थापितः सचैवंविधोहंयेनाव्यभिचारिणा
प्रत्यवमर्शात्मकेनधर्मेणतथाविधंस्वरूपंव्यवस्थापयामितम
हंशाब्दतत्वं तदस्यपरमार्थतोमत्स्वरूपाभिन्नस्यापिमदिच्छ
याविनेदंताभासमानानाजगद्भावभेदव्यवस्थापकत्वेनविजृं
भमाणस्यतद्वदंतविकल्पात्मकंस्वरूपमपरंशाब्दतत्वं तस्य
चैवंविधस्यज्ञानधर्मस्यैवविकल्पात्मकस्यश्रोत्रग्राह्यस्यनिर्वि
शेषात्मकतयावभासितःपदार्थसंकेततयामयैवमत्संक
ल्पेनपरमगुरुणापूर्वेषामपिपूर्वेणपरमपुरुषेणमुख्यका
र्येत्ततयार्थाविषयतयावेदवेदान्तरूपवाचकत्वेनप्रतिनियमि
तस्मादर्थवाचकत्वेनचावभासमानमेववेदवेदान्तयोर्मत्का
र्यत्वं तदनेनानन्तप्रपंचेनापिवेदवेदान्तप्रायाणप्रतिपादने
नशब्दात्मकेनस्वशक्तिप्रसरेणनानाव्याप्तिनिष्ठतयावस्थितेन
नापिपरमार्थतश्चिदात्मकस्वरूपव्यतिरिक्तपदार्थान्तराभावा
दहमेवैकोवोद्धव्यइतिवेदैश्चसर्वैरहमेववेद्यइत्यनेनोक्तं ।
तदित्थंस्थितेत्रिप्रकारःप्रमातृव्यवहारोव्यवस्थितस्तथाभौ
तिकशरीरनिष्ठाहंप्रत्ययनिबंधनोव्यवहारःसस्थूलःप्रमाता ।
यस्यचतादृक्शरीरवेदकतद्व्यतिरिक्तजीवनिष्ठाहंप्रत्ययनिबंध

नोव्यवहारः सस्तत्प्रमाता द्वावेतौभेदव्यवहारणान्मायीयोप्र
मातारौ यस्यपुनरशेषवत्तेरव्यापकपरमार्थसत्यसामान्यसंवि
त्प्रकाशैकस्वभावपरमात्मनिष्ठाहंप्रत्ययनिबंधनोभेदप्रती
तिकल्पनामात्रसंस्पर्शशून्यस्वरूपप्रत्यवमर्शमात्रात्मकोव्य
वहारः सपरमार्थसत्यः परमपुरुष स्तत्स्वरूपसमापत्तिश्च
परासिद्धिरितिक्रमेणप्रतिपादयंशास्त्रसिद्धार्थसंग्रहंदर्शयि
तुमाह ॥ १५ ॥

लासिकी [illegible]टीका १५

+ अथस्वातंत्र्याविमुक्तमीश्वररूपमत्रैवदेहेदेशविशे
षेनिविष्टतयापुरुषोत्तमशब्दवाच्यमुपासनार्थंनि
र्दिशति ॥

+ सर्वस्यैवप्राणिजातस्यहृदिसर्वसंविदधिकरणेदेहैकदेशेहमी
श्वरः सम्यक्स्वातंत्र्यावियोगेनस्थितः स्वात्मनः स्वातंत्र्यावियोग
माह मत्तइति मत्तएवेश्वरात्मकाशात्स्मृतिरनुभूतार्थविषया
संस्काराशेषतानीतस्यसंहृतस्यार्थस्यपुनरवभासनात्मिका ज्ञा
नंविषयेंद्रियसंयोगजन्यंविषयावभासनात्मकस्थापनरूप
म् अपोहनंचतन्मोषरूपः संहारः नष्टरूपस्याजीवाद्वा तथा
सर्वैश्चवेदैरहमेवेश्वरोवेद्योवेद्यःवेदनीयः तथावेदांतकृत्सं
प्रदायप्रवर्तकश्चाहमेववेदार्थविच्चाहमेवेश्वरः नतुकृत्स्यो
नवाजीवो अधुनाजीवांकृतस्याच्चस्वात्मनः पुरुषोत्तमाख्यस्य
स्वातंत्र्ययोगेनव्यतिरेकमाहत्रिभिः १५ ॥

पंचोले टीका

किंच सर्वस्येति चपुनः अहंसर्वस्यप्राणिजातस्यात्मासद्हृदि
देशस्त्रिविष्टोवर्ततेअतः मत्तः आत्मप्रकाशात्सर्वप्राणिनांज्ञान
स्मृतीभवतः तयोरपोहनमभावश्चमत्तएवभवति तत्रापियेपु
ण्यकर्माणस्तेषांपुण्यानुरोधेनज्ञानस्मृतीभवतः तथायेपाप
कर्माणस्तेषांपापकर्मानुरूपेणस्मृतिज्ञानयोरपोहनेअपगमः
अभावोभवति चपुनः सर्वैर्वेदैरहमेवपरमात्मावेद्योवेदितव्यः
तथावेदांतकृत्वेदार्थसंप्रदायकृत् चपुनः वेदवित्वेदार्थविदह

मेवनात्म: १५

रणवीरसमिद्धायिनी

किंच सर्वस्येति सर्वस्य ब्रह्मादिस्थावरांतस्य प्राणिजातस्य हृ
दि बुद्धौ सन्निविष्टः स्थितः अतो मत्त एव सर्वस्य स्मृतिरनुभू
तार्थविषया बुद्धिवृत्तिः तथा ज्ञानं विषयेंद्रियसंयोगजं मत्त
एव भवति अपोहनं स्मृतिज्ञानयोरपायश्च मत्त एव भवतीति
अयं भावः यस्मात्सर्वस्य स्मृतिज्ञाने मदायत्ते अतो मया स्मृ
तिभ्रंशमवापितो वर्षां बुद्ध्यसंज्ञी भवति मद्वचनादरेण स्व
धर्मभूतं युद्धं मा त्याक्षीरिति वेदैश्चेति बहुवचनमथर्ववेद
स्यादरार्थं तथा च सर्वैर्वेदैः संप्रणेन यत्नैर्वेदैनेत्यर्थः अहं ए
वमेश्वर एव तत्राभिहितनानाधर्माणां प्रयोगकौशल्येन वेद्यो
ज्ञातव्यः स्वधर्मैदृढनिश्चयानामंते अहमेव प्राप्य इत्यर्थः वेदां
तकृदिति वेदैर्थनुर्वेदयोः तो निश्चयो यथावर्णितसंप्रदा
यो विवस्वदादिद्वारेण तत्प्रवर्तकश्चाहमेव तथा वेदवित्सं
प्रणीवेदविदहमेवेति भावः १५ ॥

मधुभाष्य

१५॥

भाषा अनुवादटीका

और मैंही यावत प्राणी के हृदय मे अन्तर्यामी रूप से प्रवेश करता हूं इसी से सब प्राणीयों को शब्देहत अर्थ विषय का स्मरण होता है और इन्द्रियों के संयोग से जो रूपादि विषयों का ज्ञान सो हमी से होता है और अपोहन कहे स्मरण औ विषयों का ज्ञान इन दोनो का अभाव भी हमसे ही होय है और वेदोमे कहे हूये तीन तीन देवता रूप भी हम है और वेदान्तकृत अर्थात शिष्य प्रशिष्य रूपसे सम्प्रदाय के प्रवर्तक कहे ज्ञानदाता गुरु स्वरूप भी मै हौं औ वेदार्थवित भी मै हीं हौं १५

चौपई

मैंहिं सभकी देहस्थित होई मोसें स्मृति ज्ञान अपोहन सोई सर्व वेदसें हों लखने योगा वेदांतकृत वेदज्ञ मो कह लोगा १५॥

द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच क्षरः
सर्वाणिभूतानिकूटस्थोक्षरउच्यते १६

शांकरभाष्य टीका १

भगवतईश्वरस्य नारायणाख्यस्य विभूतिसंक्षेपउक्तोविशिष्टोपा
धिकृतः यदादित्यगतं तेजइत्यादिनाअथाधुना तस्यैव क्षराक्ष
रोपाधिप्रविभक्ततया निरुपाधिकस्य केवलस्य स्वरूपनिर्दि
धारयिषयोत्तरश्लोकाआरभ्यन्ते तत्र सर्वमेवातीतानागतानन्त
राध्यायार्थजातं त्रिधा राशीकृत्याह द्वाविमाविति द्वौइमौपृथग्रा
शीकृतौ इत्युच्येते लोकेसंसारे क्षरश्च क्षरतीति क्षरः विनाश्येकोरा
शिरपरः पुरुषोऽक्षरस्तद्विपरीतोभगवतोमायाशक्तिः क्षराख्यस्य
पुरुषस्योत्पत्तिबीजमनेकसंसारिजन्तुकामकर्मादिसंस्काराश्र
योऽक्षरःपुरुषउच्यते कौतौ पुरुषावित्याह स्वयमेव भगवान्
क्षरं सर्वाणि भूतानि समस्तं विकारजातमित्यर्थः कूटस्थः कूटो
राशिरिव स्थितः अथवा कूटमायावञ्चना जिह्मं कुटिलता चेति
पर्यायाः अनेकमायावञ्चनादिप्रकारेण स्थितः कूटस्थः संसा
रबीजानन्त्यान्न क्षरतीत्यक्षरउच्यते १६

आनंदगिरिकृत टीका २

उत्तरश्लोकानां तात्पर्यं वक्तुं वृत्तं कीर्तयति भगवतइति विशिष्टो
पाधिरादित्यादिः संप्रत्यध्यायसमाप्तेरुत्तरसन्दर्भस्य तात्पर्यमा
ह अथेति न केवलं निरुपाधिकात्मस्वरूपं निर्धारणीयोत्रग्रन्थः
किन्तु सर्वस्यैव गीताशास्त्रस्य अर्थनिर्णयार्थमित्याह तत्रेति क्ष
राक्षरोपाधिभ्यां परमात्मना च राशित्रयमुक्तेन सर्वाम्नेनाशङ्क्या
विशेषणसंबन्धमुक्तं द्वाविमौइति पुरुषोपाधित्वात् पुरुषत्वं न
साक्षादिति विवक्षित्वाह पृथगिति परं पुरुषं व्यावर्तयति भ
गवतइति तत्र कार्यलिङ्गकमनुमानं सूचयति क्षराख्यस्येति
मायाशक्तिं विना भोक्तृणां कर्मादिसंस्कारादेवोक्तकार्योत्प
त्तिरित्याशङ्क्य तस्य निमित्तत्वेपि मायाशक्तिरुपादानमिति मत्वाह

अनेकेति कामकर्मादीत्यादिशब्देन ज्ञानं गृह्यते प्रकृतिं पुरुषं
चैवेति प्रकृतयोरिह ग्रहणमिति शंकामाकांतद्वारा निवार
यन् निवारयति कौताविति कूटशब्दार्थमज्ञातेनस्थितस्य
कूटस्थनेति सपिण्डितमर्थमाह अनेकेति तस्य कथमक्षरत्व
विना ब्रह्मज्ञानमनाशादित्याह संसारेति १६

स्वामिकृत टीका ३

इदानीं तद्धाम परमं ममेति यदुक्तं स्वकीयं सर्वोत्कृष्टस्वरूपं दर्श
यति द्वाविमाविति त्रिभिः द्वाविमौ क्षरश्चाक्षरश्चेति पुरुषौ लो
के प्रसिद्धौ तावेवाह तत्र क्षरः पुरुषो नाम सर्वाणि भूतानि ब्र
ह्मादिस्थावरांतानि शरीराणि अविवेकिलोकस्य शरीरेष्वेव पुरु
षत्वप्रसिद्धेः कूटः शिलाराशिः पर्वत इव देहेषु नश्यत्स्वपि निर्वि
कारतया तिष्ठतीति यस्तु कूटः कपटं माया तया प्रपंचाका
रेण परिणतां तत्र स्थितः कूटस्थश्चेतनो भोक्ता स तु अक्षरः पु
रुषः उच्यते विवेकिभिः १६

पैशाचभाष्य टीका ४

किंचान्यत् क्षरपक्षोऽपरोऽक्षरस्तत्र तं दर्शयति क्षरः सर्वाणि
भूतानि प्राणिनः अक्षरः पुरुषः कूटस्थः अचलः अव्याकृता
त्मा सोऽक्षर उच्यते १६

+ अतो मत्त एव सर्ववेदानां सारम
र्थं शृणु॥

रामानुजभाष्य टीका ५

+ द्वाविमाविति क्षरश्चाक्षर एव चेति द्वाविमौ लोके पुरुषौ प्रथि
तौ तत्र क्षरशब्दनिर्दिष्टः पुरुषो जीवशब्द[illegible] कल्पनीयं ब्रह्मा नि^
दिस्तंबपर्यंतक्षरणस्वभावाचित्संसृष्टसर्वभूतानि अत्राचित्सं
सर्गैकोपाधिना पुरुषस्यैकत्वनिर्देशः अक्षरशब्दनिर्दिष्टः कू
टस्थः अचित्संसर्गविमुक्तः स्वेन रूपेणावस्थितो मुक्तात्मा स त्व
चित्संसर्गाभावात् अचित्परिणामविशेषब्रह्मादिदेहासाधार
णो न भवतीति कूटस्थ इत्युच्यते अत्राप्येकत्वनिर्देशो विविक्तयो
गरूपैकोपाधिना अभिहितः पूर्वमनादौ काले मुक्ता अनेके यव
यथा कृतवहवो ज्ञानं न तु माभूतामज्ञावमागताः ममसाधर्म्यमा

प्र^

गताः सर्गेपिनोपजायंते प्रलये न व्यथंतीति चेति १९

अभिनवगुप्तकृत टीका ९

~~[illegible]~~ १९ एकोनविंशो ऽध्यायः

परमार्थप्रपा टीका ७

अथ वेदेन तथा तदानीतत्वेन वेद्यं गुह्य कीर्यं तु आत्मस्वरूपमाह
द्वाविति इमावनभूयमानौ द्वौ पुरुषौ लोके प्रसिद्धौ नाव्याद क्षर
श्चाक्षरश्चेति तत्र सर्वाणि भूतानि शरीराणि नश्वरत्वात्क्षर इत्युच्य
ते कूटस्थः लप्रपंचे निश्चलीति कूटस्थश्चेतनाख्यः सोऽक्षर इत्युच्य
ते १९

वनमाली टीका ८

पुरुषोत्तमत्वं मम द्वत्तेयमाह द्वाविति इमौ द्वौ प्रमिमौ चेतनौ
पुरुषौ पुरुषाख्यौ लोके वलोकने सतीतिपावत् यद्वा परमपु
रुषस्यावर्तयितिलोकस्मके ईशितव्यवर्गे श्रयर्थः ब्रह्मादिजीवाः
प्राकृतदेहवंतः तरः पुरुषउच्यते शरीरत्वरणान् कूटे लोहा
पाता याधरतत्र लोहसत्त्वमवनवहानि विकारनयातिश्चलीति कूट
स्थो रमादिरक्षरसमहोतमेत्येन देहादिनोपित्वरणाभावात् १९

उत्तमवैजयन्ती टीका ९

एवंस्वस्योत्तमसाधनत्वं प्रतिपाद्येदानीं वेदेष्वसर्वैर्हमेव वेद्य इ
त्याद्युक्तप्रकारेण पुरुषोत्तमत्वेन मां यो भजति स एव ज्ञानवानि
ति पंचभिर्वक्तुमादौ क्षरादिशब्दनिर्दिष्टयोर्बद्धमुक्तरूपयोर्जीवा
त्मनोः स्वरूपमाह द्वाविमाविति लोके लोक्यते तत्त्वमनेनेति श्रुत्य
नेलोकोवेदस्तस्मिन्वेदे इमौ प्रमाणसिद्धौ द्वौ पुरुषौ जीवौ प्राकृता
प्राकृतदेहशायानौ प्रथितौ भवतः तौ कावित्यपेक्षायामाह क्षरश्चे
ति ब्रह्मादिस्तम्बांतशरीर[illegible]त्वरणस्वभावात्क्षरशब्दनिर्दिष्टोनेका
वस्थो बद्धजीवः जीवानामनेन स्वरूपत्वेप्यविवक्षितसर्गैकरूपमसंब
धादेकत्वनिर्देशो नासंगतः चपुनः अक्षरोस्या प्राकृतदेहयुक्तत्वे
न शरीरत्वरणाभावादेकावस्थो मुक्तजीवः अत्राप्यप्राकृतदेहसंब
न्धैकरूपमसंबंधादेवैकत्वनिर्देशः समष्ट्ययमेवकारः शाब्दप्रयमा
णः इति वदत्प्रयोगाच्च वक्ष्येदार्थकप्रमेन जीवानां बद्धमुक्तमेदे

श्री॰ गी॰ टी॰ पं॰

८२

हि विपरीतत्वमेव द्योतितम् चशब्देन जीवानामनंतत्वं सूचितं न तु द्विवि धत्वमेव स्फुटयति तत्र सर्वाणीति निखिलानि ब्रह्मादिस्थावरपर्यंतानि भूतानि अविवेकिप्रसिद्धानि क्षर उच्यते कूटस्थः कूटे जन्मादिषड्विकारशून्यत्वेन सौकर्ये[illegible]नपायिनि गिरिशृंगवदचले स्वस्वरूपे तिष्ठतीति कूटस्थो वा कूटेऽनंतगुणराशौ भगवति तिष्ठतीति तथा मुक्तजीवाक्षर उच्यते एकत्वनिर्देशः प्रागुक्तवत्तैव बोध्यः अन्यथा बहवो ज्ञानतपसा पूता मद्भावमागताः मम साधर्म्यमागताः सर्गेऽपि नोपजायंते प्रलये न व्यथंति चेत्यादिवचनोक्तिविरोधात् १६

घनास्थिते

एवं सोपाधिकमात्मानमुक्त्वा क्षराक्षरशब्दवाच्यकार्यकारणोपाधिद्वयवियोगेन निरुपाधिकं शुद्धमात्मानं प्रतिपादयति कृपावान् भगवानर्जुनाय त्रिभिः श्लोकैः ॥

मधुसूदनी टीका १

द्वाविमौ पृथग्राशीकृतौ पुरुषोपाधित्वेन पुरुषशब्दव्यपदेश्यौ लोके संसारे कौ तावित्याह क्षरश्चाक्षर एव च क्षरतीति क्षरो विनाशी कार्यराशिरेकः पुरुषः न क्षरतीत्यक्षरः विनाशरहितः क्षरस्य पुरुषस्योत्पत्तिबीजं भगवतो मायाशक्तिर्द्वितीयः पुरुषः तौ द्वौ पुरुषावाह स्वयमेव भगवान् क्षरः सर्वाणि भूतानि समस्तकार्यजातमित्यर्थः कूटस्थः कूटः यथार्थवस्त्वाच्छादनेनायथार्थवस्तुप्रकाशनं वंचनं मायेत्यनर्थांतरं तेनावरणविक्षेपशक्तिद्वयरूपेण स्थितः कूटस्थः भगवान्मायाशक्तिरूपः कारणोपाधिः संसारबीजत्वेनानंत्यादक्षर उच्यते केचित्तु क्षरशब्देनाचेतनवर्गमुक्त्वा कूटस्थोऽक्षर उच्यते इत्यनेन जीवमाहुः तन्न तस्य क्षेत्रज्ञस्यैवेह पुरुषोत्तमत्वेन प्रतिपादयिष्यमाणत्वात् तस्मात् क्षराक्षरशब्दाभ्यां कार्यकारणोपाधी उभावपि जडावेवोच्येते इत्येव युक्त

[illegible]

१६

सदानंदी टीका १

एवं सोपाधिकं रूपमुक्त्वा श्रीहरिरात्मनः कार्यकारणरूपेण द्व्युपाधी क्षराक्षरौ तद्वियोगेन चात्मानं निरुपाधिकं द्वयं विवक्षुः सर्वशास्त्रार्थराशीकृतमिवाधुना १ त्रिभिः श्लोकैर्जगन्ना

षः प्राहातिकृपया स्फुटं पुरुषोपाधिभेदेन द्वयमाशीकृत्ताविमौ
२ वाथो पुरुषशब्देन द्वौ हि संसारगोचरे क्षरतीति क्षरो नाशी नाशि
रेको ऽस्ति पुरुषः ४ न क्षरत्यक्षरो नाशशून्यो विश्वस्य कारणं संसा
रिकारकर्मादिसंस्काराणां समाश्रयः ५ श्रीमद्भगव[illegible]तो माया
शक्त्याख्यः पुरुषोऽपरः पुरुषौ तौ च भगवान्व्याचष्टे स्वयमेव हि
६ समस्तकार्यजातं च क्षरः पुरुष उच्यते तत्त्वस्याछादनेनैवात
त्त्ववस्तुप्रकाशने ७ कूटो माया वञ्चनं चेत्यनर्थान्तरमीरिते ते
नावरणविक्षेपशक्तिद्वयात्मना स्थितः ८ कूटस्थो भगवन्माया
शक्तिरूपो जगज्जनिः अनंतविश्वबीजत्वादक्षरो नादिपूरुषः ९

नीलकंठी टीका १२

सर्वशास्त्रहृदयं संगृह्णाति द्वाविति लोके प्रसिद्धौ इमौ द्वावेव
पुरुषौ क्षरो विनाशी स च सर्वाणि भूतानि प्राणवंति कर्मक्षय
हेतुप्रलयकैवल्यादौ उपाधिनाशमनु विनाशशीलो जीवो ब्रह्म
प्रतिबिंबभूतो जलार्कोपमः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समु
त्थाय तान्येवानुविनश्यतीति श्रुतेः कूटस्थो निर्विकारो मायोपा
धिरक्षरः तदुपाधेरकर्मजत्वेन नाशासंभवात् उपाधिद्वेषेणाव
शीकृतत्वाद्वा सो न क्षरति स्वरूपान्न च्यवत इत्यक्षरः ९

आनंदीटीका १६

लोके दृश्यमानेऽस्मिं देहे द्वे क्षराक्षरत्वेन द्वाविमौ पुरुषौ पुरिशय
नप्रवृत्तिसामान्यादेकत्र शरीरे संहतौ चेतनाचेतनौ पुरुष
संज्ञाविमर्थः तावेव लक्षयति सर्वाणि भूतानि भूतप्रकृति
रूपाणि आकाशादिप्रधानान्तानि कार्यकारणत्वेनैकीभूय
पुरिशयनात्क्षरं तिप्रतिक्षणं विकारं गच्छंतीति व्युत्पत्त्या पुरुषः
क्षर उच्यते द्वितीयस्तु जीवाख्यः कूटस्थो निर्विकारः अक्षरः न
क्षरति विनश्यतीति सर्वभूतवर्गमश्नुते चेतनत्वेन व्याप्नोती
त्यक्षर इति व्युत्पत्त्या च निरपेक्ष्य तन्नैर्व्यापकस्य पुरुषोऽक्षर उच्यते

श्री॰
गी॰ टी॰
पं

८३

यद्यप्यपातगुणानिकैयेवश्लोकचतुष्टयमेतद्व्याख्यातप्रायं तथा
पि विस्पष्टार्थं व्याख्यायते इह हि लोके परमेश्वरमायाशक्त्युज्जृ
म्भितक्रीडामात्रपरमार्थे समस्ते जगति द्वावेव पुरुषौ द्विप्रका
रैव भेदनिर्वंधन व्यवहाराः पुरुषजातिः अत एव तावन्योन्यभिन्न
तया सर्वप्रमातृसंवेद्यस्वरूपत्वे सतीमाविति प्रत्यक्षनिर्देशावि
षयेणेदं शब्देन निर्दिष्टौ कौ तौ द्वाविति तयोः संज्ञामाह क्षरश्चा
क्षर एव चेति तयोर्लक्षणमाह एकस्तावत्क्षरः प्रतिक्षणविन
श्वरजन्मादिविकारयोगिभौतिकशरीरनिष्ठाहंकारात्मकत्वा
त्स्वरूपसंचलनशीलः तथा हि शरीरगता जन्मादयो विका
रास्तद्धर्मानुविधायि चित्तहृतिरिक्तस्वभावेपि तस्मिन्नुपच
र्यन्ते ततः सर्वाणि भूतानि क्षर इत्युक्तं। तथा निर्विकारसंवि
न्मात्रनिष्ठत्वात्कूटस्यैव सर्वत्र शिवशादिवत्त्रिष्वकम्पतया
स्थितः कूटस्थोऽत एव क्षरस्वरूपविपरीतत्वादक्षर इत्युच्यते
अनेन मध्यमा दशा पुरुषस्य प्रतिपादिता यस्यां ज्ञात
मात्रस्वरूपनिष्ठत्वात्क्षरस्वरूपं देहेयशरीरधर्मानुविधायित्वं चना
स्ति परस्परभेदेन व्यवस्थितानानात्वे ज्ञत्वप्रतीतिश्च न तावद्विछि
न्ना एवं मायोज्जृम्भितं पुरुषजातिं द्विविधं प्रतिपाद्य पारमा ९
र्थिकं परं पुरुषस्वरूपं प्रतिपादयितुमाह उत्तमः पुरुषस्त्व
न्य इत्यादि एताभ्यां क्षराक्षराख्याभ्यां पुरुषाभ्यामन्यः स
तत्त्वरूपमात्रपरिनिष्ठत्वाद्विलक्षण उत्तम एवोत्तमः सर्वपुरुषा
तिशायिधर्मात एव परमात्मा मायादेहकाणगमप्रमायोनिस
धर्मसामानाधिकरण्याभावात्परमो निरुत्तरः तत्त्वप्रमादे
न नोसाविन्यतः कोसौ योनिःश्रीवायमत्स्वं देहगतिस
दत्वादीश्वरः स त्रिदं चराचरमनंतभावं स्वसंतानं लोकत्रयं स
कलं जीवलोकमाविश्य तथा प्रकाशनतया धारयादिविभर्ति धार

लासकी[illegible]तीटीका ९५

लोकेसंसारेइमौपुरिदेहेतादा[illegible]वलम्बनरूपाच्छयनात्स्वातं (ˆत्र्या)
त्र्यवियोगलक्षणाच्छयनाच्चपुरुषशब्दव्यपदेश्यौकौतावित्यार
क्षरश्चाक्षरएवच क्षरतिन्नन्दवस्थामितिनिक्षरोब्रह्मादिस्था (ˆचलति)
वरान्तोजीववर्गः अक्षरस्थानक्षरतिस्वस्वरूपान्नचलतीत्यक्षरः
आत्मापतोपुरुषोस्वयमेवभगवान्व्याचष्टे क्षरः सर्वाणिभूतानि
देहादिनिष्ठाहम्भावाजीवाः कूटस्थउदासीनआत्मापुरुषोक्ष
रउच्यतेविवेकिभिः [illegible]
[illegible]॥ १६ ॥

पंचोलेटीका

यदादित्यइत्यादिचतुर्भिःभगवतोनारायणस्यविभूतीःसंक्षेपत (उक्ताः)
इदानींसर्वमेवअतीतानागताध्यायेद्विधाराशीकृत्यक्षराक्षरो।
पाधिप्रविभक्ततयानिरूपाधिस्वरूपेनिर्धारविषयीभगवतः उत्
कृष्टतमत्वप्रतिपादनायउत्तरोग्रंथः द्वाविमाविति त्रिभिःलोकेसं।
सारेक्षरोविनाशोपकोराशिःअपरः पुरुषस्तद्विपरीतःअक्षरःअवि
नाशीक्षराख्यस्यपुरुषस्यउत्पत्तिबीजंभलयादिषुअनेकसंसारिजं
तुकामकर्मादिसंस्कारास्रयोराशिःपुरुषः तौइमौएयकराशिकृ
तौपुरुषौवर्तेतेतौस्वयमेवविविच्यदर्शयतिउत्तरार्द्धेनभगवान्क्ष
रः सर्वाणिभूतानिसमस्तोविकारजातंजगत् अक्षरःपुरुषःकूट।
स्थःकूटराशिरिवस्थितः अथवाकूटोमायावेचनेत्यादिरूपेणास्थि
तः ज्ञानविज्ञानक्षरतोत्पत्तिः सकलसंसारबीजंद्वितीयःपुरुषः १६

रामवीरसमिद्धोधिनी॥

इमौद्वौलोकेसंसारेपुरुषौपुरुषशब्देनव्यपदेश्यौकौतावित्या
ह क्षरश्चाक्षरएवच क्षरतीतिक्षरःकार्यराशिः नक्षरतीत्यक्ष
रोविनाशरहितः क्षरपुरुषोत्पत्तिबीजंतौद्वौपुरुषौव्याचष्टेस्व

स्वयमेव भगवान्सर्वाणि ब्रह्मादिस्थावरांतानि भूतानि क्षर
पुरुषत्वेनोच्यंते कूटस्थ इति कूटे स्थावरणविक्षेपरूपमा
याशक्तिद्वये तिष्ठतीति कूटस्थः सकलसंसारबीजभूतो
ऽक्षरपुरुषत्वेनोच्यत इति १६॥

मधुभाष्य

१६

भाषाअनुवादटीका

अब तद्धाम परमं मम यह जो इस अध्याय के सप्तम श्लोक मे कहा अपना सर्वोत्तमत्व सो तीन श्लोक से देखावते हैं कि जो क्षर औ अक्षर स्वरूप दोई पुरुष लोक मे प्रसिद्ध हैं इन का विशेष यह है कि ब्रह्मा आदि स्थावर पर्यन्त जो देह धारी तिन का नाम क्षर पुरुष क्यों कि अविवेकियों को स्थूल शरीर मे पुरुषत्व प्रसिद्ध है और कूटस्थ कहे शिला राशि पर्बत के समान देह नाश भये भी निर्विकार रूप स्थिति करै ऐसा जो चैतन्य स्वरूप भोक्ता है देखो विवेकी जनो के विचार से सोई अक्षर पुरुष है १६

दोहा

दोय यह पुरुषँ लोकमें क्षरअक्षरकहेजोय क्षरयहसभहि भूतहें अक्षरकूटस्थकहासोय १६॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः यो
लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः १७

शांकरभाष्य टीका १

आभ्यां क्षराक्षराभ्यां विलक्षणः क्षराक्षरोपाधिद्वयदोषेणास्पृ
ष्टो नित्यशुद्धबुद्धमुक्तस्वभावः उत्तम इति उत्तमः उत्कृष्टतमः
पुरुषस्त्वन्यः अत्यन्तविलक्षणः आभ्यां परमात्मेति परमश्चासौ
देहाद्यविद्याकृतात्मभ्यः अन्नमयादिभ्यः पञ्चकोशेभ्यः आ
त्मा च सर्वभूतानां प्रत्यक्चेतन इत्यतः परमात्मेत्युदाहृतः उ
क्तो वेदान्तेषु स एव विशिष्यते यो लोकत्रयं भूर्भुवः स्वराख्यं
स्वकीयया चैतन्यबलशक्त्याविश्य बिभर्ति स्वरूपसद्भावमा
त्रेण बिभर्ति धारयत्यव्ययो नास्य व्ययो विद्यत इत्यव्यय ईश्वरः स
र्वज्ञो नारायणाख्य ईशनशीलः यथाव्याख्यातस्येश्वरस्य पुरु
षोत्तम इत्येतन्नाम प्रसिद्धं १७

आनंदगिरिकृत टीका २

कार्यकारणाख्यौ राशी दर्शयित्वा राश्यन्तरं दर्शयति आभ्यामि
ति वैलक्षण्यफलमाह क्षरेति उपाधिद्वयकृत गुणदोषास्पर्शि
फलितमाह नित्येति आभ्यां क्षराक्षराभ्यामिति यावत् उत्तमा
म इति पदद्वयं वस्तुतः सर्वथैव क्षराक्षरात्मत्वाभावं हेत्वर्थं
जडवर्गस्यात्मत्वकृतं स्वातन्त्र्यं निरस्यति स एवेति लोकत्रय
मित्युपलक्षणं सर्वं जगदपि विवक्षितं चैतन्यमेव बलं तच्छ
क्तिर्माया तयेति यावत् जगद्धारणे परस्य व्यापारान्तरं वारय
ति स्वरूपेति न चास्मान्व्याधारयिता स्वतो चलत्वादित्याह अव्य
य इति संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीश
इति श्रुत्यर्थं गृहीत्वाह ईश्वर इति किंच लोकवेदयोर्भगव
तो नामप्रसिद्ध्या सिद्धमर्थं प्रपञ्चयन्नाह यथेति १७

स्वामिकृत टीका ३

यदर्थमेतौ लक्षितौ तमाह उत्तम इति एताभ्यां क्षराक्षराभ्याम

श्री॰
गी॰टी॰
पं॰

86

न्यो विलक्षणस्तूत्तमः पुरुषः वैलक्षण्यमेवाह परमश्चासावात्मे
ति चोदाहृतः उक्तः श्रुतिभिः आत्मत्वेन लक्षणद्वयेनाद्विलक्ष
णः परमत्वेनाक्षराद्भोक्तुर्विलक्षण इत्यर्थः परमात्मत्वं च द
र्शयति यो लोकत्रयमिति य ईश्वरः ईशनशीलः अव्ययश्च नि
र्विकारश्चैव सन् लोकत्रयं कृत्स्नमाविश्य बिभर्ति पालयति १७

पिशाचभाष्यटीका ४

पुरुषांतरं दर्शयितुमाह उत्तमः प्रकृष्टतमः पूर्णमनेन जगदि
ति परमात्मेत्युदाहृतः उक्तो वेदान्तेषु विशिनष्टि यः पुरुषो
लोकत्रयं पृथिवीमन्तरिक्षं स्वर्गमाविश्य बिभर्ति बलेन धारय
ति तथा च श्रुतिः येन द्यौः पृथिवी च दृढा येन नाक इति ईश्वरः
स्वामी १७

रामानुजभाष्यटीका ५

उत्तम इति उत्तमः पुरुषस्तु ताभ्यां क्षराक्षरशब्दनिर्दिष्टाभ्यां बद्ध
मुक्तपुरुषाभ्यामन्यः अर्थान्तरभूतः परमात्मेत्युदाहृतः सर्वा
सु श्रुतिषु च परमात्मेति निर्देशादेव हि उत्तमः पुरुषो बद्धमुक्त
पुरुषाभ्यामर्थान्तरभूत इत्यवगम्यते कथं यो लोकत्रयमावि
श्य बिभर्त्यव्यय ईश्वरः लोक्यत इति लोकः तत्र यं लोकत्रयमचे
तनं तत्संसृष्टचेतनो मुक्तश्चेति प्रमाणादवगम्यते तत्त्रितयं यआ ग^
त्मतया आविश्य बिभर्ति स तस्माद्व्याप्याद्भर्तव्याच्चार्थान्तरभूतः
इतश्चोक्तात् लोकत्रयादर्थान्तरभूतः यतः सोऽव्यय ईश्वरश्च अव्ययस्व य^
भावो हि व्ययस्वभावादचेतनाच्चेतनात् संबंधेन तदनुसारिणश्चचे
तनाच्च अचित्संबंधयोग्यतया पूर्वसंबंधिनो मुक्ताच्चार्थान्तरभूत
एवं तत्पवनश्चेतनस्य लोकत्रयस्येश्वरः ईशितव्यात्तस्मादर्थान्तरभूतः
१७

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं १७ एकोनविंशे उक्तार्थम् २७

परमार्थप्रपाटीका ७

अथ ताभ्यामतीतं पुरुषोत्तममाह उत्तम इति अन्यस्त्वविलक्षण उ
त्तमः पुरुषो भवति स एव परमात्मेत्युदाहृतः प्रोक्तः यश्चासम
ताद्आविश्य लोकत्रयं बिभर्ति तस्मात् देवान् प्राविशादिति श्रु

तेः अव्ययो निर्विकारः सन्नीश्वरो नियंता सूत्रात्मा ॥ ईश्वरांशत्वेन
मत्त्वमात्मनो [illegible] निर्वचनेन दर्शयति यस्मादिति यस्मादहं जग
[illegible]तीतो नाहं नित्यमुक्तत्वात् अक्षराच्चेतनावर्गादप्युत्तमश्चाति
देहत्वात् अतो लोके वेदे च पुरुषोत्तमः देहादिनानिर्नोजीवस्तु
[illegible] पुरुषोत्तमोहम् [illegible] श्रुतिषु अथ
[illegible] यनेन प[illegible] [illegible] आत्मा या
[illegible] इति वेदे च प्रथितः [illegible] वेदेपि इंद्रियेभ्यः
परं मनो मनसः सत्वमुत्तमं सत्वादधि महानात्मा महतोऽव्यक्तमुत्त
मं अव्यक्तात्परः पुरुषो व्यापकोऽलिंग एव च यं ज्ञात्वा मुच्यते जंतु
रमृतत्वं च गच्छतीति सर्वार्थः १७

वनमाली टीका ८

उत्तमः पुरुषः उत्तमोन्तर्यामीश्वरो देहेंद्रियाणां नियंता रोजीवादपि
भवं स्मयंत सर्वेषामिंद्रियाणां तन्नियामकानां च नियंता तदात्मा
मन्योभिन्नो विलक्षणश्च तत्र हेतुमन वैलक्षण्ये येन कः तस्योत्तम
त्वं सर्वनियामकत्वं नित्यानंतानामवुतैश्वर्यादिना श्रुत्यादिसंमति
माह परमात्मेत्युदाहृतः आत्मा नारायणः पर इत्यादि श्रुत्या स हि
नारायणो ज्ञेयः परमात्मा सनातनः पूतात्मा परमात्मेत्यादि स्मृ
त्या चोदाहृतः युक्तिमप्याह य इति यो लोकत्रयं चेतनात्मकं बहु
कं जीवजातं नेतनस्यानेतनं चाविश्याविश्यशान्तम् प्रविश्य पूर्वि भर्ति धार
यति पालयति च ननु नयपर्यं नगतत्वान्नाशादि विकारं स्यात्तत्राह अ
व्ययः सदैकाकारः सदैकरूपरूपायाविस्ववेश्वभावि स्ववशतिवैत्य
वोक्तेः ननु सर्वगतस्य परमम महतः कथं प्रवेशः प्रविष्टस्य च क
थं निर्लेपत्वं तत्राह ईश्वर इति महतो महीयानिति श्रुतिसिद्धप
रममहतो णोरणीयानिति श्रुत्यणुत्वेन प्रवेशोपपत्तिः लोके
पकत्रविरुद्धयोरण्वत्वमहत्वयोस्तत्रैश्वर्यादविरोधेन समाव
शः नचात्तत्वादिकमप्यैश्वर्यान्न समावेशपत्तो अविरोधोपपाद
कैश्वर्याविरोधिनामेवहि समावेशात्तत्वादैश्वर्याविरोधित्वान्

अतएव प्रविष्टस्यापि निर्लेपत्वम् असंगो ह्ययं पुरुष इति श्रुतेः १७

ऊस्तमवैजयन्ती टीका ९

क्षराक्षराभ्यां विलक्षणं तद्द्वारकं पालकं तत्रियं त्रिरूपकं स्वस्वरूप-
माह उत्तम इति क्षराक्षरयोः सयोगव्यवच्छेदपरो ऽवधारणार्थको न तु स-
र्वसंबंधनिषेधार्थको ऽपशाह्यपात्रात् पुनः उत्तमः क्षराक्षरशब्दनिर्दि-
ष्टाभ्यां बद्धमुक्तपुरुषाभ्यां विलक्षणः पुरुषश्चेतनाचेतनाभ्यामात्मा
भवति तस्मात्ताभ्यामसमपवाद्यांतरभूतपवेत्यनेन जीवेशयोरूपाधिक-
तभेदव्यपालम् नन्वत्र किं प्रमाणमित्यपेक्षायां श्रुतिसंमतिमाह
परमात्मेत्युदाहृत इति परमश्चासावात्मा च तथाक्षराक्षरपुरुषावा-
त्मापेक्षं परमात्मेत्येवमुदाहृतः सर्वव्यापी सर्वभूतांतरात्मात्मा-
त्मा हि परमइत्यादिभिः श्रुतिभिरपि कथितः परमत्वेनाक्षरश-
ब्दनिर्दिष्टाद्धक्षाद्विलक्षणश्चेत्यर्थः ननु सो पुरुषः कः केन धर्मेणा-
वाक्षराक्षराभ्यामुत्तमश्चेत्यपेक्षायां तस्योत्तमत्वप्रयोजकं धर्ममाह
यो लोकत्रयमिति यः परमात्मा लोकत्रयं स्वर्गादिकं यद्वा लोक्यन्ते इति लो-
मन्या लोकाः चेतनं तत्संसृष्टचेतनो मुक्तचेतनस्तेषां लोकानां त्र-
यं लोकत्रयं आविश्य तत्रदंतर्यामिरूपत्वेन तत्त्रयं प्रविश्य बिभर्ति धा-
रयति पालयति च यस्येशमेतज्जगद्धि धारणपालनरूपमीशानं
कर्मास्ति स एवोत्तमः पुरुषोऽनंतवद्धमुक्तस्यैतयोरेतत्कर्मासम्भवा-
ज्जगद्व्यापारवर्जमिति प्रतिषेधाच्च ननु यथैवं तर्हि बद्धजीवोपि
देहादीनाविश्य तेषां धारणपालने च करोति तस्मात्तस्यैकोवावि शे-
ष इत्याशंकायामाह अव्यय इति अविनाशिगाद्ययस्वभावो जीवास-
त्वव्ययइत्यान्विशेषः अयंभावः यथा मेषप्रसंगात् सिंहशावकः
स्वस्वरूपस्वभावं विस्मृत्य मेषस्वभावं भजनेन यथाः मायविषयानाध-
चेतनव्ययस्वभावप्राकृतस्त्वेतद्देहादिसंगात् स्वकीयमीश्वरांशम-
व्ययरूपं स्वरूपस्वभावं विस्मृत्य देहएवाहं जन्ममरणस्वभावोऽहं
स्त्रीरोगी स्माकारकं व्ययस्वभावं भजने परमात्मा तु न लोकत्रये
प्रविष्टोपि न द्वारकोपि न मालकोपि तत्स्वभावेनस्पृश्यतानीनिनतु

व्ययस्वभावादीदृशोवद्धोमास्तु किंतुव्ययस्वभावत्वान्मुक्तस्तुभव
त्येवेतिचेन्नत्राह ईश्वरइति अचेतनचेतनबद्धमुक्तात्मकस्यलोकस्य
ईश्वरोनियंतास्वामीवातोमुक्तादपिपदार्थांतरइत्यर्थः १७

+ आभ्यांक्षराक्षराभ्यांविलक्षणः क्षराक्षराख्यो
पाधिद्वयदोषेणास्पृष्टोनित्यशुद्धबुद्धमुक्तस्व
भावः ॥

मधुसूदनी टीका १०

+ उत्तमउत्कृष्टतमः पुरुषस्त्वन्यः अत्यंतविलक्षणः आभ्यां
क्षराक्षराभ्यांज[illegible]राशिभ्यामुभयभासकस्तुरीयश्चेतनराशीरित्य
र्थः परमात्मेत्युदाहृतः अन्नमयप्राणमयमनोमयविज्ञानमयानं
दमयेभ्यः पंचभ्योविद्याकल्पितात्मभ्यः परमप्रकृष्टः अकल्पितो
ब्रह्मपुच्छंप्रतिष्ठेत्युक्तः आत्माचसर्वभूतानांपरमात्मेतिचेत्युतः पर
मात्मेत्युक्तोवेदांतेषुयः परमात्मालोकत्रयंभूर्भुवःस्वराख्यंसर्वं
जगदितियावत् आविश्यस्वकीयमायथाशक्त्याधिष्ठायबिभर्ति
सत्तास्फूर्तिप्रदानेनधारयतिपोषयतिचकीदृशः अव्ययः सर्व
विकारशून्यईश्वरः सर्वस्यनियंतानारायणः सउत्तमः पुरुषः परमा
त्मेत्युदाहृतइत्यन्वयः सउत्तमः पुरुषइतिश्रुतेः [illegible]
[illegible]
[illegible]
[illegible]
[illegible] १७

सदानंदी टीका ११

आभ्यांक्षराक्षराभ्यांयोनिर्विकारोविलक्षणः तयोर्दोषैरसंस्पृष्टः शु
द्धस्तुत्रयेनेपुना १ यउत्कृष्टतमस्ताभ्यामुचात्यंतविलक्षणः क्षरा
क्षराभ्यामुभयभासकत्वात्तुरीयकः २ अविद्याकल्पितेभ्योन्न
मयादिभ्यस्तेभ्योत्तमः आत्माचसर्वभूतानांप्रत्यक्चेतनइष्यतः ३
परमात्मेतिसंप्रोक्तोवेदांतेषुसदक्षयः यएवपरमात्मेदंभूर्भुवःस्व
रितित्रयं ४ सर्वंजगत्स्वयाशक्त्याधिष्ठायैवबिभर्त्यसौ सत्तास्फूर्ति
प्रदानेनधारयत्यपिपोषकः ५ विकारशून्यः सर्वस्यनियंतापर
मेश्वरः सउत्तमोहिपूर्णाख्यः परमात्मास्युदाहृतः १७

नीलकंठी टीका १२

एताभ्यांकार्यकारणोपाधिभ्यामस्योनिरुपाधिरुत्तमः पुरुषःयो

सोपरमात्मेत्युदाहृतः शास्त्रे योसौमाययाईश्वरोभूत्वालोकत्रयं
उत्तममध्यमाधमशरीररूपंआविश्यधारयतिशरीरत्रयं अ
प्यापिअव्ययःसर्वज्ञत्वेनईश्वरधर्मेणअल्पज्ञत्वेनजीवधर्मे
णवानव्येतिवर्धतेक्षीयतेवेत्यर्थः १७

आनंदीटीका १३

तुपुनःताभ्यांक्षराक्षराभ्यामन्यःस्वस्वरूपादप्रच्युतःउत्तमःस
र्वोत्तीर्णःपुरुषःअन्तर्यामित्वेनपुरिशरीरेस्थितःपरमात्मे
त्युदाहृतःयोलोकत्रयंकृत्स्नमेवजगदाविश्यानुप्रविश्यविभ
र्तिधारयतिपोषयतिचईश्वरःकर्तुमकर्तुमन्यथाकर्तुंचस
मर्थः [illegible] १७ ॥

रामकंटीटीका १४

उत्तमःपुरुषस्त्वन्यइत्यादि एताभ्यांक्षराक्षरशब्दोक्ताभ्यांपुरुषा
भ्यामन्यः सत्यस्वरूपमात्रप्रतिष्ठत्वाद्विलक्षणोतएवोत्तमः स
र्वपुरुषातिशायिधर्मेणएवपरमात्मामायाहेतुकागमापाया
नित्यधर्मसामानाधिकरण्याभावात्परमोनिरुत्तरः सत्यआत्मा
चेतनोसाविमुक्तः कोसौ योनिष्प्रतीघानस्वच्छंदेच्छापरिस्पं
दत्वादीश्वरःसन्निदंचराचरमनेनभावज्ञानसंततंलोकत्रयंस
कलंजीवलोकमाविश्यतथाप्रकाशतयाघापिविभर्तिधारय
ति इत्थंस्थितिमनुभावयति सामान्यसंवित्प्रकाशमात्रप्रकाश्य
तामंतरेणनकश्चित्पदार्थोनचित्पदार्थेनावस्थानमलमित्यस
कृदुक्तमेवेतत्प्रकरणे लोकत्रयस्यचाव्ययमितिविशेषण
मवाह नित्यत्वाददलयत्व विवक्षयावोहव्यमतएवमायीयपुरु
षवैलक्षण्यंप्रतिपादयितुमाह १७ ॥

+अथाक्षराक्षराभ्यांविलक्षणमीश्वरं
प्रतिपादयति ॥

लासिकी [illegible]टीका १५

+तःपुरुषद्वयव्यतिरेके एताभ्यांक्षराक्षराभ्यामन्योविलक्षणः
परामर्शरूपस्वातंत्र्यमित्ययोगितयाउत्तमःपुरिदेहेवसतीस
र्वथात्मरूपःपरमोनिरवधिरात्मापरमात्मेतीश्वरएवोदाहृ

नः श्रुतिभिः स्मृतिभिश्च कोसौ य उत्तमः पुरुषो लोकत्रयं सकलं ज
गदाविश्य स्वातंत्र्येणाधिष्ठाय बिभर्ति धारयति संरक्षति ननु
तत्कारणेन सोपि जीववत्तत्कर्मयोगी परतंत्रो वा भवेदित्याशंक्याह
अव्ययः स्वरूपसंचलनरहित ईश्वरः स्वातंत्र्यमपरिमजन[illegible]
[illegible] ॥ १७ ॥

पंचोलेटीका

यदर्थं क्षराक्षरविलक्षणो उक्तं तमाह उत्तम इति त्वपुनः उत्तमः
पुरुषः अन्यः एताभ्यां क्षराक्षराभ्यां विलक्षणः क्षराक्षरोपाधिद्व
यदोषेणास्पृष्टः नित्यशुद्धबुद्धमुक्तस्वभावः उत्तमः उत्कृष्टतमः
पुरुषः एताभ्यामन्यत्वेन विलक्षणः पुरुषद्वयात्परः परम उत्कृष्टः
आत्मा सर्वभूतानां प्रत्यगात्मा अतो वेदांतेषु परमात्मेति उक्तः यई
श्वरः सर्वज्ञः ईशनशीलः लोकत्रयं भूर्भुवस्वराख्यं प्रविश्य स्वकी
यमशक्त्या स्वरूपसद्भावमात्रेण धारयति १७ ॥

रसावीरसमिद्बोधिनी

उत्तम इति द्वाभ्यां क्षराक्षराभ्यामन्योत्यंत विलक्षण उत्तम उत्
कृष्टतमः परमात्मेत्युदाहृतः यो लोकत्रयं भूर्भुवः स्वराख्यं
सर्वं जगत् इति यावत् आविश्य स्वकीयया शक्त्याधिष्ठाय बिभ
र्ति सत्तास्फूर्तिप्रदानेन धारयति पोषयति च कीदृशोव्ययः
सर्वविकारशून्य ईश्वरः सर्वस्य नियंता नारायणः स उत्तमः
पुरुषः परमात्मेत्युदाहृतः १७ ॥

मधुभाष्य

भाषाअनुवादटीका

जिस हेतु क्षर औ अक्षर दोनो पुरुष लक्षित भये हैं इससे जो उत्तम पुरुष सो इन दोनोसे भिन्न है उस की विलक्षणता कहते हैं कि सो परमात्मा स्वरूप है यह श्रुतियों मे कहा है और आत्मा अचेतन रूप क्षर से तथा परमात्मा अक्षर रूप भोक्ता से भी भिन्न हैं अब उनका परमात्मत्व देखावते हैं कि सो ईश्वर पदवाच्य नियन्ता औ अव्यय कहे निर्विकार स्वरूप हो के भी त्रैलोक्य के हृदय मे प्रवेश करिके प्राणी मात्र का प्रतिपालन करते हैं १७

दोहा

उत्तम पुरुषयह पकहे परमात्मकहाजोय जो प्रवि
शय त्रयलोकभर ईश्वर अव्यय सोय १७ ॥

यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः अतोः
स्मिलोकेवेदेचप्रथितःपुरुषोत्तमः १८

शांकरभाष्यटीका १

तस्यनामनिर्वचनप्रसिद्धार्थत्वंनाम्नोदर्शयन्निरतिशयोहमीश्व
रइत्यात्मानंदर्शयतिभगवान् यस्मादिति यस्मात्क्षरमतीतोहंसं
सारमायावृक्षमश्वत्थाख्यमतिक्रांतोहमक्षरादपिसंसारवृक्षवी
जभूतादपिचोत्तमउत्कृष्टतमऊर्ध्वतमोवाअतःक्षराक्षराभ्यामु
त्तमत्वादस्मिभवामिलोकेवेदेचप्रथितःप्रख्यातःपुरुषोत्तमइ
त्येवंमांभक्तजनाविदुःकवयःकाव्यादिषुचपुरुषोत्तमइत्य
नेनाभिज्ञानेनाभिगृणंति १८

आनंदगिरिकृतटीका २

अश्वकर्णादिवत्तस्यनाम्नारूढत्वादर्थविशेषाभावाद्भगवतोपि
लौकिकेश्वरवदीश्वरत्वंसातिशयमितिनेत्याहतस्येति यस्मादि
त्यस्यापेक्षितंनिर्दिशति उत्तमःपुरुषइतिवाक्यशेषः १८

स्वामिकृतटीका ३

एवंभूतंपुरुषोत्तमत्वमात्मनोनामनिर्वचनेनदर्शयति यस्मादिति
यस्मात्क्षरंजडवर्गमतिक्रांतोहंनित्यमुक्तत्वात् अक्षराच्चेतनव
र्गादप्युत्तमस्तन्नियंतृत्वात् अतोलोकेवेदेचपुरुषोत्तमःप्रथितः
प्रख्यातोस्मि तथाचश्रुतिः सवाअयमात्मासर्वस्यवशीसर्वस्येशानः
सर्वस्याधिपतिःसर्वमिदंप्रशास्तीत्यादि १८

पैशाचभाष्यटीका ४

तन्नामनिर्वचनार्थमाह यस्मात्क्षरंपुरुषमतीतःअतिक्रम्यस्थि
तःअक्षरादपिपुरुषादुत्कृष्टतमःसर्वेभ्यःपाप्मभ्यउदितत्वात्त
थाचश्रुतिःउदितिनामसएषसर्वेभ्यःपाप्मभ्यउदितइतिअतो
हेतोःअस्मिंलोकेवेदेचपुरुषोत्तमइतिप्रथितस्तादृशःसर्वलोक
प्रसिद्धइत्यर्थः १८

रामानुजभाष्यटीका ५

यस्मादिति यस्मादेवंभूतैःस्वभावैःक्षरंपुरुषमतीतोहंअक्षरा

न्मक्षरादप्युत्कृष्टतमः अतोहंलोकेवेदेचपुरुषोत्त
मइतिप्रथितोस्मि वेदार्थावलोकनात् लोकइतिस्मृतिरिहोच्य
ते स्मृतौश्रुतौचेत्यर्थः श्रुतौतावत् परंज्योतीरूपंसंपद्यस्वेन
रूपेणाभिनिष्पद्यतेसउत्तमः पुरुषः स्मृतौचअथावतारपुरु
षोत्तमस्यह्यनादिमध्यान्तमजस्यविष्णोरित्यादौ १८

अभिनवगुप्त टीका ९

सहार्थं [illegible]एकोनविंशोऽक्षार्थमु १८

परमार्थप्रपा टीका ७

ईदृशंपुरुषोत्तमत्वमात्मनोनामनिर्वचनेनदर्शयति यस्मादिति
यस्मात्क्षरंजडमतिक्रान्तोहंनित्यमुक्तत्वात् अक्षराच्चेतनावर्गाद
प्युत्तमः[illegible]नियन्तृत्वात् अतोलोकेवेदेचपुरुषोत्तमः देहाभि
मानिनोजीवस्यपुरुषइतिसंज्ञातस्मादुत्तमःपुरुषोत्तमोहमिति
लोकेप्रसिद्धः अयनहिनिर्मूलाप्रसिद्धिरितिन्यायेनएतावानस्य
महिमा अतोज्यायांश्चपूरुषइतिवेदेचप्रथितः श्रोतेः नउत्त
मपर्वंवेदेपि इन्द्रियेभ्यःपरंमनोमनसःसत्त्वमुत्तमंसत्त्वादधि
महानात्मामहतोव्यक्तमुत्तमं अव्यक्तात्परःपुरुषोव्यापको
लिंगएवच यज्ज्ञात्वामुच्यतेजन्तुरमृतत्वंचगच्छतीतिस्मृत्यर्थं
१८

वनमाली टीका ८

उदासीनतयाव्याख्यातस्येश्वरस्यक्षराक्षरविलक्षणस्यपुरुषोत्तम
इत्येतत्प्रसिद्धंनामनिर्वचनेनपरमेश्वरोहमेवेत्यात्मानंदर्शय
तिब्रह्मणोहिप्रतिष्ठाहंतद्धामपरमंममेत्या[illegible]कस्वमहिमनि
र्धारणाय यस्मादितियस्मात्क्षरंप्राकृतदेहवज्जीवसमूहम
तीतोहंसर्वेश्वरः अक्षरादपिरमादिमुक्तसमूहादप्युत्तमम् प्राकृ
तदेहवर्तिसंसारेवर्तमानानांजीवानांमत्साम्यनापिनाशोतिन
तोस्यतविलक्षणोहमुक्तानांतुमत्साम्यंनास्तिपरंतत्रियाम
कत्वातेषामसंभावितस्यविशेषादपादेः कर्तृत्वाच्चतेभ्यउत्तमत्व
तिभावः अतोलोकेप्रकृतिगुणमयाद्याख्यानाव्यक्ताव्यक्तस्वरूपि
णिपुरुषस्याप्यभावेनोलीयतेपरमात्मनि परमात्मावसर्वेषा
माधारः पुरुषोत्तमः स[illegible]विष्णुनामावेदेषुवेदांतेषुचगीयते

इत्यादिश्रुतिवाक्ये स उत्तमः पुरुष इत्यादिवेदे च प्रथितः प्रसिद्धो
हं वासुदेवः पुरुषोत्तमः १८

ऊम्भवैजयन्ती टीका ॥

एवं क्षरस्याक्षरात्क्षरोत्तमत्वेन स्वरूपमुक्त्वेदानीं पुरुषोत्तमनाम
निर्वचनत्वमाह यस्मादिति यस्माद्धेतोरुक्तैः स्वभावैः क्ष
रं वक्षं पुरुषमतीतोऽतिक्रान्तोऽहं वर्ते यस्माच्चाक्षरादानमुक्त
पुरुषादप्यपि शुद्धात्मत्वकृतिकालमांच्च चेतनमात्रादप्युक्तैः
परमात्मत्वादिभिः स्वस्वभावैर्हेतुभिरुत्तम उत्कृष्टतमो भ
वामि अतो हेतोर्लोके लोकत्वे वेदार्थानेनेति निरुक्तेर्लोक
शब्देन स्मृतिरुच्यते तेनास्मिन्स्मृत्याख्ये तैर्विज्ञापितं कार्यं स्त
भगवान्पुरुषोत्तमः अवतीर्णो महायोगी सत्यवत्यां पराश
रात् अंशावतारं पुरुषोत्तमस्य जानीहि मध्यांतमजस्य विलो
रित्यादौ च पुनः वेदे एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं
ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष
इत्यादौ प्रथितो विख्यातो यत्परंज्योतिस्संप्रसादेनोपसंपन्न
स पुरुषोत्तमः परमात्माहमेवास्मि भवामीत्यर्थः १८

मधुसूदनी टीका ९

+ यस्मात्क्षरं कार्यत्वेन विनाशिनं मायामयं संसारवृक्षमश्वत्था
ख्यमतीतोऽतिक्रान्तोऽहं परमेश्वरः अक्षरादपि मायाख्याद्व्या
कृतादक्षरात्परतः परस्तात्पंचम्यंतात्परपदेन कृत्याप्रतिपा
दितात् संसारवृक्षबीजभूतात् सर्वकारणादपि चोत्तम उत्कृ
ष्टतमः अतः क्षराक्षराभ्यां पुरुषोपाधिभ्यामयासेन पुरुषप
दव्यपदेश्याभ्यामुत्तमत्वादस्मि भवामि लोके च वेदे च प्रथितः
प्रख्यातः प्रख्यातः पुरुषोत्तम इति स उत्तमः पुरुष इति वेदे उ
दाहृत एव लोके च कविकाव्यादौ हरिर्यथैकः पुरुषोत्तमः स्मृ
त इत्यादि प्रसिद्धं कातरपतेन वदावदंतः परार्थान्यार्थाय
बोधितवन्तो निजमीश्वरत्वं सचित्सुविवेकवपुषः पुरुषोत्त
मस्य नारायणस्य महिमानमहिमानमेति केचिन्निरहकरणा

+ इदानीं यथाव्याख्यातेश्वरस्य क्ष
राक्षरविलक्षणस्य पुरुषोत्तम
इत्येतत्प्रसिद्धनामनिर्वचनेन
ईदृशः परमेश्वरोऽहमेवेत्यात्मा
नं दर्शयति भगवान् ब्रह्मणो
हि प्रतिष्ठाहं तद्धाम परमं
ममेत्यादिप्रागुक्तानिजम
हिमा निर्धारय ॥

श्री·
गी·टी·
पं·

१८
२

निविष्टस्य भोगमात्रायसयोगमललान्याधियोषतंते नारायण
स्य महिमानमनेन परमार्थादयत्र्यत्सारमहेनमक्तः
[illegible] १८

सदानंदी टीका ११

यथोक्तस्येश्वरस्यैव पुरुषोत्तमइत्यदः प्रसिद्धं नाम तस्य स्व
नाम्नो निर्वचनेन च १ ईश्वरो वासुदेवोस्मि विशुद्धः परमे
श्वरः अहमेवेति भगवानात्मानं दर्शयन्नजः २ ब्रह्मणो
हि प्रतिष्ठाहं तद्धाम परमं मम इत्यादिपूर्वं निर्णीतस्वमहि
म्नः प्रसिद्धये ३ इदं मायामयं यस्मात्कार्यत्वेन विनाशिनं
संसारहेतुमश्वत्थमतिक्रांतोस्म्यहं हरिः ४ अक्षरादपि मा
याख्यादव्याकृतपदाभिधात् संसारहेतुबीजात्त्वमसदोत्कृ
ष्टतमोस्म्यहं ५ क्षराक्षराभ्यां पुरुषोपाधिभ्यामुत्तमत्वतः
वेदे सर्वत्र विख्यातः सउत्तमइति श्रुतेः ६ पुरुषोत्तमइत्येवं
भवामि परमेश्वरः लोके च कविकाव्यादौ पुराणे भारते तथा
७ प्रख्यातो वर्णितोहं श्रीपुरुषोत्तमइत्यपि मद्भक्ता मां भजंती
त्यं कवयः काव्यवर्णने ८ योगिनो ध्याननिष्ठा ये यजंते पुरु
षोत्तमं १८

नीलकंठी टीका ११

यस्मादिति क्षरं उपाधिं अक्षरं च उपाधिं अतीतोतिक्रम्य स्थि
तोहमतोः क्षरादपि वेति वशत्वात् क्षरादपि उत्तमः उत्कृष्ट
तमः जडान्तररूपादुपाधेरुत्कृष्टत्वादुपहितो जीवस्ततस्त्वा
त्ततोप्युत्कृष्टतरो मायोपाधिः स्वतंत्रत्वात् ततोप्युत्कृष्टत
मो निरुपाधिरनागंतुकरूपत्वात् अत्रार्थः स्पष्टः १८

^एतन्निर्वचनेनोपसंहरति॥

आनंदीटीका १२

^क्षरं विनाशिनं देहाख्यं संसारहेतुं च मायागुणमतीतः अक्ष
रादेहज्ञात्संसरणशीलाज्जीवादपि चोत्तमः स्वयमसंस
रणशीलः देहज्ञस्य तत्कर्मफलदः लोके वेदे च प्रथि
तः प्रसिद्धः पुरुषोत्तमः १८ ॥

रामकंटीटीका १४

यस्मादित्यादि यतोहेतोर्यथाप्रतिपादितस्वरूपंक्षरंस्थूलंपुरु षमतिक्रांतोक्षरस्यचयथाप्रतिपादितस्वरूपस्यसूक्ष्मस्या स्यभेदप्रत्ययाभावाङ्मम:प्रकृष्टत्वतोन्वर्थयासंज्ञयालो कशास्त्रयो:पुरुषोत्तमइत्यहंप्रतीत: १८ ॥

लासिकी [illegible] टीका १५

अथात्मन:पुरुषोत्तम.नामनिर्वक्ति॥ यत:क्षरंजीववर्गमतीतोतिक्रांतोहंतस्यजडरूपदेहनिष्ठाहंभा वत्वात् अक्षराक्रूटस्थादपिउत्तम:प्रकृष्टोहम् तस्योदासीन्य स्वभावत्वात् स्वात्मनश्चस्वातंत्र्यनित्ययोगितया अतोलोकेक विकाव्यादौवेदेचपुरुषोत्तमइतिप्रख्यातोस्मि तथाचकाव्ये हरिर्यथैक:पुरुषोत्तम:स्मृतइति १८ ॥

पंचोले टीका

स्वकीयपुरुषोत्तमनामनिर्वचनेनस्वात्मनिनिरतिशयंपेश्वर्यं दर्शयतिभगवान् यस्मादिति यस्माद्हेतोरहंसंसारमायावृक्षमश्व त्थाख्यमतीत:चपुन:अक्षरात्संसारबीजभूताद्व्याकृतादपि उ त्तम:उत्कृष्टतम:ऊर्ध्वतमोवाअत:क्षराक्षराभ्यामुत्तमत्वाल्लोकेवे देचपुरुषोत्तमइतिविख्यात: १८ ॥

रसवीरसमिद्धोयिनी॥

यस्मादिति यस्मात्क्षरं सर्वाणिभूतानि अतिक्रांतोहंपरमे श्वरोक्षरादपि मायाख्यादव्याकृतादक्षरात्परत:परइति सकलकारणादपिचोत्तमउत्कृष्टतमोतोहंलोकेवेदेचपुरु षोत्तमइतिख्यात: अत्रलोकेइति लोके काव्यादौ यथा हरिर्य थैक:पुरुषोत्तम:स्मृतोमहेश्वरत्र्यंबकएवनापरइति वेदेचा

93

नमः [illegible] ति १८॥

मधुभाष्य

१८

भाषाअनुवादटीका

एवम्भूत पुरुषोत्तमत्व अपना नाम कहने से देखावते हैं कि जि
स हेतु हम क्षर जो जड समूह तिन को अतिक्रमण करत और
नियन्तारूप चेतन जो अक्षर उस से भी उत्तम हैं इस से सकल
लोक और वेद मे हम पुरुषोत्तम नाम से प्रसिद्ध हैं सोई श्रुति क
हती हैं कि सोई जो पुरुषोत्तम वे आत्मा औ त्रैलोक के वश करने
वाले और तीन लोक के ईश्वर सबके शासनकर्ता हैं यह भगवा
न्ने कहा १८

दोहा

जो मोहि ऐसें जानहिं चक्षर पुरुषोत्तम कोय सो सभ
वेता भजत मोहि सर्वभावनत सोय १८॥

94

योमामेवमसंमूढोजानातिपुरुषोत्तमं स
सर्वविद्भजतिमांसर्वभावेनभारत १९

शांकरभाष्य टीका १

अथेदानीं यथानिरुक्तमात्मानं योवेद तस्येदं फलमुच्यते योमा
मिति योमामीश्वरं यथोक्तविशेषणमेवं यथोक्तेन प्रकारेण
असंमूढः संमोहवर्जितः सन् जानात्ययमहमस्मीति पुरुषोत्त
मं ससर्ववित् सर्वात्मना सर्वं वेत्तीति सर्वज्ञः सर्वभूतस्थं भज
ति मां सर्वभावेन सर्वात्मचित्ततया हे भारत १९

आनन्दगिरिकृत टीका २

आत्मनोऽप्रपञ्चत्वे ज्ञानफलोक्त्या नौति अथेति यथोक्तविशे
षणं सर्वात्मत्वादिविशेषणोपेतमितियावत् क्षराक्षरातीत
त्वं यथोक्तप्रकारः संमोहवर्जितः [illegible] संमोहेन देहादि
ष्वात्मात्मीयत्वबुद्ध्या रहितइत्यर्थः भगवत्त्वं जानतः सर्ववित्त्वं
तस्यैव सर्वात्मनामेयत्वादित्याह ससर्वविदिति सर्वात्मनि
मय्येवासक्तचित्तेनेत्यर्थः १९

स्वामिकृत टीका ३

एवंभूतेश्वरज्ञानफलमाह योमामिति एवमुक्तप्रकारेणअ
संमूढोनिश्चितमतिः सन् योमांपुरुषोत्तमंजानातिससर्वभावे
नसर्वप्रकारेणमामेवभजति ततःसर्वविन्सर्वज्ञोभवति १९

पिशाचभाष्य टीका ४

अथेदानींयःपुरुषोत्तममनामानं स्वरूपंवेदतस्यफलमुच्यते योमां
परमेश्वरमेवमसंमूढःनिश्चितबुद्धिःवेत्तिपुरुषोत्तमंनकर्म
स्वरूपबलवीर्यतेजोभिरित्यर्थः १९

रामानुजभाष्य टीका ५

योमामिति एवमुक्तेनप्रकारेणपुरुषोत्तमंमामसंमूढोजानाति
क्षराक्षरपुरुषाभ्यामर्थान्तरभावेनव्याप्तनभरणैश्वर्यादियो
गेनविसजातीयंजानातिससर्ववित् मत्प्राप्त्युपायत‸वेदितव्यंत या ग

श्री·
गी·टी·
पं·

त्सर्वैवेदभजतिमांसर्वभावेनयेचमत्प्राप्त्युपायतयामतभजनप्र
कारानिह शास्त्रेषु सर्वैर्भजनप्रकारैर्मांभजते सर्वैर्मद्विषयैर्वेद
नैर्ममयाप्रीतिर्यांच मम सर्वैर्मद्भजनैर्मद्विषयैरुभयविधासाप्री
तिरनेनवेदनेनजयत इत्यर्थः [illegible]

95

अभिनवगुप्तकृतटीका ९

लोके द्वाविमौ पुरुषाविति ग्रन्थेनेदमुच्यते लोके तावदप्रबुद्ध
स्वभावोपि सर्वः पृथिव्यादिभूतारब्धशरीरमात्मानं चेतनं तद
रूपं जानातीति लोकस्य मूढत्वाद्द्वैतधीर्न निवर्तते अहं तत्स
कलानुग्राही द्वैतग्रन्थिं विभिद्य सकललोकव्यापकतया वेद्य
इति क्षरमतीतो भूतानां जडत्वात् अक्षरमतीत आत्मनोप्रबु
द्धत्वे सर्वव्यापकत्वस्वं ज्ञानात् पुरुषोत्तमे लोके वेदेपि स उत्तमः
पुरुष इत्यादिभिर्वाक्यैः स एव परमात्मा द्वय एवमुच्यते एवं
जानानः सर्वमयं मामेव ब्रह्मतत्त्वमुपासीनः सर्वमनस्तयत्वेन
विदन्सर्वेणाभावेन मूर्तिक्रियाज्ञानात्मकेन मामेव भजते य
त्युपनिषद्भगवन्मूर्तिनपेत्यादि तथा चमयैव शिवशक्तावि
नाभावस्तोत्रे नवचकावननस्तानि रंविके सकलशह्मयोकि
लतेन नुः निखिलमूर्तिषु मे भवदन्वयो मनसिजासु बहिष्प्रस
रासु च इति विचिन्त्य शिवे शमिताशिवे जगति जातमयत्नव
शादिदम् स्तुतिजपार्चनचिन्तनवर्जिता न खलु काचन का
लकलापि मे इति १९

परमार्थप्रपा टीका २

तज्ज्ञानस्य फलमाह य इति एवं निरुक्तप्रकारेण असंमूढो निश्चि
तमतिः सन् यो मां पुरुषोत्तमं जानाति स सर्वभावेन सर्वप्रकारे
णमामेव भजति न तु सर्ववित्सर्वज्ञो भवति १९

वनमाली टीका ८

पुरुषोत्तमत्वज्ञानमेवमुख्यमद्भजनमित्याह य इति यो असंमूढो यं
कश्चिन्मनुष्यो न मः कश्चिदेव प्रेक्षावानिति संमोहवर्जितो मां पुरु
षोत्तमं वक्ष्यमाणनियन्तारं विश्वोदयादिकर्तारं वासुदेवं जानाति स

कृतार्थः पृथापुत्रः मम सकाशात् प्रसादः सर्ववित् सर्वशास्त्रार्थ
ज्ञः एतावानेव सर्वशास्त्रार्थः सर्वभावेन सर्वप्रकारेण मां भजति
पुरुषोत्तम एव सर्वशास्त्रार्थस्तज्ज्ञानात्स सर्वज्ञः पुरुषोत्तमत्वेना
नमेवोत्तमं भजति मनस्तज्ज्ञानी मां सर्वप्रकारेण भजतीति भावः
१९

कृस्नपैनपत्री टीका १९

ननु यदीदृशं पुरुषोत्तमरूपं त्वां जानाति तस्य किं फलं स्यादित्य
पेक्षायामाह यो मामेवेति एवं यदुक्तनिरुक्तिप्रकारेण अनुज
सोंधस्य कमललोचन [illegible] वहिस्त्यकपि स्यादिव असंतामात्रत्वे
योऽभक्तोऽसंमूढस्तत्र प्रोक्ते पुरुषोत्तमत्वे असंमूढः संशयरहि
तः मत्स्वामि[illegible] मर्थरूपं पुरुषोत्तमं तत्त्वतः पुरुषार्थमितमं
जानाति परमात्मत्वसर्वलोकभरणत्वव्यापकत्वस्वतन्त्वादिस्व
भावयोगेन ताभ्यां विसजातीयं जानातीत्यर्थः हे भारत स एव
लोकत्रयार्थज्ञ एव सर्ववित् पुरुषोत्तमत्वे एव सर्वशास्त्रता
त्पर्यसमाप्तिनामस्मिन्निति ज्ञानेन यत्किंचिदुपायोपायादिकं च
तज्जानाति वेदितव्यमस्तित्तस्य सर्वस्य वेत्ता भवति स एव सर्वभाव
न सर्वेण मनसा स्पर्शापप्रकारेण यद्वा सर्वेण साधनसाध्य सं
बंधादिरूपेण भावेन भाव[illegible]न या मां पुरुषोत्तमं भजति सेवते
यस्तु मे पुरुषोत्तमत्वे संदिग्धमतिः सोऽधीतसर्वशास्त्रोप्यज्ञः स
र्वथा भजन्नप्यभक्त एव स नाशयः भारतेत्यनेन यथैवं मे पुरुषोत्त
मत्वं ज्ञास्यसि तत्सेवनवीनमकुलोत्पन्नत्वेन च प्रशंसा स्यान्ना
स्यथेति सूचितम् १९

मधुसूदनी टीका १९

एवं नामनिर्वचनज्ञानफलमाह —

यो मामीश्वरमेवं यथोक्तनामनिर्वचनेनासंमूढः मनुष्य एवा
यं कश्चित्कृष्ण इति संमोहवर्जितः जानाति श्रयसीश्वरमेवेति पु
रुषोत्तमं प्राग्व्याख्यातं स मां भजति सेवते सर्ववित् मां सर्वात्मानं
वेत्तीति सर्ववित् स एव सर्वज्ञः सर्वभावेन प्रेमलक्षणेन भक्ति
योगेन हे भारत अतो यदुक्तं मां च योऽव्यभिचारेण भक्तियोगेन
सेवते स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पत इति तदुपपन्नं

96

यथोक्तं ब्रह्मणो हि प्रतिष्ठाहमि[illegible]ति [illegible] तदनुपपन्नतरं विदा
नंदाकारं जलधिसुविसारं कृतनिमिराब्रजस्त्रीणां हारं भवजल
धिपारं कृतधियां विहृतं भूभारं विदधदवतारं गुरुरहो म
हो वारं वारं भजत नरा शंकलारं भक्तितः [illegible]
[illegible] १९

सदानंदी टीका ११

नामनिर्वचनज्ञाने यथोक्तफलमाहनेन नामनिर्वचनेनैव यथो
क्तं मां महेश्वरं । असंमोहवर्जितो यो हा जानाति पुरुषोत्तमं य
थैव पूर्वव्याख्याने सर्वोत्तमतया सुधीः स च मां सर्वविन्मानः
सेवने सर्ववित्तमः सर्वभावेन मम्ममलक्षणेन निरंतरं १९

नीलकंठी टीका १२

एतद्विज्ञानफलमपि भक्तिरेवेत्याह योमामिति असंमूढः
मम पुरुषोत्तमत्वे संशयविपर्यासादिहीनः स एव सर्ववित्
यतो मां पुरुषोत्तमं जानाति तत्फलं च मां सर्वभावेन सर्वा
त्मना सर्वैः प्रकारैर्भजति १९

आनंदीटीका १३

यः असंमूढः विशुद्धसत्वः एवमध्यायोक्तार्थानुगमनेन
मां पुरुषोत्तमं जानाति स सर्ववित्सकृति पुरुषेश्वरतत्वज्ञः
मां परमेश्वरं सर्वभावेन साकारत्वेन निराकारत्वेन च भजति
[illegible] १९ ॥

रामकंटीटीका १४

एवं च यथोक्तप्रकारेण यो योगी मामसंमूढः सन्देहादिमोहर
हितः सन् पुरुषोत्तमतया जानात्यात्मत्वेन प्रत्यक्षमनुभवति स विशे
षितज्ञेयतत्वत्वात्सर्वभावेन सर्वात्मकत्वेन वास्तवेन भजति से
वते स एको मुख्यो याहृग्यामजरकः इत्यर्थः सर्वभावसंहितेतानं
तां सामान्यं सविन्प्रकाशसागरस्यामरस्यानुभवलक्षणं विज्ञानं
मद्भक्तेः परं रूपमुक्तं यदुक्तं लोकेनवित् चित्प्रकाशपरामर्शो

शक्तिमत्त्वमावशिष्यते अप्यद्वयवशोन्मेषभव्यानांभक्तिरेवेतेइति
[illegible] १९ ॥

पुरुषोत्तमज्ञानस्यफलमाह — ल्लातिकी [illegible]टीका १९

योयोगीअसंमूढः प्रबुद्धस्सन्नेवमुक्तलक्षणंमामीश्वरंपुरुषो
त्तमाख्यंजानातिस्वात्मतयाप्रत्यभिजानाति हेभारतसःसर्ववित्
भूत्वासर्वभावेनसर्वात्मकतयामामीश्वरंभजतेउपास्तेविश्वा
त्माभवतीत्यर्थः [illegible] १९

पंचोलेटीका

इदानींयथोक्तात्मज्ञानस्यफलमाह योमामिति हेभारतयःअसं
मूढःसंमोहवर्जितःसन्मामीश्वरंपुरुषोत्तममेवंयथोक्तप्रकारेणा
हमस्मीतिआत्मभावेनजानातिससर्ववित्सर्वज्ञःसर्वभावेनसर्व
ज्ञात्मचिंतनयासर्वज्ञात्मभावेनभजते १९

रसावीरसमिद्धायिनी ॥

योमामिति योमामीश्वरमेवंपूर्वोक्तविभूतिशालिनमसं
मूढोमनुष्यएवायमितिसंमोहरहितःपुरुषोत्तमंमाख्या
ख्यातंजानातिनिश्चिनोति ससर्वात्मकस्यममवेदनात्
सर्ववित्सर्वभावेनमाभजतिसेवतइत्यर्थः १९ ॥

मधुभाष्य

१९ ॥

भाषाअनुवादटीका

ऐसे ईश्वर का जानने हारा ज्ञानी पुरुष के ज्ञान का फल कहते हैं कि हे भारत अर्जुन इस तरह पूर्वोक्त निश्चित प्रकारसे असम्मूढ़ कहे निश्चितमति हो के जो पुरुषोत्तम स्वरूप हम को जानि शकै है सोई मनुष्य सम्यक प्रकार से हम को भजै है तिस के अनन्तर सर्वज्ञ होना है यह जानो १९

दोहा

जो मोहि ऐसें जानहिं पुरुषोत्तम कोहि सोसभवे
ता भारत सर्वभाव भज मोहि १९ ॥

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ । एतद्बु
द्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत २० इ
ति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्याया
यां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषो
त्तमयोगो नाम पंचदशोऽध्यायः १५

शांकरभाष्य टीका १

अस्मिन्नध्याये भगवतत्त्वज्ञानं मोक्षफलमुक्तंऽथेदानीं तत्स्तौ
ति इति गुह्यतममिति । इत्येतत् गुह्यतमं गोप्यतमं अत्यन्तं रहस्य
मित्येतत् किं तच्छास्त्रं यद्यपि गीताख्यं समस्तं शास्त्रमुच्यते त
थाप्ययमेवाध्यायः इह शास्त्रमित्युच्यते स्तुत्यर्थं प्रकरणात्
सर्वो हि गीताशास्त्रार्थोऽस्मिन्नध्याये समासेनोक्तं न केवलं
सर्वश्च वेदार्थ इह परिसमाप्तो यस्तं वेद स वेदवित् वेदैश्च
सर्वैरहमेव वेद्य इति चोक्तमिदमुक्तं कथितं मया हे अनघ
एतच्छास्त्रं यथादर्शितार्थं बुद्ध्वा बुद्धिमान् स्याद्भवेत् नान्यथा
कृतकृत्यश्च भारत कृतं कृत्यं कर्तव्यं येन स कृतकृत्यः वि
शिष्टजन्मप्रसूतेन ब्राह्मणेन यत्कर्तव्यं तत्सर्वं भगवतत्त्वे
विदिते कृतं भवेदित्यर्थः न चान्यथा कर्तव्यं परिसमाप्यते क
स्यचिदित्यभिप्रायः सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्य
ते इति चोक्तं एतद्धि जन्मसामग्र्यं ब्राह्मणस्य विशेषतः प्राप्यैतत्
कृतकृत्यो हि द्विजो भवति नान्यथा इति च मानवं वचनं यत
एतत् परमार्थतत्त्वं मत्तः श्रुतवानसि अतः कृतार्थस्त्वं भारते
ति २० इति शाङ्करभाष्ये पञ्चदशोऽध्यायः १५

आनंदगिरिकृत टीका

अध्यायार्थमनूद्योपसंहारश्लोकमवतारयति अस्मिन्निति स
र्वस्यां गीतायां शास्त्रशब्दे वक्तव्ये कथमस्मिन्नध्याये तत्प्रयो
गः स्यादित्याशंक्याह यद्यपीति सन्निहितमध्यायं स्तोतुमपि

कृतकृत्यश्च शास्त्रशब्दस्तदर्थाभावात्तत्राह सर्वोहीति गीताशास्त्रार्थ
स्य सर्वस्यात्र संक्षिप्तत्वादेव केवलं शास्त्रशब्देन भवति किन्तु
वेदार्थस्यापि सर्वस्यात्र समाप्तेर्युक्तं शास्त्रपदमित्याह नेति तद
गमकमाह यस्मादिति भगवत्तत्त्वज्ञानेकृतकृत्यतेत्येतदुपपा
दयति विशिष्टेति नान्यथेत्युक्तं प्रपञ्चयति नचेति सत्यपि तत्त्व
ज्ञाने कर्मणां कर्तृ[illegible]त्वात्र कर्तव्यसमाप्तिरित्याशंक्याह सर्वमि
ति तत्त्वज्ञाने कृतार्थतेति तत्र मनोरपि सम्मतिमाह एतद्धीति
भारतेति संबोधनतात्पर्यमाह यत इति तदेवमात्मनो देहा
द्यतिरिक्तत्वं चिद्रूपत्वं सर्वात्मत्वं कार्यकारणविनिर्मुक्तत्वं नाप्र
पञ्चत्वं तस्यावैदिकरसत्वात्तत्त्वज्ञानाद् शेषपुरुषार्थपरिस
माप्तिरित्युक्तं २० इति आनंदगिरिटीकापंचदशोध्यायः १५

[illegible]मिकृत टीका २

अध्यायार्थमुपसंहरति इतीति अनेन संक्षेपप्रकारेण गुह्यतमं अति
रहस्यं संपूर्णं शास्त्रमेव मयोक्तं नतु विंशतिश्लोकमध्यायमा
त्रं हे अनघ व्यसनशून्य अतएतदुक्तं शास्त्रं बुद्ध्वा बुद्धिमान्सम्यग्ज्ञा
त्य नी स्यात् कृतकृत्यश्च स्यात् योपि कोपीह भारत तत्त्वं कृतकृत्योसीति किं
वक्तव्यमिति भावः २० संसारशाखिनं छित्वा स्पष्टं पंचदशे विभुः
पुरुषोत्तमयोगाख्यं परं पदमुपादिशत् १ इति श्रीभगवद्गीता
सुबोधिन्यां टीकायां पंचदशोध्यायः १५

[illegible]शैवभाष्य टीका ३

इत्थं गुह्यतमं शास्त्रं शासनात् ज्ञानानामाद्यं क्रमभिहितं एतद्बुद्ध्वास्व
बुध्यर्थबुद्धिमान् ब्रह्मविन् स्यात् कृतकृत्यश्च कृतकृत्यः २० ३ कृतमनेनस
ति शैवभाष्ये पंचदशोध्यायः १५

रामानुजभाष्य टीका ४

[illegible]पुरुषोत्तमत्ववेदनं स्तुवयति —
इतीति इत्थं मम पुरुषोत्तमत्वप्रतिपादनेन सर्वेषां गुह्यानां गुह्यतम
मिदं शास्त्रमनघ यतस्त्वं योग्यतम इति कृत्वा मयानघोक्तं एतद्बु
ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च प्राप्य प्रणेयोपादेया बुद्धिः सा सर्वोपा
यतास्यात् यच्चतेन कर्तव्यं तत्सर्वं कृतं स्यादित्यर्थः अनेन श्लो

केनानेनरोक्तेपुरुषोत्तमः पुरुषोत्तममेवविषयंज्ञानेनशास्त्रजन्यमेवै
नन करोतिनतुसाक्षात्काररूपमित्युच्यते अविकिमिश्रादिशुद्धा
श्रवेतनात्पुरुषोत्तमप्राप्तिनानभरणानस्वाभ्यादन्यः पंचदशो
दितः [illegible] २ इतिश्रीभगवद्रामानुजविरचिते श्रीमद्भग
वद्गीताभाष्येपंचदशोध्यायः १५

अभिनवगुप्तकृत टीका ९

गुह्यतमंसर्वाहयप्रतिपादकत्वात एतदेवबुद्ध्वाबुद्धिमत्वेनतव्य
वहारवुद्ध्या एतेनवज्ञानेनैवकृतकृत्यतानतुकृतेनापिशास्त्र
विजयार्थाहारणेसुपभोगादिना वकारोडुनयोनकः कृतेन
हिकृतकृत्यताहापनेनवज्ञानेनैवेतिचिह्नं इतिशब्देनशास्त्र
स्यसमाप्तिः सूचितावक्तव्यस्यपरिपूर्णतयासमाप्तत्वात् तथा
हिषोडशाध्यायेनशिष्यस्यानेनस्यकेवलंयोग्यताप्रतिपाद्यतेन
तूपदेशएतेकिंचित दैवीविवेविधासंपदासुरीचाविद्यामय्येना
हपरीसमपात् त्वंचविद्यामयींदैवीसंपदमभिप्राप्त इत्येतावतिहि
नास्थर्यम यदृच्छति माशुचःसंपदंदैवीमिति अतएवपूर्वैविद्या
विद्यासंवहनिरूपणावसरेदेवासुरसंग्रामच्छलेनविद्याविद्ययोः
संवर्षइतिसूचितं एवचशिष्यस्वरूपेप्राधान्यतानिरूप्यमाणेप्र
संगतोन्यदप्युक्तमितिध्यायद्वयंमविष्यतिउपदेशस्तुतएवप
रिसमाप्तः सर्वभावेनहिपरमेश्वरभजनमावेशरूपंप्राप्यतदर्थं
चासत्सर्वमितितत्प्राक सर्वमाहेश्वरस्वरूपावेशएवहिपरमं
शिवम १ संग्रहोत्र इत्याद्वैतमहामोहहृत्वाक्रममयीचिति
म लौकिकेव्यवहारेपिमुनिर्विशेसमाविशेत् इतिश्रीभग
वद्गीतार्थसंग्रहेपंचदशोध्यायः १५

परमार्थप्रपा टीका १

अध्यायार्थमुपसंहरति इतीति इत्यनेनसंक्षेपप्रकारेणगुह्य
तममतिरहस्यंसर्वंशास्त्रमेवमयोक्तंनपुनरध्यायमात्रं भो
अनघशुद्धान्तःकरणएतद्बुध्वासम्यक्ज्ञात्वायःकोपिबुद्धिमा ९८
न्तत्वज्ञानवान्कृतकृत्यश्चस्यात्किंपुनर्भवानित्यर्थः अध्या
यनान्यर्थ ब्रह्मांमूलऊर्ध्वंशीरहितविनयतेऽबोद्धारोप्यादिशा॥

मू

खास्तैर्गुणैः पल्लवाः रूपविषयपरिणतिर्वासनाः पर्णजाले हृत
सत्त्वलप्रपंचे पुरुषवरमुपाश्रित्य मूले विदित्वाः संगेन छित्वा शेष
हरिरिति दशमे पंचयुक्तेन गात १ इति श्रीमद्देवतत्पंडित स
र्वविरचितायां भगवद्गीताटीकायां परमार्थप्रपायां पुरुषो
त्तमयोगो नाम पंचदशोध्यायः १५

वनमाली टीका ८

पुरुषोत्तमत्वज्ञानमात्रमेवेतरसाधननिरपेक्षं मुक्तिसाधनं य
स्मै कस्मैचित्प्रदेयमनधिकारिणोपि स्यान्न शायापनस्माप्य मु
क्ता भवेयुस्तथा वक्ष्ये हे रुच्छेदः स्यादिति संशयवानाह इतीति
इत्थंभूतप्रकारेण गुह्यतमं गोप्यतमं सम्पूर्णं शास्त्रमेवं संक्षेपेण
देवपुरुषोत्तमत्वप्रतिपादकं मयोक्तं कृतेनशीलेन मदुक्तावा
क्येन शुद्धायतत्त्वं मयोपदिष्टं त्वया ज्ञात्वा हे शायैवोपदेष्टव्यं न य
स्मै कस्मैचिदित्याशयेन संबोधयति हे अनघ एतद्बुद्ध्वा यो पि यः
कश्चिद्बुद्धिमान्मद्विषयः कापरोक्षवान्स्यात् कृतेन सर्वं कृतं
कर्तव्यं येन न पुनः कृत्यान्तरं यस्यास्ति स कृतकृत्यः स्यात् यदि
शिष्टजन्मप्रभृतेन ब्राह्मणादिनानेकोपायैः कर्तव्यं न तु भगवतः
पुरुषोत्तमत्वज्ञानमात्रादिवतीति भावः २० गीतायां पंचदशः
१५

श्रीमद्वैजयन्ती टीका ९

अथ पुरुषोत्तमज्ञानं तत्त्वव्याख्यायामुपसंहरति इति गुह्यतममि
ति हे अनघ अतीतस्य सद्देपरूपं पुरुषोत्तमत्वनिरूपकं गुह्यतमं स
र्वेषां गुह्यानामप्यतिशयगुह्यं गोप्यं इदं त्रिश्लोकीरूपं शास्त्रं सर्वं वे
दार्थरूपत्वाद्दामनमरूपवाक्यं तन्मया पुरुषोत्तमेनोक्तं कथि
तं अनघेनानेन यतस्त्वं पापरहितस्तेनास्याधिकारित्वमस्ति तो
मयैतदुक्तं त्वया पापिना अनधिकारिणे नैतत्प्रकाश्यमिति सूचितं हे
भारत एतत्सर्वं बुद्ध्वा ज्ञात्वा बुद्धिमान् स्यात् प्राप्य अयोग्या बु
द्धिर्विद्यते यस्य स बुद्धिमान् अपरोक्षज्ञानी स्यात् च पुनः कृतकृत्यः
कृतं कृत्यं कर्तव्यं येन स तथा शास्त्रजन्यपुरुषोत्तमविषयता
नवात्स्यानुसाक्षात्कारज्ञानवान्त्रिस्यर्थः भारतेत्यनेन शुद्धवं
शजन्मत्वाननेहशज्ञानाधिकारोस्तीति द्योतितम् २० इतमंच

इमकाभ्यांजीवाभ्यांस्तुजगतःयः संक्षेपं वदन्नेवन्देतं कृष्णं पार्थ
सारथिम् १ इति श्रीनित्यानन्दवंशावतंसकृष्णदासस्यान्ते
वासिना गिरिधारिदासेन विरचितायां भगवद्गीतार्थकृष्ण
मवैजयंत्यां पंचदशोऽध्यायः १५

+ इदानीमध्यायार्थमुक्तवतमुपसंहरति॥ मधुसूदनी टीका १

+ अनेनेन प्रकारेण अत्यन्तमेव रहस्यतमं संपूर्णं शास्त्रमेव संक्षेपे
ण इदमस्मिन्नध्याये मयोक्तं हे अनघ अव्यसन एतद्बुद्ध्वा योपि
यः कश्चिद्बुद्धिमानात्मज्ञानवान्स्यात् कृतं सर्वं कर्तव्यं येनन श
नः कृत्यानं तंयस्यास्ति स कृतकृत्यश्च स्यात् विशिष्टजन्मप्रसू
तेन ब्राह्मणेन यत्कर्तव्यं तत्सर्वं भगवत्तत्त्वे विदिते कृतं भवेत्
न त्वन्यथा कर्तव्यं परिसमाप्यते कस्यचिदित्यभिप्रायः हे भा
रत त्वंतु महाकुलप्रसूतः स्वयं च व्यसनरहित इति कुलगुणे
न स्वगुणेन चैतद्बुद्ध्वा कृतकृत्यो भविष्यसीति किमु वक्तव्यमि
त्यभिप्रायः २० वंशीविभूषितकरान्नवनीरदाभात्पीतांबरादरु
णबिंबफलाधरोष्ठात् पूर्णेन्दुसुंदरमुखादरविंदनेत्रात्कृष्णात्प ८ द
रंकिमपि तत्त्वमहं न जाने प्रमाणतोपि निर्णीतं कृष्णमाहात्म्य
मद्भुतं न शक्नुवन्ति ये सोढुं ते मूढा निरयं गताः इति श्रीमत्पर
महंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीपादशिष्य
श्रीमधुसूदनसरस्वतीविरचितायां श्रीभगवद्गीतागूढार्थ
५ कृष्णो दीपिकायां पुरुषोत्तमयोगो नाम पंचदशोऽध्यायः १५

सदानंदी टीका ११

अध्यायार्थमुक्तमेवमुपसंहरतीत्यर्थः अनेनैव प्रकारेण रहस्य
तममनघ १ संपूर्णशास्त्रमेवेदमध्यायेस्मिन्समासतः मयासं
क्षेपेणोक्तं हे निर्दोषार्जुन प्रिय २ कथं शास्त्रत्वमेतस्याध्यायस्येति
चेदुच्यते हितशासनमेवोक्तं शास्त्रत्वं तत्त्वदर्शिभिः ३ मदस्मिन्न
खिलं प्रोक्तमध्याये हरिणा स्वयं तत्कथं पूर्णशास्त्रस्य प्रमेयंस
र्वमत्र भोः ४ शास्त्रं हि द्विविधं प्रोक्तं हि शंसनं तत्परं प्रशंसं च वि ता८
हितं च तत्त्रोतिषु विहितं नेते ५ जीवेश्वरात्मनपौरुषं तत्त्वहितानीय
योगिनः परात्पीयत्रकथ्यं तेन निहतानि नीये निष्कामपमे

श्री·
गी·टी·
पं·

संसिद्धबुद्धिशुद्धिश्चतः सुधीः अधिकारी निहतेस्मिन्शास्त्रे तत्त्वाव
बोधके ७ वैराग्यं तत्र मुख्यं स्यात्तदादौ हरिरागिते संसारहे
तुविच्छेदसाधनं सुविवेकतः ८ अधिष्ठानात्मतत्त्वस्य नित्य
त्वमवधेः स्फुटं नत्वाध्यस्तस्य विश्वस्य वाध्यत्वात्स्यादनित्य
ता ९ अनित्यदोषवाङल्पवीतरागो हि रागिनः स्याद्वि नित्यब्रह्मसु
खमोहेरतिर्निर्दोषवस्तुनि १० यावदात्मापरिज्ञानेनावक
र्मादिहेतुका संसृतिस्तथा नित्यमस्थापि स्यादनपायिता ११ अ
नादिमध्यान्तनिधनात्स्वप्नसृष्टिरिवभ्रमात् वैराग्यात्सविवे
कात्स्याद्दस्याउच्छेदनेत्तमः १२ विरक्तः सर्वकर्माणि संन्यस्य
वाटहाविके अनन्यशरणो भूत्वा प्रपद्येत हरिं गुरुं १३ यतः
प्रवृत्तिरेतस्याः संसृतेरहयाद्भुते तमेव शरणं गच्छेत्तदुच्छेद
यसन्मतिः १४ तत्प्रसादादुदेत्यस्य तत्त्वज्ञानं ससाधनं येनया
तिपरं धाम यतो नावर्तते पुनः १५ श्लोकैः पंचभिरित्येकं
समाम्नायाच्छास्त्रमेयकं तद्विशेषाश्च तन्विस्तरदेशी यामासविस्त
रात् १६ तत्राद्यमेकेन पद्धामेति शासितं स्वप्रकाशम
नाभासं प्रपंचमारोहितं निवर्जितं १७ उत्काश्यातानतो नादिजीवभा
वोविभोः स्मृतः अभिनो पीश्वरात्जीवउपाधिभेदवानिव १८
यावद्ज्ञानमेतस्य लिंगमात्रध्यासतो विभोः संसारचक्रे भ्र
मणं सदा जन्मादिलक्षणं स्थूलभोगालयं प्राणलिंगादेहे
कसाधनः भुंक्ते भोगान्भ्रमाविलक्षणः २० सर्वत्र सांति रूपे
णव्याप्तनौ भ्रमयत्रपि ज्ञानादित्रिपुटीनैनं पश्यत्यज्ञानमोहि
ताः २१ येन हृत्पद्मपदांभोजध्याननिर्मलबुद्धयः ते पश्यंति हि
पद्मरूपस्येहात्मिन्नास्मसाक्षिणं २२ अहो मोहस्य माहात्म्यं य
त्स्वरूपमतिस्फुटं पश्यंतोपि न पश्यंति यतमाना अपि बुद्ध
यः २३ अहो हरिपदांभोजभक्तेर्माहात्म्यमद्भुतं अनिच्छ
तोपि पश्यंति यत्तत्स्वरूपमहत्तमाः २४ इत्येवं पंचभिः श्लो
कैस्तत्पदार्थस्य मानिः अभिधाय ततः श्लोकैस्त्वमर्थ
स्तत्पदार्थके ७१ विंशतिकस्पष्टयाजादयामास सिद्ध
पे सर्वत्रानिस्वेकेनोप्याधिदैवादिगोचरं २५ सर्वधा

विद्दः सन्नभोक्ता४

योनिराधारः सर्वपोषककर्ता ईश्वरः प्राणादिप्रेरकत्वेन जीवने हेतुरेव च
१८ सर्वकर्ता न चापाता हर्ता सर्वत्रगो हरिः सर्वानुस्यूतरूपश्च स
र्वाधिष्ठानमेव च १९ इन्द्रवह्न्यादिशब्दैश्च प्रतिपाद्यः स आगमे वेदा
न्तेषु स एवास्ति वेद्यो ज्ञानैः पृथग्विधैः २० वेदान्तानां च सर्वेषां फलं त
स्मिं ज्ञाते परे पदे सर्ववेदशिरांकानां शास्त्रयोनितया हरिः २१ वेद
वेद्यास एवास्ति दैशिकादिस्वरूपधृक् ज्ञानेन तेन चाज्ञातास ए
व न नतः पृथक् २२ अभिधाय हरिः सम्यक् स्वपदार्थं पुनस्तयोः
उपाधी दर्शयामास वाध्यो नत्वंपदार्थयोः २३ कार्योपाधिः त्वरः
प्रोक्तो जीवसंसृतिकारणं अवरः कारणोपाधिर्मायाविक्षेपकका
रणं २४ कार्यकारणरूपौ द्वावुपाधी वदता हरी उक्त्वा विडम्ब्य
मात्मानं पुरुषोत्तमसंज्ञितं २५ दर्शयामास वेदान्तसिद्धान्तहेतु
पूर्वकं सर्वाधिष्ठानभावेन स्थितो यच्युत एव यः २६ मायातीतः
स्वयंज्योतिरुत्तमः सो दराद्दरात् दृष्टान्तेन यतो भासेन दृश्य
तेनाकिंचन २७ देहाद्यौपाधिकात्मान आत्माभासत या विलाः भा
समानास्ततो भिन्नः परमात्माद्वयो हरिः २८ जीवत्वमीश्वरत्वं च
तत्र मायाविजृम्भणं स्वतः शुद्धोद्वयानंदः पुरुषोत्तम ईरितः २९
कार्यकारणाभावात्सोन्यतमभिन्नो निरंजनः ज्ञातीयविजातीयभि
दाग्भ्रान्त्यास्ति निष्कलः ३० आविदर्थः स एवास्ति तत्त्वमस्यादि सद्वि
राम पुरुषोत्तमशब्देन प्रतिपाद्यः परः पुमान् ३१ यः साक्षी पुरुषः
प्रोक्तः स एवोत्तम ईरितः तज्ज्ञानात्सर्वविज्ञानसिद्धिरत्र निराकुला ३२
वेदे सर्वत्र वेद्यत्वात्स एव प्रार्थितः पुमान् लोकेकाव्यपुराणादौ प्रति
पाद्यः स एव हि ३३ यस्ते समोहमूलः सन्वेदसम्प्रदायोत्तमः स एव
सर्ववित्सर्वात्मस्तानात्मावबोधतः ३४ स एव भगवद्भक्तः सदान
न्यधिया हरिं भजते सर्वभावेन सर्वभूतानामुत्तमः पुमान् ३५ नातो
गुह्यतमं शास्त्रं परं स्यात्तत्समतं सतां हितशासनमेवेदं शास्त्रत्वेनात्र
कीर्तितं ३६ अतो भगवता सम्यग्बोधयेन हितैषिणा इति गुह्यतमं
शास्त्रमित्यादि विजयं प्रति ३७ एतच्छास्त्रं यथोक्तं यः कश्चिद्बुद्धि
तिगुणवान् आत्मज्ञानाद्विनो भूत्वा कृतकृत्यो भवेन्नरः ३८ कृ

श्री॰
गी॰ टी॰
पं॰

तं कृत्स्नं वयेन्नाशो यस्य कृत्स्नांतरं मनाक् नावशिष्टं कृतो ऽद्यत्यनि
पादितमुत्तमं ४९ श्रेष्ठजन्मप्रसूतेन कर्तव्यं ब्राह्मणेन वै न त्वं वै भ
गवतत्वे विदिते सह कृतं भवेत् ५० न त्वमथेह कस्यापि कृत्स्नं परि
समाप्यते त्वं तत्कृष्णकुले जातः स्वयंप्रसन्नवर्तितः ५१ स्वगुणे
न कुलोत्कृष्टभावेन व्यासस्य यथार्थतः बुद्धेवेकृतनकृतत्वं भवि
ष्यसि न संशयः ५२ संदृष्टैवागमार्थविजयपरथ्यगतः शास्त्रयो
नीरमेशा गीतार्थे शास्त्रसारे वितनन पदपरे विस्तृते नत्वमुक्ता
तत्राप्यंशेन सारं प्रकृतिविकृतितो न्यं तमभिन्नं रहस्यं स्वीयं यो वा
चयो नत्त्तमहमतिमुदा संश्रये कृष्णमीशं ५३ कृतं कृत्स्नेन कृ
तिशिखरसिद्धांतममलं विविच्यादौ वृद्धासिद्धवनगुरुचरणेनमधु
हा मसर्वं तोमक्तो भजनिमततं प्रेमकलया मुअंडं वद्योसो भव
तिविबुधानामपि जनः ५४ समस्तं वेदं भुतनयैवं भारतेन व्याप
काख्येसत्तिशृतमोनमः पुराणां जाले पिहितं वास्तवं पदं सूक्ष्म
पदवा निमनामति स्विये ५५ वेनः परित्यज्य विकल्पजालं रम
स्वभोः कृष्णपदारविंदे नातः परं तत्वमिहास्ति किंचिन्महाहि विनि
र्णीतमिदं मतं सत् ५६ २ इति भावप्रकाशे मद्दानंदविहतानंदा
कृते संसारावर्तच्छेदे दीपदर्शिनि पंचदशोयोगतः १५

नीलकंठी टीका १२

अस्मिन्नध्याये भगवत्तत्वज्ञानस्य मोक्षफलत्वमुक्ता ऽथेदानीं तत्त्वो
ति इतीति इतिपदत्रयार्थमग्रे तत्रहस्य शास्त्र यद्यपि स्वयमत्रत्य शा
प्यापीकृत्वं शास्त्रनप्याप्यास्मिन्नध्याये कृत्स्नस्य शास्त्रार्थस्य प्रदर्श नादिः
मपि शास्त्र अत्र हि कार्यकारणविभागः संसारहेतुस्यानित्यत्वं भ
व॰ गतो विभूतयः यस्तं वेद स वेदवित् वेदैश्च सर्वैरहमेव वेद्यः इत्यादि
ना सर्वः शास्त्रार्थो दर्शितोस्ति इदं मयाउक्तं हे ऽनघ तन्निर्यसन एत
द्रहस्यं बुध्वा बुद्धिमान् स्यात् नान्यथा आत्मविदूत्वेन तावता कृतकृ
त्यः सर्वं हि कृत्स्नं परमात्मावगतिपर्यंतेनत्रैवकालं प्रकृष्यार्थं समाप्तेः
वाय्यामप्राणीयमश्यान भवति नातः परं कर्तव्यमवशिष्यते इत्यर्थः २
इति श्रीमहाभारते आश्वमेधिकपर्वणि नैलकंठीये भारतभावदीपे पंचदशोऽध्यायः १५

+ अथाध्यायार्थमुपसंहरति फलनिर्देशेनोपसंहरति ॥

आनंदीटीका १५

+ इतीदं शास्त्रमेतदध्यायरूपं शास्त्रं गुह्यतमं प्रकृतिपुरुषपरीक्षाक्रमेणेति रहस्यं मयोक्तम् एतद्बुद्ध्वार्थतो ज्ञात्वा बुद्धिमान् स्यात् परमार्थज्ञानेनैव कृतार्थश्च स्यात् २० इति श्रीभगवद्गीतासु आनंदीटीकायां पंचदशोऽध्यायः १५ ॥

+ यथोक्तज्ञानफलनिर्देशेनाध्यायमुपसंहरन्नाह ॥

रामानंदीटीका १४

+ इति यथोक्तप्रकारेण गुह्यतमं सर्वरहस्यानि शास्त्राणि शास्त्रमिदं भगवता प्रत्यक्षानुभूतफलं मयाभिहितं नातः परं वक्तव्यमित्यर्थः अत एवाह एतद्बुद्ध्वा यथावदधिगम्य बुद्धिमान् पुरुषः स्यात् अविज्ञाते त्वस्मिन् सत्यामपि बुद्धावबुद्धिमन्त एव प्रमातारः शरीरादिहेयवस्तुनिमग्नचित्तत्वात्तेषां तथैतदेवानुष्ठाय कृतकृत्यः स्यात् पुरुषः कृतं निरवशेषितं कृत्यं यथाकरणीयं येन स तथा एतज्ज्ञानप्रतिपादितार्थानुष्ठानव्यतिरेकेण यां कांचित् क्रियामनुष्ठीयते तथा सम्यगनुतिष्ठितयापि न कृतार्थी स्यादिति सर्वज्ञानानां सर्वक्रियाणां च यथोक्तज्ञाननिष्ठत्वेनानुष्ठितानां परमात्मस्वरूपसमापत्तिलक्षणपरसिद्धिसाधनत्वमित्युक्तं कृदीथः क्लेशमूलाश्रितफलपदवीकर्मभूरिशाखो वासनानव्यकृत्स्नात्युपचितविषयज्ञानपत्रौघचित्रम् अश्वत्थं छित्त्वैनं भुवनवयमयं तत्त्वदिव्यासिहेतोः संतो ध्यायेन्नशास्त्रं तमेनं त्रिगुणातीतेवाथमुमेजयंतु २० ॥ इति श्रीराजानकरामविरचिते वाक्यार्थान्वयमात्रे सर्वतोभद्रनाम्नि भगवद्गीताविवरणे पंचदशोऽध्यायः १५ ॥

अथाध्यायपंचदशकार्थमुपसंहरति

[illegible]टीका १५

इत्युक्तेन प्रकारेणेदं भगवता प्रत्यक्षानुभूतफलमति रहस्यं शास्त्रमध्यायपंचदशकरूपं हेनत्रव्यसनभ्रमयानुभवमुक्तम् एतदेव यथोक्तं बुद्ध्वा सम्यगनुभूय बुद्धिमत्त्वं न तत्सर्वदारबुद्ध्या एतेन ज्ञानेनैव कृतकृत्यत्वं ननु कृतेनापि शास्त्रविजयार्थे हरणसुखोपभोगादिनाचकरोऽद्भुतद्योतकः कृतेन हि कृत्यं कृतत्वात् एतेन ज्ञानेनैव

श्री·
गी·टी·
पं

वेतिचित् विशिष्टजन्मप्रसूतेनपुरुषेणयत्कर्तव्यंतत्सर्वंभगवत्त
त्त्वेविदितेकृतंभवेत् नत्वन्यथाकर्तव्यंसमाप्यतेकस्यचिदितिअ
भिप्रायइत्याम् उपासनार्थंदेहेस्मिन्नीश्वरेपुरुषोत्तममम् पुरुषो
त्तमयोगाख्यंप्राहयस्तंस्तुमोहरिम् २०॥ इतिश्रीभगवद्गीता
टीकायांवासव्याख्यायांपुरुषोत्तमयोगोनामपंचदशोध्यायः १५

पंचोले टीका

अध्यायार्थमुपसंहरन्नुक्तस्यमोक्षफलस्यभगवत्तत्त्वज्ञानस्य
स्तुतिमाह इतीति हेअनघमयाइतिरहस्येतद्गुह्यतमंअत्यंतर
५रा हस्यंशास्त्रंसकलगीतासारभूतमध्यायेपंचदशाध्यायरूपेणेत
भ्यमुक्तंएतत्यथादर्शितार्थंज्ञात्वाबुद्धिमान्स्यात्भगवत्तत्त्वज्ञाते
कर्तव्यंसर्वंपरिपूर्णंभवति २० ॥ इतिश्रीभगवद्गीतासूपनिषत्सु
ब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेपंचोलेटीकायांपंचद
शोध्यायः १५ ॥

रणवीरसमिद्धोधिनी॥

इदानीमध्यायार्थमुपसंहरति इतीति अत्यनेनप्रकारेणगुह्य
तमंरहस्यंशास्त्रमुपदेशात्मकमुक्तमुपदिष्टं एतद्बुद्ध्वानि
श्चित्यबुद्धिमानात्मज्ञानवान्कृतकृत्योविहितस्वोचितक्रियः
स्यादिति अथवा शास्त्रमेवशास्त्रंशास्त्रविद्यागुह्यतमं गृहनीय
यंविधेतिमयोपदिष्टमेतद्बुद्ध्वावगम्यबुद्धिमान्निश्चयवान्कृ
षवीरःकृतकृत्यःकृतास्ववशीकृताःकृत्याःशास्त्रचालनक्रि
यायेनसइति कृतकृत्याकृतकृत्योभ्यस्तशास्त्रविषयतान्कृतार्थो
भवतीत्यर्थः भारतेति भरतकुलोत्पन्नत्वमतएवममसाक्षा
द्धर्ममुपदेष्टुंरूपदिष्टस्वधर्मपालनार्थंवाक्यावधारणसमर्थ
नाप्रतिपादकंसंबोधनवचनमित्यर्थः २० इतिश्रीभगव
द्गीताव्याख्यायांरणवीरसमिद्धोधिन्यांपंचदशोध्यायः १५

१०३

मधुभाष्य

१॰ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्री
मद्भगवद्गीताभाष्ये पंचदशोध्यायः १५॥

भाषाअनुवादटीका

अब अध्याय के अर्थ का उपसंहार करते हैं कि हे अनघ नि:
पाप अर्जुन यह संक्षेप से अति रहस्य स्वरूप जो संपूर्ण शा
स्त्रों का सारांश सो मैं ने कहा केवल वीश श्लोकयुक्त एक अ
ध्याय छोड़ के इस से जो कोई होय यह मेरी कही वाक्य को
बोध करि के बुद्धिमान कहावता औ ज्ञानी हो चरितार्थ कृ
तार्थ होता है तो हे भरतवंशी अर्जुन तुम जो चरितार्थ होउ
गे इस मे और कुछ कहना है सर्वत्र परिपूर्ण परमात्मारूप
श्रीकृष्ण जी संसार वृक्ष को भिन्न करके पुरुषोत्तमयोग नाम
इस पंद्रहें अध्याय मे अपना परमपद अर्जुन को उपदेश किया
२॰ इतिश्रीजगन्नाथमल्लकविरचित मनभावनीटीकायां पञ्च
दशोध्याय: १५

दोहा

अतिगोप्य उमहि शास्त्र यह कह्य अनघ में तोहि बुद्धिमा
न अरु ज्ञानके भारत कृतार्थ होहि २॰ ॥

105



